अलिविलासिसंलापो

नाम

खण्डकाव्यम् ।

[मूल्यम् १ रू.

श्रीः

अलिविलासिसंलापो

नाम

खण्डकाव्यम् ।

काशिकराजकीयसंस्कृतप्रधानपाठशालायाम्

साहित्यदर्शनाध्यापकेन

महामहोपाध्याय-(सी. आई. ई.)-गङ्गाधरशास्त्रिणा

विरचितम् ।

काश्यां

प्रभाकरी-यन्त्रालये मुद्रितम् ।

सवत् १९६४.

[मूल्यम् १ रू.

PRINTED AT THE PRABHAKARI PRINTING WORKS,
BENARES.

☞ एतत्पुस्तकप्राप्तिस्थानम्—

प्राभाकरी-कम्पनी.

रामकटोरा,

बनारस (Cantt).

U, P. Agra and Oudh.

॥ श्रीः ॥

अलिविलासिसंलापनामकखण्डकाव्यस्य

भूमिका ।

अद्यत्वे प्रवर्तमाने संस्कृतविद्यायाः पठनपाठननिबन्धनिर्माणादिप्रचारप्रकारे प्राय एकैकं विषयमवलम्ब्य प्रवर्तन्ते तस्यैव विशेषतो विवेचनाय तत्र स्वकीयपाण्डित्यप्रकाशनाय वा विद्वांसः । न पुनस्तथा यतन्ते येनाल्पग्रन्थेन भूयःसु विषयेषु भवेत् प्रवेशो व्युत्पित्सूनाम् । नैतावता न वयं तान् बहु मन्यामहे, सौहार्देन तूपदिशाम एकैकविषयज्ञानप्रकर्षसम्पादने ऽपि परमावश्यको बहुषु शास्त्रीयविषयेषु प्रवेशः स यथा भूयसामनुग्राहकस्तथा नाद्य इति ।

पश्यत प्राचीनानां भारतवर्षीयाणां विद्योपार्जनशैलीं यथोदाजह्रुर्महाभाष्यकाराः श्रुतिं 'ब्राह्मणेन निष्कारणं षडङ्गो वेदो ऽध्येयो ज्ञेयश्चेति' । यदि वर्तमानसमयइव तदानींतना अपि कस्य चिदेकस्य व्याकरणादेरङ्गस्य साकल्येन ज्ञानसम्पत्तिमेव बहु मन्यमानास्तामृते नैव स्प्रष्टव्यो ऽस्माभिरन्यो विषय इति कृतशपथाः स्युः कं प्रवर्तयेदेषा भगवती श्रुतिरशक्यतया जीवजातीयानामेकैकस्मिन्नप्यङ्गे विविधसुतर्कदुस्तर्कसमुद्भावितपूर्वोत्तरपक्षतरङ्गपरम्पराभिरलङ्घ्यतामापादिते पारतरणस्य द्वितीयाङ्गलेशेनापि विकलाः एकस्मिन्नङ्गे पारं गता अपि किं वा साधयेयुरात्मनो विनेयानां वा हितमिति परीक्षका एव विचारयन्तु ।

पश्यत यदि कश्चन सप्तभौमं प्रासादं निर्मित्सुस्तदुचितामेकां भित्तिं तावदुन्नतामपरिसमाप्य न मया भित्त्यन्तरमारम्भणीयमिति निश्चित्यैकामेव भित्तिं तावदुन्नमयितुं यतेत सहायकान्तराभावात् नावतिष्ठेत तावती भित्तिरवस्थापिता वा महता प्रयासेन न किञ्चित्फलं जनयेत् स्वामिनः क्रमेण तु चतसृषु भित्तिषूत्थाप्यमानास्वेकभूमगृहमात्र-

सम्पत्तौ तावन्मात्रेण संपद्यमानवसत्याद्युपयोगः परस्तादपि यथारुचि द्वितीयादिभूमीर्निर्मापयन्नधिकाधिकं फलं लभतइति । स चेदेकभूममपि सदनं सम्पाद्य तदेकदेशमधिकमुज्ज्वलं तदुचितादर्शचित्रादिसामग्र्या परिष्कुर्यात्ततोऽप्यधिकं सुखमनुभवेदिति तथैव यतन्ते बुद्धिमन्तः ।

एवं शास्त्रीयविविधविषयज्ञानसंपन्नो लौकिके व्यवहारे चेन्न निपुणः स्यात्तर्हि न तथोपयुज्यते भूयान् हि कालो लौकिकव्यवहारस्य शास्त्रैकसाध्यपाठनादिकालात् ततो लौकिकव्यवहारेष्वप्यावश्यकी विदुषामपि व्युत्पत्तिः । यथाऽऽहुः स्मृतिकाराः ।

"लोकवेदज्ञधर्मज्ञाः सप्त पञ्च त्रयोऽपि वा ।
यत्रोपविष्टा विप्राः स्युः सा यज्ञसदृशी सभा" ।
"चत्वारो लोकधर्मज्ञाः पर्षत्त्रैविद्यमेव वा"-इत्यादि ॥

ततश्च सिद्धं लौकिकेषु शास्त्रीयेषु च विषयेषु यथासम्भवं बहुज्ञतासम्पादनं परमावश्यकमुन्नतं पदमारुरुक्षूणामिति ।

तत्र लौकिकविषयेषु प्रावीण्यसिद्धये साहित्यशास्त्रं परमुपयुज्यते तथाविविधदेशज्ञानं च ।

एतत्सर्वं मनसि निधाय निर्मितोऽयं मयाऽलिविलासिसंलापनामकः पद्यसहस्रात्मको निबन्धः । अत्र च नव शतकानि विभक्तानि ।

अस्मिन्नेकस्मिन्नेव सहस्रपद्यात्मके निबन्धे भूयसां साहित्यविषयाणां व्यवहारिकविषयाणां च भारतवर्षप्रसिद्धास्तिकजनाभिगमनीयतीर्थदेवतानाञ्च[3] लोकायतसिद्धान्तानां चतुर्विधबौद्धमतानां जैनमतस्य कर्ममीमांसामतस्य भक्तिशास्त्रापरपर्यायविग्रहवद्देवतोपासनामतस्य न्यायवैशेषिकमतयोः सांख्यपातञ्जलमतयोश्च पूर्वपक्षरूपतया ब्रह्माद्वैतदर्शनस्य

---

१ प्रथमपञ्चशतकयोः । २ अंशतः सर्वशतकेषु । ३ पञ्चमशतके ।
४ द्वितीयशतके । ५ तृतीयशतके । ६ चतुर्थे । ७ षष्ठे ।
८ सप्तमे । ९ अष्टमे । १० नवमे ।

चोत्तरपक्षतया निबन्धनेन द्वादशदर्शनीयस्थप्रसिद्धावश्यज्ञातव्यविषयनिरूपणेन लघुतमो ऽप्ययं ग्रन्थो व्युत्पित्सून् बहूपकुर्यादिति मुहुरालोचनीयो ऽयं तैः।

जानन्त्येव शास्त्रेषु कृतश्रमा यदत्र निरूपितास्ते विषया येष्वेकैकस्यापि साकल्येन निर्णयायापेक्ष्यते भूयान् ग्रन्थविस्तरस्तथा सति लघुतमेनानेन कथङ्कारं सर्वविषयाणां पूर्णतया निरूपणं भवेदिति तथा ऽप्यमुं पर्यालोचयतां भवेत्तत्तद्विषयेषु विशेषजिज्ञासा तया च प्रेरितास्ते पश्येयुस्तत्तदाकरग्रन्थान् तैश्च निवर्तयेयुः संशयान् सामान्यतः सर्वदर्शनसाहित्यविषयज्ञानं त्वेकेनाप्यनेन संभवेत्तच्च वर्तमानावस्थायामभीष्टमित्येतन्निर्माणे मम प्रवृत्तिर्न तु सर्वविषयेषु स्वस्याभिज्ञताप्रकाशनाय। अतो विदुषामेतदालोचनकाले यत्र स्खलितमपरिपूर्णता वा प्रतिभायात्तान् विषयानेतन्निबन्धमध्यनिवेशनोचितपद्यैर्निबध्याऽनुग्रहेण ते प्रेषयन्तु येन कृतज्ञताप्रकाशनपूर्वकं द्वितीयसंस्करणे प्रेषकनाम निर्दिश्य ते ऽपि विषया निवेश्येरन्।

प्रार्थये च गुणैकदृशो महाशयानत्र दृष्टिपातानुग्रहेण सफलयन्तु मे श्रमं समास्वादयन्तु चैकत्र संभृतं द्वादशदर्शनीसाहित्यसाररसमिति शम्।

गङ्गाधरशास्त्री।

अलिविलासिसंलापस्य

शुद्धिपत्रम् ।

पृ.	पं.	अशुद्धम् ।	शुद्धम् ।
६	२१	दौष	दोष
६	२५	घुष्प	पुष्प
८	१३	ज्ज्वल	ज्ज्वल्
८	१५	मज्जु	मञ्जु
९	२	रेम	रमे
११	९	तीष्ठां	तीष्टां
१४	१९	दत्वैघ	दत्वैव
१४	२०	प्रायया	प्रापया
१८	१८	खदा	खाद
२५	२	मह्नि	महिं
२७	५	राहू	राह्व
२८	३	थन्न	यन्न
२८	१६	द्यक	द्यत्क
२८	२०	सास्त्र	लास्य
२८	२३	तरू	तरु
३०	३	ततुण	तरुण
३६	१९	हेता	हेतौ
३६	२०	भृङ्गम्	भङ्गम्
३७	९	यता	यंतो
३८	२२	स्मिन्न	स्मिन्न
३९	२५	कार्यं ऽप्यु	कार्यं कोऽप्यु
४०	२	तद्ध्याप्य	तद्व्याप्य
४१	१	क्लप्तो	क्लृप्तो
४२	८	वृत्ति	धृति
४२	१०	व्रृत्तिं	वृतिं
४५	१०	स्याऽका	स्यावका
४५	१९	वत्स्य	वेत्स्य
४५	२३	मन	मत
४८	४	वृत्तैः	वृन्तैः
४८	२१	भत्स	भर्त्स
४९	१९	मतियैंस्त	नतियैंस्ता
५०	१४	वेहय	वेह्य
५[illegible]	१[illegible]	[illegible]	[illegible]
५५	११-१२	चैकदेश-	चैक-देश-
५६	१८	त्वन्व	त्वन्त
५७	१	तति	ताति
५९	२२	र्तात्पया	तात्पर्या
६०	१९	शुमं	शुभं
६१	१६	विलाया	विलय
६१	२५	विद्रे	विदूरे
६६	८	द्षित	दूषित
६९	८	गङ्कया	गङ्गया
७०	२२	रुपक	रूपक
७१	२	वृति	वृतिं
७१	३	महत्-	महत्
७१	७	यन्-	यन्
७५	१	कलेन	कलेव
७८	२४	साधस	साधन
८३	२७	एकासद्धय	एकसिद्धये
८४	१	चरणौ	चरणो
८४	१०	विघ्नै	विघ्ने
८४	२०	तद्वृत्तान्त	तद्वृत्तान्त
८४	२१	र्थाला	र्थला
८६	४	वचः	वेचः
८८	११	स भय	सभय
९१	२	सुराह्वि	सुराह्वि
९१	१३	नटद्	नटद्
९२	९	म्यहितं	म्याहितं
९२	१०	क्षंमेत	क्षमेत
९२	१८	कृतो	कृतयो
९५	२३	पृथाग्	पृथग्
९६	२	स्थषति	स्थपति
९६	१७	वडवै	बाडवै
९६	२८	वेशोन	वेशेना
[illegible]	१	[illegible]	[illegible]


पृ.	पं.	अशुद्धम् ।	शुद्धम् ।
१००	१६	वरुह्य	वर्तीय
१०१	२४	नित्व	नित्य
१०२	२५	पेत्यपि	पेत्यापि
१०५	९	सम्य	सरूप
१०६	८	प्रवंतेय	प्रवर्तये
१०७	२	कवित	कविता
१०७	३	माध्यस्था	माध्यस्थ्यां
१०९	८	चिंर	चिरं
११०	२५	तृष्णाया	तृष्णया
११७	२५	बुद्धा	बुद्ध्वा
११३	१६	विचारय, चिरं	विचारय चिरं,
११९	१७	सपमु	समुप
१२२	२५	शून्यात्	शून्यान्
१२४	१८	श्रद्धा	श्रद्धा
१२४	३०	दर्शयाति	दर्शयति
१२५	२१	यांह्वि	यांह्वि
१२६	१७	प्रवृत्त	प्रवृत्ता
१२७	९	ह्राषे	ह्रोष

पृ.	पं.	शुद्धम् ।	अशुद्धम् ।
१२८	३	यथार्थ्यं	याथार्थ्यं
१२८	९	रूपे	रूप्ये
१२८	१९	कत्वदि	कत्वादि
१३१	९	मभै	मा भै
१३६	१०	वाण्यात्मा	वाण्यामात्मा
१३३	४	त्प्रक्ष्य	त्प्रेक्ष्य
१३३	२४	नवस्या	नवस्था
१४१	१	प्रक्कात	प्रक्कति
१४१	२६	परिणामतापसंस्कारदुःखैर्गुणवृत्तिविंरोधाच्च दुःखमेव सर्वं विवेकिन इति योगसूत्रपाठो वहुषु पुस्तकेषु दृष्टः ।	
१४५	२५	गार्भि	गार्गि
१४३	१२	शत्मै	शात्मै
१५०	७	साक्षाक्रिया	साक्षात्क्रिया

चतुर्थशतकत्रिंषयानुक्रमणिकाश्लोके

दल्य	दल्प
सन्दूप	सन्दूष
तन्निर्म्	तन्निर्मू

एवमन्यदपि व,ब,योः प,ष,योश्च विषयेऽशुद्धं तथाऽन्यदपि मद्दृष्टिमान्द्यदोषेण स्थितं प्राज्ञैःस्वयं शोधनीयम् ।






अलिविलासिसंलापे

प्रथमशतकविषयानुक्रमणिका।

कामिन्याहार(१)मुक्ताचरण(२)गुरुगुणान् (३) पापिनामप्रबोधं,(४)
तत्सङ्गाद् भूरिकष्टं,(५) तदनुसृतिहठाच्चावमानानुतापौ (६)।
आत्मज्ञं,(७) वृत्तिभेदानिह कलुषधियां,(८) शिष्यसेवोपदेश-
ज्ञानोत्कर्षप्रकारान् (९) शतक इह बुधाः सूक्ष्मदृष्ट्या विदन्तु ॥१॥

(१)	४	श्लोकमारभ्य	२२	श्लोकपर्यन्तम् ।
(२)	२९	,,	३३	,,
(३)	३५	,,	४२	,,
(४)	४३	,,	४९	,,
(५)	५०	,,	५५	,,
(६)	५६			
(७)	५७	,,	६०	,,
(८)	६३	,,	६९	,,
(९)	७२	,,	९८	,,



अलिविलासिसंलापो
नाम
खण्डकाव्यम् ।

विद्या विद्यत एव यत्र सततं, वेद्यो न यो रागिणां,
यं वैद्यं मनसा प्रपद्य विषयव्यालेष्वभीका बुधाः ।
वेदाशेषविचारसीमविलसत्सिद्धान्तभूमिः स मे
विद्रुत्य द्यतु हृद्यवद्यमखिलं श्रीवैद्यनाथः शिवः ॥ १ ॥
वैषयिकब्रह्मविदोः पूर्वोत्तरपक्षशिक्षणे दाक्ष्यम् ।
व्यक्त्या विवेक्तुकामैर्दृश्यो ऽसावलिविलासिसंलापः ॥ २ ॥
[1]कदा चिदासन्नतथे वसन्ते रसालसालाभिमुखोऽप्यलोलः ।
सरोजिनीसौहृदनिःस्पृहोऽलिर्विलासिना सस्मितमेवमूचे ॥ ३ ॥
"[2]सखे ! हिमानीहतिहीनशोभां पुरा चिरं चोरितचित्तवृत्तिम् ।
उपस्थितामोदरसप्रसारां सरोजिनीं सम्प्रति मावमंस्थाः ॥ ४ ॥
[3]अनेकधामाघविशालकुन्दलतापरागस्स्थगितात्मरूपः ।
प्रभातमारभ्य निरस्तमानं मधूनि सम्पाय्य यया ऽऽद्दतोऽसि ॥५॥

विवृतिर्दृश्यतां श्लेषे स्फुटवाक्यार्थवित्तये ।
व्यङ्ग्यं स्वयं विचिन्वन्तु काव्यदर्शनमार्मिकाः ॥ १ ॥

१ अत्रान्योक्तिपरे प्रबन्धे विंशतिश्लोकपर्यन्तं प्रायः पाठक्रमेणैवान्वयनिबन्धनेन सत्स्वपि श्लेषादिष्वलङ्कारेषु प्रसादगुणस्य प्राधान्यम् । अत्र सकारविषयो वृत्त्यनुप्रासः शब्दालङ्कारः ।

२ अत्र हकारचकाररेफसकारविषयः स एवालङ्कारः ।

३ सरोजिन्याः पुरा बहुलं कृतोपकारत्वं प्रपञ्चयति । अनेकधेति । अनेकप्रकारेण माघे विकसितायाः कुन्दलतायाः परागेण रजसा स्थगितमात्मरूपं यस्य तादृशस्त्वमलिः । तस्य नीलत्त्वेऽपि शुक्लेन कुन्द-

सहस्रवस्वागमरम्यरूपा सहासवक्त्रैव रविं प्रतार्य ।
निसर्गलोले त्वयि सादरा या निशामशेषामुपगूह्य रेमे ॥ ६ ॥
वसन्तमारभ्य शरन्निशान्तं त्वदीयसङ्गीतकमात्रलुब्धा ।
मुदा भवन्तं परिरभ्य हृष्टा रसार्पणे या प्रणयं दधाति ॥ ७ ॥
त्वमल्पकालं सुमनोभृतायां प्रम्लानकान्त्यां नवमल्लिकायाम् ।
चिरोपभोगक्षमरम्यरूपां यां प्राप्य चित्ते न विषादमेषि ? ॥ ८ ॥

रजसा शुक्लीकृतत्वादिति भावः । तथा च परनायिकासमागमचिन्ह-युक्तोऽपीति गूढाभिसन्धिः । तादृशोऽपि त्वमपास्तमानं यथा तथाऽप-राधमविगणय्य मधूनि सम्पाय्य यथा सरोजिन्या सर्वं दिनमादृतो ऽसीत्येको ऽर्थः । अनेकानि धामानि रतिस्थानानि यस्येत्यनेकधामा । बहुनायिकासक्त इति भावः । अघैः पापैर्विशाला पापबहुला या कुन्द-लता तस्यां विषये यत्परं महदागः अपराधः तत्समागमरूपः, तेन स्थगितं लज्जया तिरोहितमात्मरूपं येन त्रपासंकुचत्तनुरपि प्रातरारभ्या-स्तमानपर्यन्तं विकसितया यया सरोजिन्या मकरन्दं पाययित्वा तोषितो ऽसि, तथा च सपत्नीसमागमापराधमपि सोढ्वा मानमप्यप्रकाश्य सरोजिन्या समादृतस्य ते तां विहायान्यत्राभिसरणं नोचितमिति भावः।

१ सहस्रकिरणस्य सूर्यस्यागमेनोदयेन रम्यं, विकसितकुसुमतया, रूपं यस्याः । सहस्रसङ्ख्याकानां वसूनां धनानामागमेन प्रापणेन रम-यितुं शक्यं रूपं सौन्दर्यं यस्या बहुमूल्यसभोगमेति द्वितीयोऽर्थः । हासमात्रेण कमलिनीपतिं सूर्यं कृतार्थमानिनं वञ्चयित्वा स्वभावतःस-तृष्णे निसर्गचपले ऽपि त्वयि कृतादरा या सरोजिनी निशि कमले मुकुलिते तदन्तःप्रविष्टं त्वां सर्वां रात्रिमालिङ्ग्यारमत । हासमात्रेण पत्यौ मिथ्यानुरागमभिनीय तावन्मात्रेण विश्वस्ते तस्मिन्नन्यत्र गते त्वया सह सर्वां रात्रिं विजहारेत्यर्थः । २ प्रीतेर्मकरन्दस्य च ।

३ वसन्तमारभ्य शरदन्तं यावत्कमलिनीकृतमुपकारं स्मारयति ।

४ इयं वसन्ते पुष्प्यतीति प्रसिद्धम् । इत्थं च स्तोककालं विक-सितायां तस्यामासक्तो ऽल्पकालेन सौकुमार्यातिशयान् म्लानायां तस्यां तां विहाय समागतः सांप्रतमपि मया नाश्रयीति इति भावः ।

गुणावलीपूर्णतमान्तरङ्गां यामुत्सुकां त्वद्विरहेण नूनम्।
दूरागतः स्तोकरसैकगीतिविनिद्रनेत्रां रमयन्नवोत्सीः॥ ९॥
स्वभावसिद्धातुलदण्डकोशां भवन्तमालिङ्ग्य निशां नयन्ती।
मिलिन्द! मन्ये गजमीलिकाभिर्या राजतो नैव मनाग् बिभेति १०॥
अलं तपत्युत्कटहानिदाघे ऽप्यनारताशुग्नमृणालबाहुः।
त्वया समं या सरसीं विगाह्य व्यात्युक्षिकां निर्वृतये तनोति॥११॥
दिनेशमभ्रान्तनिलीनमूर्तिं दृष्ट्वा ऽपि जालापदुपैष्यतीति।
अचिन्तयन्ती भवदेकसङ्गात् पङ्केऽपि वासं बहु मन्यते स्म!॥१२॥

---

१ गुणाः सौन्दर्यादयो मृणालान्तस्तन्तवश्च।

२ दूरादागतस्त्वमल्परसयैकयैव गीत्या स्वप्राप्तिसङ्केतसूचिकया विनिद्रनेत्रां विकसितकमललोचनाम्। अथ वा दुष्टादयथालक्षणं प्रयुक्ताद्रागाद्धेतोरल्परसयैकया गीत्यैव विकसितां हृष्टामिति भावः। प्रीतौ सत्यां दुष्टमपि बहु मन्यतइति प्रसिद्धेः।

३ सेनाधनसंग्रहौ कमलनालकलिके च।

४ उपेक्षासूचिकाभिर्ज्ञाने सत्यप्यज्ञानाभिनायिकाभिः।

५ नृपतेश्चन्द्राच्च। ६ रात्रौ कमलिन्याः कुसुममीलनं चन्द्ररूपनृपत्युपेक्षानाटनमिति भावः। तत्र हेतुः प्रथमपादेनोक्तः। इत्थं च न केवलं सौन्दर्येण किन्तु बलित्वादपि सा नावमान्येति भावः।

७ वसन्ते तत्कृतमुपकारमुपवर्ण्य ग्रीष्मेऽपि तमाह। उत्कटाया हानेरपकर्षस्य दातर्यघे पापे व्यसने वा। यद्वा उत्क्रान्तः कटादुत्कटस्तत्सम्बुद्धावुत्कटेति भृङ्गविशेषणं पृथक्पदम्। गजे गतमदजले तदीयगण्डस्थलादुड्डीय मकरन्दलोभात्त्वं समागतोऽसि न तु सरोजिन्यां प्रीत्येति भावः। अत्र पक्षे हा निदाघे इति पृथक् पदे। ग्रीष्मे तपति शिथिले मृणाले भृङ्गभारेण भुग्ने कमलकुसुमेन सह भृङ्गस्य जले निपातो जलक्रीडात्वेनोत्प्रेक्ष्यते।

८ वर्षासु तं दर्शयति-सूर्यम्, दिन एव स्वामिनं न तु रात्रौ, तदानीमस्तङ्गतत्वादिति भावः। अभ्राणां मेघानामन्ते निन्हुततनुम्। अथ वा ऽभ्रान्तं निश्चयेन गुप्ततनुम्। स्वैरिण्या अस्याश्चरित्रदिदृक्षयेति

चलस्य ते रागपरीक्षणाय वर्षासु शश्वत्कपटाप्तताङ्गी ।
मालत्युपेते त्वयि या सरोगा ऽप्रशस्यमाना तनिमानमेति ॥१३॥
कलापिकेकाक्षरयुग्मसूच्यं "त्वं केतकीकामुक" इत्यनिष्टम् ।
श्रुत्वेव या जीवितनिर्व्यपेक्षा वर्षासु वापीषु तनुञ्जहाति ॥१४॥
शरद्यशङ्कं भवता विहर्तुं सन्ध्यातमःसंहतिचन्द्रिकासु ।
रक्तोत्पलेन्दीवरपुण्डरीकरूपैरभीसाररसं व्यनक्ति ॥ १५ ॥
हिमर्तुदुःस्पर्शसमीरनीरसम्पर्कभीत्या भवतोज्झिता किम् ? ।
नवेऽपमानेऽप्यधृतातिकष्टा सापत्रपातङ्कमपि प्रसेहे ॥ १६ ॥

भावः । जालं कपटं तज्जनिताऽऽपत् । अथ वा जलसम्बन्धिनी आपत् । पङ्के कर्दमे पापे च । अत्र वर्षारम्भे सूर्यस्य मेघान्तरितत्वे कमलिनी-चरित्रदिदृक्षाहेतुकत्वमुत्प्रेक्ष्यते । पत्यौ स्वचरित्रपरीक्षायै गुप्ते पश्यति तत्कपटकृतामापदं विभाव्यापि त्वय्यनुरागातिशयेन तामविगणयन्ती त्वत्सङ्गत्या पापे ऽपि तत्फले वसतिमङ्गीकुर्वन्ती सा त्वय्यच्छलानुरा-गेति भावः । १ कपटेन व्याजेन, जलरूपेण वर्त्मेण च ।

२ सरसीं गता व्याधियुक्ता च ।

३ अप्रशस्यः अनभिनन्दनीयः मानो यस्याः । अद्भिर्जलैः प्रक-र्षेण शस्यमाना हिंस्यमाना च । अत्र वर्षाजनितजलाधिक्यहेतुककम-लिनीमज्जने भृङ्गप्रीतिपरीक्षाहेतुकत्वमुत्प्रेक्ष्यते ।

४ अत्र जलाधिक्येन मज्जने मुमूर्षाहेतुकत्वमुत्प्रेक्ष्यते ।

५ शरदि तमाह । यथासङ्ख्यमन्वयः । समयानुरूपवेषधारणा-यैव त्रिविधानि तस्याः पुष्पाणि । इत्थं च सर्वदा त्वदभिसरणबद्धपरि-करा सा त्वयि दृढानुरागेति भावः ।

६ हेमन्ते वर्णयति । अभूतपूर्वे ऽपमाने । हेमन्ते शीतभीत्या नायकः कान्तां जहातीत्येवंरूपे । अवधृतं निश्चितमतिकष्टं यया । यो हि हेमन्ते त्यजति स कथं निदाघे न त्यजेदिति धियेति भावः कमप्यवर्ण-नीयं पत्राणां दलानां पातं च्युतिम् । हेमन्ते कमलिन्याः सर्वाणि दलानि च्यवन्त इति प्रसिद्धेः । अथ वा वेपमानेव सकम्पेव । धृतमतिकष्टं यया सा सलज्जा च । 'आतङ्कमपि च प्रसेहे किमिति काकुः ।

असोढभावत्कवियोगदुःखा भवान्तरे त्वामधिगन्तुकामा ।
असावविश्रान्तपतत्तुषारतुषानले देहमहो अहौषीत् ! ॥१७॥
इत्यच्छलाविष्कृतभक्तिभावां प्रतिक्षणं सम्प्रति सम्भृताभाम् ।
सरोजिनीं मुञ्चसि चेन्मदान्ध ! मिलिन्द ! नूनं भृशनिर्घृणोऽसि ॥
अनन्यसाधारणसौकुमार्यसौन्दर्यसौरभ्यसमष्टिभूमिः ।
सरोजिनी कुत्र ? मलीमसान्यपुष्टप्रिया चूतलता च कुत्र ? ॥१९॥
प्रियान् विचेतुं विपिनं गतानां शुचाकुलानां पथिकाङ्गनानाम् ।
दृशोर्विकीर्यातुलधूलिमुष्टीरसौ हि पापानि समुच्चिनोति ॥ २० ॥
सपल्लवान्तान्तवनोपयुक्तामनर्हपुष्पावसराभिसाराम् ।
श्रितां सुसम्पन्नरवंशकुन्तैश्चिरात्ततारुण्यफलामिमां धिक् ! ॥२१॥
वयस्यशीते रुचिरे ऽतियाते प्रकामवृद्धावलिवल्गितानाम् ।
निवासतामात्मनि मन्यमाना कथं न सा सम्प्रति लज्जते स्म !"२२॥

---

१ अत्र शिशिरकालीनकमलिन्यदर्शने मरणत्वमुत्प्रेक्ष्यते ।

२ कोकिलः, अन्येन केन चित्पुष्टोऽसमर्थश्च ।

३ अत्र परागपाते धूलिमुष्टिविकरणत्वमुत्प्रेक्ष्यते ।

४ पल्लवैर्जारैर्युक्तां तवानुपयुक्तामित्येकोऽर्थः । पल्लवैः किसलयैर्युक्तां। तान्ते निदाघेन म्लाने वने च्छायादिना उपयुक्तामित्यपरोऽर्थः ।

५ अयोग्यः रजोदर्शनसमये धर्मशास्त्रनिषिद्धत्वादभिसारो यस्याः।

६ परिपूर्णशब्दं यथा स्यात्तथा शकुन्तैः पक्षिभिः श्रितां। सुसंपन्नैर्महाधनैर्नरवंशेषु मनुष्यकुलेषु कुन्ततुल्यैः क्रूरैः श्रितां वा । तैरैव चिरादात्तमुपभुक्तं तारुण्यफलं यस्यास्ताम् । अथ वा चिराच्चिरकालेन ततं व्याप्तमारुण्यं येषु तादृशानि फलानि यस्यास्ताम् । जारैः क्रूरैश्च युक्ता तैरेवोपभुक्ता तवोपभोगानर्हेयमिति भावः ।

७ हे मित्र, सुन्दरे शीतकाले ऽपगते भ्रमरचापलानामत्यन्तं वृद्धौ सत्यामात्मनि वसतिस्थानत्वं मन्यमानेत्येकोऽर्थः । रुचिरे वयसि तारुण्ये ऽशीतेः संख्याया अतिक्रान्ते तदधिके इत्यर्थः । अत्यन्तं वृद्धा वर्षीसयी । वल्गितानां कम्पानां च वृद्धभावजनितानां निवासतां स्थानत्वमात्मानि जानन्ती । वृद्धत्वं विदुष्यपि कामयमाना कथं न लज्जत इत्यपरोऽर्थः ।

इति स्वकामित्वगुणानुरूपश्लिष्टोक्तिवैचित्र्यचमत्कृतार्थम् ।
विलासिनं वाक्चतुरं विचिन्त्य तं व्यङ्ग्यभङ्ग्यैव जगाद भृङ्गः ॥
"गतौ भ्रमं नापवदन्ति सन्तः किन्त्वीक्ष्यते ते मनसि भ्रमो ऽयम् ।
अतो ऽनुगृह्योपदिशामि यत्तत् त्वया ऽवधानेन चिरं विभाव्यम् ॥
अये विलासिन् ! न हि विद्यते मे रसालसाले ऽभिनिवेशलेशः ।
असक्तचेता जनकाननोद्यत्सर्वागमोत्थं रसमाद्रिये ऽहम् ॥२५॥
निरन्तरं माधवरम्यशोभानवावतारस्तुतिक्लृप्तगीतिः ।
स्ववर्त्मणा विष्णुपदावलम्बी यायावरो ऽरण्यचरो द्विजो ऽहम् ॥२६॥
सुहृद्यगन्धात् सुमनस्समूहात् समस्तदोषज्ञचिरप्रशस्तम् ।
रसं रसायां मधुरञ्जनाय दातुं न दूष्यो मम पक्षपातः ॥ २७ ॥
अन्याविरोधेन सुमेषु सारं श्रमेण सम्पाद्य निमुक्तभोगः ।
गिरौ वहन्निर्वृतये प्रकाश्य भूतोपकृत्यै भुवि पर्यटामि ॥ २८ ॥

---

१ गतिविषये भ्रमणं, मतौ तु भ्रमो निन्दित इत्यर्थः ।

२ जनानां काननेषु उद्यन्तो ये सर्वे ऽगमा वृक्षाः । पलाशी द्रुद्रुमागमा इति कोशः । तदुत्थितं रसं मकरन्दम् । अथ वा जनकस्य विदेहस्याननान्मुखान्निःसरन्तो ये सर्वे आगमा वेदास्तद्बोधितं रसं सारं ब्रह्मरूपम् । ३ नारायणस्य वसन्तस्य च । ४ नारायणचरणं व्योम च ।

५ गमनशीलो ऽनिकेतो मुनिश्च । ६ ब्राह्मणः पक्षी च ।

७ रमणीयगन्धयुक्तात् मित्रे गर्वरहिताच्च । गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोरिति कोशः । ८ पुष्पवृन्दात् पण्डितसङ्घाच्च ।

९ दोषज्ञौ वैद्यविद्वांसाविति कोशः ।

१० रसायां मधुरं रसं जनाय दातुमित्येकोऽर्थः । रसायां भूम्यां रञ्जनाय रोगिप्रीतये मधुरसं दातुमित्यपरोऽर्थः ।

११ पक्षाभ्यां पात एकत्राग्रहश्च । लोकोपकारमात्रफलो न स्वार्थो ऽयमाग्रह इति भावः । १२ पुष्पसारं मधु श्रमेण सम्पाद्य स्वयमभुञ्जानोऽहं गिरौ पर्वते लोकानां निर्वृतये प्रकाश्य प्रकटय्येत्येकोऽर्थः । वाण्या वहन् धारयन् लोकानां निर्वृतये सुखायेत्यपरो ऽर्थः ।

न वाजपेयाद्[1] विरमामि नित्यं न पौण्डरीकादथवा सवाच्च[2] ।
स्वयागमालासततप्रवृत्त्या[3] ध्रुवा हि मत्कर्मसुखोपलब्धिः[4] ॥ २९ ॥
मया किलोच्चावचपार्थिवानाम[5]पीडया भूतदयाप्रधाना ।
स्वप्राणयात्रैकफला मुमुक्षून्व्यापिता माधुकरीह वृत्तिः ॥ ३० ॥
अल्पो ऽपि देहे मम नास्ति रागो[6] न कुत्र चिद्द्वेषम[7]हं वहामि ।
सदैकरूपस्थितिकृत्तमोहं[8] हंसा[9]दृतं पुष्करमाश्रयामि[10] ॥ ३१ ॥
जितेन्द्रियेष्वप्यनुवर्तमानं त्रैगुण्य[11]मेतन्मम पादमूले ।
आलोक्य मां धारितकृष्णरूपं[12] सर्वत्रगं[13] ब्रह्म विनिश्चिनु त्वम् ॥ ३२ ॥
मदीयनीरन्ध्रविचिन्तनेन कीटोऽपि मद्रूपमविन्दतेति ।
ब्रह्मात्मताव्यञ्जननिःसपत्ना लोकप्रसिद्धा हि मम प्रशस्तिः ॥ ३३ ॥
स्त्रीभावसम्भावनया लतासु तरुष्वपि व्यक्तमनोजचेष्टे ।
अलं भवत्यात्मनिरूपणेन विप्रस्तुतं प्रस्तुतमेव वक्ष्ये ॥ ३४ ॥

---

१ तन्नामकाद्यागात् । अजैः पेयात् तुच्छरसाच्च । भ्रमरस्य सर्वगामित्वादिति भावः । २ पौण्डरीकनामकात् सवाद् यागात् । यज्ञः सवोऽध्वरो याग इति कोशः । कमलसम्बन्धिन आसवान्मद्याच्च ।

३ स्वकीयया ऽगमालायां वृक्षश्रेण्यां सन्ततप्रवृत्त्या । स्वस्य यागमालायां क्रतुपरम्परायां निरन्तरप्रवृत्त्या च । ४ मद्व्यापारेषु खस्याकाशस्योपलब्धिः प्राप्तिः सत्कर्मणा सुखानुभूतिश्च ।

५ राज्ञां तरूणां च । ६ प्रीतिः रक्तिमा च । नीलरूपस्यैव सर्वत्र सत्त्वात् । ७ अमर्षं कृत्रिमाकारं च ।

८ एकरूपया स्थित्या कृत्तश्छिन्नो मोहो यस्मिन् कर्मणीति क्रियाविशेषणम् । एकस्मिन् नीलरूपे ऽतिशयेन स्थितिकृत् अहमिति पदद्वयं च । ९ पक्षिणा यतिना च । १० तीर्थं कमलं च ।

११ यतीनामपि पादद्वयवत्त्वात् स्वस्य षट्पदत्वात् त्रैगुण्यम् । इत्थं च बाधितत्रैगुण्योऽहं ज्ञाततत्त्व इति भावः ।

१२ धारितं कृष्णस्वरूपं येन । परं ब्रह्मैव लीलया कृष्णरूपेण प्रादुर्बभूवेति पुराणेषु दर्शनात् । कृष्णवर्णश्च ।

१३ सर्वत्रानुगतं सर्वत्र सञ्चारि च ।

अनेकशाखा[1]प्रचुरप्रचारनिवारितस्वाश्रिततीव्रतापैः[2] ।
स्मरान्धभावाद् भवता रसालो लतात्वमारोप्य न निन्दनीयः ॥३५॥
अकिञ्चनादिक्षितिपान्तलोकसाधारणस्वादुफलोपभोगः ।
परोपकारैकधृतावतारः स्तुत्यो मयोपेत्य हि वस्तुतोऽयम् ॥ ३६ ॥
निदाघकालातिकरालहेलिमयूखमालाकुलितोऽतिवेलम् ।
अन्विष्य हृष्यन्निवसन्नमुष्य च्छायासु विश्राम्यति पान्थसङ्घः ॥
कान्तासु कान्तारपथेन यान्तीष्वत्यन्ततान्तासु वसन्तकाले ।
निशान्तशीघ्राप्तिविधानहेतोः पिष्टातमध्वन्ययमुच्चिनोति ॥ ३८ ॥
फलातिभारेऽपि नतो विनीतोऽवनो[3]पयुक्तैः सहकारराजः ।
त्वया सदामोदै[4]रसप्रदायी तप्यो न गर्ह्यस्त्वथ वारियुक्त्या[5] ॥ ३९ ॥
विरुद्ध[6]दुर्दर्शनगानि हित्वाऽफलानि[7] तुच्छान्य[8]र्थियात्रनानि ।
सुधावधीर्युच्चफलाभिलाषादमुं समन्ताद् भजते द्विजौघैः[9] ॥ ४० ॥
विचित्रवर्णोज्ज्वलपत्र[10]निर्यद्द्रवं स्वकण्ठे सततं निधाय ।
अन्तेवसन्नस्य[11] वनप्रियो[12]ऽयं द्विजो[13] गिरा [14]शेषगिरोऽतिशेते ॥
अत्रापतन्व्या[15] सहितः शुकोऽपि श्रुत्वा मुहुः कोकिल[16]मञ्जुलोक्तीः ।

---

१ वृक्षस्य वेदस्य च । २ आतपजः संसारजश्च ।
३ रक्षणे कानने च । ४ आमोदं सुगन्धं मधु च । हर्षमनुरागं च । ५ जलयोगेन अरीणां युक्त्या विरुद्धभाषणेन च ।
६ विपरीतार्थकदुष्टशास्त्रस्थितानि । पक्षिपूर्णाऽसुन्दरवृक्षयुक्तानि च ।
७ निष्फलानि फलानि च । ८ तुच्छान्यया विवेकवत्या बुद्ध्याऽरण्यानि । तुच्छानि अधिकं यवनसम्बन्धीनीति वा ।
९ पक्षिसार्थः ब्राह्मणसमूहश्च । १० नानारूपभासुरदलनिःसृतं रसम् । नानाविधाक्षरशोभिपुस्तकपत्रनिःसृतं शब्दं च ।
११ शिष्यः समीपवासी च । १२ कोकिलोऽरण्यवासी च ।
१३ पक्षी विप्रश्च । १४ सकलशब्दान् पतञ्जल्युक्तींश्च ।
१५ तन्व्या भार्यया युक्तः शुकः पक्षी आप प्राप । आपतन् आगच्छन् न्यासाय हितः शुकयोगीन्द्रश्च । १६ तस्य वहकस्य ।

तृप्तः प्रखण्ड्यैव फलानि[1] मुञ्चन् प्रक्षीणवन्धो ऽमुमुपाससाद ॥
महाफलं[3] निश्चलभाववरम्यं[4] विहाय मोहात्सहकारवनम् ।
जलाशयान्[5] गूढपथेन यान्त्या ऽनया व्रतत्यागविनिन्द्यया[6] ऽलम् ॥
इयं पुरा घोरनिदाघतप्तं पिपासया ऽव्यक्तरवं कृशं माम् ।
स्वपाणिना वातजवेन[7] तोये निमज्जयन्ती स्वगुणैश्चकर्ष[8] ॥ ४४ ॥
मदोद्धतैरावणहस्तपातैर्वने[9][10] ऽवनीजेव निपीड्यमाना ।
विदश्य विद्राव्य च तं मया ऽसौ त्राता यथाशक्ति जटायुनेव ॥ ४५ ॥
सदारुणोल्लासितपद्मनेत्रा[11] विश्राव्य या सारसनिष्ठुरोक्तीः[12] ।
पदानतं मां कटुकण्टकाग्रैस्तुतोद माद्यद्धृदया ऽदया ऽसौ ॥ ४६ ॥
इयं मुहुर्बाडवजातरूपस्तेयार्जितश्रीकसरोजहस्ता[13] ।
लोभाद् भयाद्वा द्विजराजदृष्टेर्निगूहति[14] स्वं दृढवद्धमुष्टिः[15] ॥ ४७ ॥
निगूढभावान्निशि विप्रसूनां[16] दोषानुषङ्गात्सततं[17] विगीता[18] ।
तपःसहस्यानवलोक्यरूपा[19] मुदं विधत्ते न सरोजिनी मे ॥ ४८ ॥

---

१ परिपक्वानि सांसारिकाणि च । २ पञ्जरे संसारे च ।

३ पृथुफलं विपुलफलदातारं च । ४ निश्चलत्वेन अविच्छिन्नप्रीत्या च । ५ मूर्खान् कासारांश्च । ६ गवि भूम्यां निन्दितया अगैः वृक्षैस्त्यक्तया व्रतत्या लतया । पातिव्रत्यव्रतस्य नियमस्य त्यागेन दूषितया च । ७ वाय्वाधूतेन, वात इव वेगवान् तेन च ।

८ सौगन्ध्यादिभिः रज्जुभिश्च । ९ मत्तशक्रगजशुण्डापातैः गर्वोद्दण्डैर्दशाननकरपातैश्च । १० जले विपिने च ।

११ सूर्येण विकासितं, सदारुणं क्रूरं यथा तथा विस्फारितं च ।

१२ अरसाःनिष्ठुराश्चोक्तीः, सारसस्य पक्षिणः दुःश्रवशब्दांश्च ।

१३ बाडवस्य ब्राह्मणस्य जातरूपं सुवर्णं, बाडवे समुद्रानले जातमरुणरूपं च । १४ ब्राह्मणानां नृपाणां च । चन्द्रस्य च ।

१५ लुब्धा मुकुलितपुष्पा च ।

१६ पुष्परहिता ब्राह्मणानां वधस्थानं च । अत्र पक्षे उत्तरेण समासः । १७ रात्रेर्दूषणस्य च । १८ निन्दिता गीतशून्या च ।

१९ माघपौष्योः तपस्विनश्च ।

निरीक्ष्य पङ्के[1] पतितां[2] सदा[3]हं हा हन्त चक्रेण[4] विनाऽश्यमानाम्[5] ।
गिरोपदिश्यानिशमुद्दिधीर्षुर्विमोह्य[6] मत्यां मधुना न्यबध्ये ॥ ४९ ॥
कष्टा ऽत्र पीडा[7]करपत्रजातनिपातजा मोहवशाद्दशा मे ।
सकोश[8]भूसङ्कटवासदुःखं सोढो मया केसरसूचिवेधः ॥ ५० ॥
निशां कथं चिद् व्यपनीय मुक्त्यै हरिं[9] स्मरन् मौनविनिश्चलाङ्गः ।
सरोषमस्या अवमत्य पत्यां[10] करै[11]र्निशान्ते[12] गलहास्तितो ऽस्मि ॥ ५१ ॥
तथाऽवधूतं[13] च मदेन सार्धं[14] विहाय मार्गं त्रपया निवृत्तम् ।
स्फुटारविन्दद्वयदत्ततालं प्रियंवदं मां सुतरां जहास ॥ ५२ ॥
तथाऽप्यमुष्यां बहुमानवत्यां[15] मत्याहृतो ऽसौ जलजा[16]ऽवलेति ।
उपादिशं यद्धितवेद[17]मस्मन्मनस्ततोऽजायत भूरिदुःखम् ॥ ५३ ॥
मुनीचकासार[18]कुलेऽप्यसूता[19] दिवैव काम्या न ममाभिगम्या ।
असारसंसारसमुत्सुकाऽसौ[20] वहत्यखर्वं निभृतं च दण्डम्[21] ॥ ५४ ॥

---

१ पापे कर्दमे च । २ मग्नां पातित्ययुक्तां च ।
३ ससंतापं, सदा ऽहमिति द्वे पदे वा । ४ शस्त्रेण कोकेन च ।
५ पक्षिणा भुज्यमानां, नाशं प्राप्यमाणां च । ६ बुद्धिपूर्वं मधुना मद्येन विमोह्येत्यन्वयः । मत्यां विमोह्याधीति वा ।
७ पीडाजनकानां दलानां, करपत्राणां क्रकचानामित्यादि पृथक्पदं वा ।
८ कलिकान्तःस्थाने धनस्थाने वा । ९ विष्णुं सूर्यं च ।
१० सूर्येण । ११ किरणैर्हस्तैश्च । १२ रात्र्यपगमे गृहे च ।
१३ तिरस्कृतं यतिं च । १४ मदीयपापेनार्धपथं विहायेत्यन्वयः । मदेन सह तिरस्कृतम् । अत्र पक्षे सार्धमिति त्रपयाऽन्वेति ।
१५ मानिन्यां भृशमादरयुक्तः । बहुमानयुक्तया धियेति वा ।
१६ मूर्खसुता वारिजाता च । १७ "इदमस्मदीयं चित्तं तवे"ति यदवदं तत इत्यन्वयः । हितकरं वेदं श्रुतिमिति वा ।
१८ अत्यन्तं निन्दिते निःसारे कुत्सिते वंशे, अधःस्थितसरःसमूहे च । १९ जाता अप्सु जाता च । २० संसारे उत्कण्ठिता दण्डं वहतीन्वयः । २१ सारसपक्षिशून्यं कमलं नालं च वहतीत्यन्वयश्च ।

तथाऽऽत्तगन्धोऽप्यनिषेव्य रोषं तत्त्वं वदन् मञ्जुलगुञ्जितेन ।
कृपामपात्रे कृतपापमात्रां कर्तव्यदृष्ट्या विफलामकार्षम् ॥ ५५ ॥

इत्थं प्रयस्यापि चिरं मयाऽस्यां कदापि नादृश्यत नित्यबोधः ।
तदाऽऽविरासीन् मनसाऽप्रसह्यो दिने दिने मेऽतुलभानुतापः ॥ ५६ ॥

अथैकमत्याद् गतिगीतकीर्तिः शुचिश्च मुक्ताशनताव्रती च ।
हंसः प्रसङ्गाद् बहुरूपसम्पद्युतो विमुक्त्यै मम शीघ्रमागात् ॥ ५७ ॥

कथं परागाकुलितेन्द्रियेण स मादृशाऽलं मलिनेन दृश्यः ? ।
तथाऽपि सत्येन कृतानुतापं स सर्वसाक्षी वृणुते मिषेण ॥ ५८ ॥

तनुं वहन् ब्रह्मसरस्वतीष्टां दूरे स्थितः काममनोरथानाम् ।
भाग्यैकलभ्यो विमलस्वरूपो दयार्द्रदृष्टिः सहसाऽऽविरासीत् ॥

यदीयसङ्गेन समानसस्यपूर्णस्य तोयेन शरद्दिनस्य ।
प्रकर्षयोगः सरसश्च लोके वेदे तु योगाङ्गमधुव्रतस्य ॥ ६० ॥

तस्मिन् समागच्छति सत्ययत्नात् कृत्स्नाऽपि मृत्स्नाजनता नितान्तम् ।
विस्मृत्य कार्याण्यखिलान्यकस्मादाकाशमार्गार्पितदृष्टिरासीत् ॥

---

१ निश्याविकास आत्मसाक्षात्कारश्च । २ अनुपमशोभायुक्तेति विलासिसम्बोधनम् । अनुतापः पश्चात्तापः महान् सूर्यजनितः सन्तापश्च ।

३ ज्ञाने संचरणे च स्तुतः । ४ शुक्लः पवित्रश्च ।

५ मुक्ताफलभोजित्वं त्यक्ताहारत्वं च । ६ पक्षी यतिश्च ।

७ सम्पदन्तं पृथक्पदं । द्युतः वियतः । प्रचुररूपसम्पत्तियुक्तश्च ।

८ मोक्षाय तथाऽभिनिर्विशत्याजनाय च । ९ परागेण रजसा आकुलितानि पराञ्चि बहिर्मुखान्याकुलितानि च ।

१० आत्मा सर्वदर्शी च । ११ तयोर्वाहनत्वेन पाण्डित्येन च ।

१२ कामजनितसङ्कल्पानाम् । अनसां शकटानां स्यन्दनानां च कामं दूरे स्थित इत्यन्वयः । १३ स्वरूपस्योदयेनार्द्रनेत्रः आनन्दात् । भिन्ने द्वे पदे च । १४ तोयेन हेतुना समानं सर्वत्रैकरूपं यत्सस्यं तेन पूर्णस्य शरद्दिनस्य । स इति पृथक् पदं प्रकर्षविशेषणं वा ।

१५ योगाङ्गान्येव प्रीतिजनकत्वान्मधूनि तत्र निरतस्य गङ्गासम्बन्धिनो भ्रमरस्य च । १६ तं द्रष्टुम् आकाशो ब्रह्म वा ।

आनन्दने नन्दनतो ऽपि तस्मिन् समागते दिव्यहिरण्यपक्षे ।
स्वब्धः क्षणं स्वस्वमनोऽनुरूपं नानाविधं भावमुवाह लोकः ॥
न नाकलोके स्थितिरस्य दृष्टाऽस्वप्ने ऽपि भूम्यां किल न श्रुता ऽपि ।
आयात्ययं विष्णुपदादिहेति कश्चिद्विनिश्चित्य विपश्चिदूचे ॥ ६३ ॥
तिष्ठेत् कथं विष्णुपदे सुखेन शून्ये पुराणश्रुतिनिर्विवादा ।
तद्ब्रह्मलोकस्थितिरित्यथामुं प्रत्यब्रवीत्को ऽपि बुधाभिमानी ॥६४॥
ऐतिह्यमात्रं शरणं प्रविश्य तं मानसादागतमाह कश्चित् ।
काव्येषु विश्वस्य च चित्रकूटगिरिस्थितिं तस्य परो जगाद ॥ ६५ ॥
अन्यो विलासी नलभीमकन्याऽन्योन्यानुरागैकनिदानमेनम् ।
आलोच्य कान्तागुरुमानभङ्गे दौत्योपयुक्तं गणयांबभूव ॥ ६६ ॥
प्रतारितो ऽन्यः शठगोपकान्तापात्रेण तुल्यद्विपयोधरेण ।
तदीयपार्थक्यविधौ क्षमो ऽयं संग्राह्य इत्याग्रहतो ऽभ्यधावत् ॥ ६७ ॥
लुब्धः परः काञ्चनपत्रमात्रे द्यावापृथिव्योः प्रवितत्य जालम् ।
जिघृक्षुरेनं सहसा विदार्य याते ऽत्र मूलक्षतितः शुशोच ॥ ६८ ॥
हा हेतरः स्वोदरपूरणाय धृतामिषं स्वीयकरं प्रसार्य ।
जिघांसुरेनं पटुचञ्चुकोटीविकुट्टिताङ्गो धरणौ पपात ॥ ६९ ॥

---

१ नन्दनारामादपि सुखजनके तत आगते वा ।

२ दृष्टाः अस्वप्नाः सुरा यत्र तस्मिन् नाके । स्वप्ने ऽपि न दृष्टेत्यन्वयो वा । ३ वियतो वैकुण्ठाच्च । ४ सुखेन कथं तिष्ठेदनाधारत्वादिति वियत्पक्षे ऽन्वयः । असुखेन दुःखेन शून्ये विष्णोः पदे इत्यन्यत्र । ५ पर्वते अलङ्कृतश्लिष्टकाव्ये च । तत्र परमानन्दोदयात् ।

६ कान्ताः आलोच्य निर्लज्जतया गुरूणां मानभङ्गे ऽनादरे, नायिकामानापगमे च । ७ एकरूपं पयोद्वयं जलं दुग्धं च । समानाकारस्तनद्वययुतेन कान्तारूपपात्रेण च ।

८ कपटमानायं च । ९ मूलधननाशात् प्रकृतिविलयाच्च ।

१० धृतविलोभनयिभोग्यवस्तुकमिति करविशेषणं, धृतमांसमिति हंसविशेषणं च ।

एवंविधे पण्डितपामराणां कोलाहले सम्भ्रमतः प्रवृत्ते ।
निर्विण्णचेता निभृतं निलीय प्राप विविक्तं परिणामदर्शी ॥ ७० ॥
हंसो महामोहहतान् हसंस्तान् नानाविधाभिर्गतिभिर्निपीड्य ।
उपेत्य मामेष भयाद्रुदन्तं परीक्षमाणः क्षणमात्रमासीत् ॥ ७१ ॥
अत्ता नु मामेष मदीयसत्ता ऽऽयत्ता ऽस्य शङ्काऽद्य न याति चित्तात् ।
मत्तानवं तस्य च शक्तिमत्ता हृत्तापिनी धीर्मम सम्प्रमत्ता ॥ ७२ ॥
किं प्राप्तकालं? किमु मे हितं स्याद्? भवेत्कदैतद्भवभीतिभङ्गः? ।
प्रसादये तावदमुं, परस्तादस्तु स्वमस्ते यदलेखि वस्तु ॥ ७३ ॥
अस्य प्रसादेन विना न मोक्षस्त्रातव्य आत्मा ह्यखिलैरुपायैः ।
इत्थं विचार्य स्वयमग्रयायी तं प्राणमं प्राणमपेक्षमाणः ॥ ७४ ॥
मुहुर्नमन्तं शतशः स्तुवन्तं मामापदन्तं चिरमर्थयन्तम् ।
प्रसन्नया ऽसावनुगृह्य दृष्ट्या विश्वासमापादयति स्म चित्ते ॥
स्थिरप्रसादत्वमवेक्ष्य तस्य शङ्काकलङ्के मनसो ऽपयाते ।
लौल्येन लालाटिकतां विहाय जिज्ञासमाने मयि तस्य तत्त्वम् ॥
त्वं को ऽसि? कं द्रष्टुमिहागतो ऽसि? प्रवर्तितः केन? ददासि कस्मै? ।
कस्माज्जनिस्ते? ऽसि च कस्य गृह्यः? कस्मिंस्त्वदास्थेत्यभिधातुकामे ॥
हृष्यन्नपीर्ष्यन्निव सर्वजीवभावैकवेदी मम चापलेन ।
मनागनादिष्टमहारहस्यपिपृच्छिषोत्थेन बभूव मौनी ॥ ७८ ॥
मूको न्वयं? किं वकवृत्तिरेष? सादृश्यमात्रान्न विशङ्क्यमेतत् ।
आश्वासयत्यत्र मनःप्रसादो मया प्रतीक्ष्यो ऽयमिति व्यचिन्ति ॥
ममाधिकालापकदर्थ्यमानः समाधिकालापगमे स हंसः ।
मुहुर्निषेधन्निव नेति नेतीत्यव्यक्तमेवोपदिदेश पूर्वम् ॥ ८० ॥

---

१ त्वरया पूर्णभ्रमेण च ।
२ सांसारकीभिः । उड्डीनादिभिश्च ।
३ हंसजनितस्य संसारस्य च । ४ अभिप्रायाणां जड-वस्तूनां च । ५ पूज्यः प्रतिपालनीयप्रश्नावसरश्च ।

तन्मूकभावं मनसोऽवधूय प्रदक्षिणीकृत्य पुनः पुनस्तम् ।
तदाभिमुख्यं स्पृहयन् प्रनृत्यन् प्रपञ्चयामि स्म पुरेव वाचम् ॥
वनात्समाहृत्य रसानभीक्ष्णं समर्प्य शक्त्या मयि सेवमाने ।
हृदि प्रसन्नोऽपि स गूढभावो निरुत्तरः क्वाऽपि रयात् प्रतस्थे ॥८२॥
तदीयरूपेक्षणमात्रलुब्धो विहाय गन्धान् विविधान् रसांश्च ।
शनैः शनैरन्वगमं, कथं नु मन्दो गतिं विन्दतु मादृशोऽस्य ? ॥८३॥
अपेक्षमाणं स च मां दयालुर्विलम्बमानो विधिनोपनिन्ये ।
आहूय हुङ्काररवेण मन्दं मन्दाकिनीतीरमुपाजगाम ॥ ८४ ॥
तदीयवीक्षाक्षण एव पक्षान् विधूय सर्वान् सहसोत्थितेषु ।
द्विजेषु पद्मासननिश्चलाङ्गः क्षणं विशश्राम स न.म हंसः ॥ ८५ ॥
प्रत्युद्गमेनैव कृतादरेषु स्वाभ्यस्तनानाविषयोन्मुखेषु ।
तेषु प्रयातेषु स मां निरीक्ष्य तारं स्वरं साधु रहस्युवाच ॥ ८६ ॥
तेनादिमप्रश्नकृतोत्तरोऽहं विचारयन् प्राच्यनकारवाचम् ।
जगन्निषेधात्मविधानतत्त्वमस्याशयं तन्मननादबुध्ये ॥ ८७ ॥
विस्पष्टदृष्टस्य कथं निषेधो ? दृश्यः कथं वा भविता ऽयमात्मा ? ।
अकृत्रिमा वाक् कथमप्रमाणं ? कथं नु याथार्थ्यमिहावधार्यम् ? ॥
इत्यादिदुस्तर्कसमीरवेगैर्विक्षिप्यमाणोऽपि विरुद्धदिक्षु ।
श्रद्धाय तद्धारितवानमुष्य पदद्वयं मूर्ध्नि मुखेऽपि चाहम् ॥८९॥

---

१ उत्तरवाचमदत्त्वैव सर्वाधिकश्च । २ तत्पर्यं द्रुतगमनं च ।
३ समीपं प्रापयामास, सञ्चस्कार च । ४ छदान् पूर्वोत्तरपक्षांश्च ।
५ पक्षिषु विप्रेषु च । ६ कमले स्थितिर्योगाङ्गासनविशेषश्च ।
७ प्रसिद्धौ । नाम्नैव हंसो वस्तुतः परमात्मेति च ।
८ देशा गन्धादयश्च । ९ उच्चैः, प्रणवं च ।
१० कोऽसीत्यस्य प्रणवोच्चारणेनाहमात्मेत्युत्तरम् ।
११ अवशिष्टानां षण्णामपि भेदविषयाणां प्रश्नानां नकार एवोत्तरम् । १२ अस्य हंसस्य पूर्वोक्तद्वय एव तात्पर्यम् । महावाक्यतात्पर्यं च ।
१३ स्वाभाविकी, वेदवाक् च । १४ [illegible] च ।

तत्र प्रसङ्गान्मिलितैः सपक्षैर्जल्पन्ननल्पं शिखिभिः शुकैश्च ।
सिष्णासयाऽऽयातबुधैः स्ववाचा मध्यस्थभावे ऽपि कृतप्रशंसः ॥
विपक्षमातङ्गकबृंहितेषु तद्गण्डमाक्रम्य मदं विलुम्पन् ।
प्राप्तारिराजीजयपत्रयोगान्निर्बाधसम्पन्नमतप्रचारः ॥ ९१ ॥
गुरोरमुष्याथ सुरस्रवन्त्याः स्थित्वा ऽनुकूलं सुचिरं निशम्य ।
श्रौतंप्रमोदावहतद्वचांसि क्रमेण युक्तो [११]ऽस्मि बहुश्रमेण ॥ ९२ ॥
अयत्नतः कल्पतरूपनीते शत[१२]क्रतुप्राप्यफले ऽपि तर्षः ।
यदा न मे ऽभूत् स तदा सहर्षो वभावनाकाङ्क्षितसन्निकर्षः ॥ ९३ ॥
कदा चिदुड्डीय वियत्यकस्माद्विस्मापिताशेषपतत्रिचेताः ।
मां मण्डलाकारगतिच्छलेन दिशश्चरेत्यादिशति स्म हंसः ॥ ९४ ॥
भयं द्वितीयाद्भवतीति युक्त्या व्यङ्क्तुं विविक्तस्थितिमीहमानैः ।
उपास्यमानो ऽपि मया कदा चिच्चक्राङ्गराजः स रयादयासीत् ॥
तस्य प्रसङ्गाद्विषये ऽखिले ऽपि न्यक्कृत्य [१३]भावं कृतकृत्यभावम् ।
प्राप्तो ऽस्मि तृप्तो ऽस्मि तमेव नित्यं स्वच्छन्दचारी हृदये वहामि ॥
नितान्तमृद्वी नवमल्लिका वा सकण्टका सम्प्रति केतकी वा ।
दैवोपपन्ना मम तुल्यरूपा रमे न तस्यां न च तां त्यजामि ॥ ९७ ॥
भिक्षार्थमेवोपसरामि सर्वं गायामि चा[१४]व्यक्तमहं स्ववाचा ।
दिनान्तलब्धागनिशान्तवासी निःसङ्ग्रहो मुक्तदुराग्रहो ऽस्मि ॥

---

१ मित्रैः पक्षधारिभिश्च । २ मयूरैः कर्मठैश्च । ३ कीरैर्योगिभिश्च । ४ निजमुखेन भ्रमरवाणीमाधुर्यगुणेन च । ५ पक्षशून्याः प्रतिवादिनश्च, गजा नीचाश्च । ६ गर्वं मदजलं च । ७ प्राप्तः अरिराजीजयो यैस्तादृशानि पत्राणि पक्षाः । प्राप्तं यत् प्रतिवादिजयसूचकं पत्रम् । ८ इष्टः स्वसिद्धान्तस्य च । ९ तीरे हितमाचरंश्च । १० कर्णसुखकराणि, वेदसम्बन्धीनि सुखकराणि च । ११ श्रमेण युक्तोऽस्मीत्यन्वयः । सम्पन्नज्ञानोऽस्मीत्यर्थः । श्रान्तोऽस्मीति च । १२ इन्द्रलभ्ये यागशतकसाध्ये च । १३ प्रीतिम् । १४ अस्पष्टं ब्रह्म च ।

विलासिना ऽऽलस्यवशेन गेहविलासिना किं भवता व्यलोकि?।
अहन्तया मोहित! याहि दूरं, हा हन्त यामो हितकृद्विविक्तम् ॥
समानकान्ताचरणप्रसादनित्योद्यमो यद्यपि नावभिन्नः।
अयत्नमेकान्तसुखे विभेदप्रथा ऽऽवयोः किं वितथा तथा ऽपि? ॥
न्यस्यन् सभङ्गानि पदानि शङ्के कौटिल्यदोषात् पतितासि पङ्के।
स्वपक्षदाक्ष्येण ममानिरुद्धा सर्वेषु मार्गेषु गतिर्मतिश्च ॥ १०१ ॥
अपत्रपे ऽपात्रविबोधनेन, व्यर्थेन किं कार्यमिहास्त्यनेन ?।
त्वं गच्छ यत्रेच्छसि, वेष एष त्वां वक्त्यहो वैषयिकं विशेषात् ॥
निरन्तरायँत्ववचोऽन्तरायकारी विकारी न मतो ऽधिकारी।
भवान् शमारीन् मदमाननारीमुखानखेदं हृदि यद्दधाति ॥ १०२ ॥
मधुमधुरगभीरभावपूर्णावितथसयुक्तिकनिस्तुलालिसूक्तीः।
इति निशमयता विलासिनाऽन्तः स्तिमितहृदोपलवच्चिराय तस्थे ॥
मधुझरपरिपूरितालवालः कुसुमसमूहतिरोहितप्रवालः।
सकलरवपिकालिचक्रवालो व्यहसदमुं दशया स्वया रसालः! ॥
'किमुपशममुपैष्यति क्रुधं वा मम वचसा ऽय'मिति स्फुटं बुभुत्सुः।
अवसरमदसीयवाचि दित्सुः सशममलिर्निजविस्तराक्ष्यरंसीत् ॥

इत्यलिविलासिसंलापे खण्डकाव्ये
प्रथमं शतकम्।

१ मानवत्याः प्रियायाश्चरणप्रसादे सन्ततोद्योगः। तुल्यरूपे सर्वत्र समे सुन्दरे आचारे प्रसादे च निरन्तरप्रवृत्तिः। २ नियतसुखे विविक्तवाससुखे च। ३ भङ्गश्लेषोचितसुप्तिङन्तानि। सभङ्गानि च। ४ कर्दमे पापे च। ५ छदानां मते च। ६ गगनादिषु दार्शनिकविषयेषु च। ७ स्वाभाविकस्य वैषयिकस्य च।

अलिविलासिसंलापे.

द्वितीयशतकविषयानुक्रमणिका ।

रागद्वेषविहीनबोधसुखतां[1], तस्यात्मनो ऽनन्यतां[2],
तत्सत्तां[3], ऽनुमितिप्रमात्वं[4], मखिलोद्योगेषु तद्धेतुतां[5], ।
तद्बाधे ऽनुपलब्धिहीनबलतां[6], शाब्दप्रमाङ्गीकृतिं[7],-
र्युक्त्यैवेश्वरसिद्धि[8],रत्र गदिता वेदानुसारौचिती[9], ॥

---

(१) ३४ श्लोकमारभ्य ३६ श्लोकपर्यन्तम् ।
(२) ६३ „ ६९ „
(३) २८ „ ३३ „
(४) ४९ „ ५९ „
(५) ६० „ ६२ „
(६) ८२ „ ८७ „
(७) ९५ „ ९९ „
(८) ८८ „ ९४ „
(९) १०२ „ १०४ „



अलिविलासिसंलापे

द्वितीयं शतकम् ।

अथ तथा ऽलिवरेण विगर्हितो ऽप्यविहृतेङ्गित एव विलास्यसौ ।
उपहसन् मनसा सहसाहसं सकलदार्शनिकप्रथमो ऽब्रवीत् ॥१॥
अयि वयस्य! वयस्यतुले नवे नृपवरैरवरैश्च सदा ऽऽदृतान् ।
जडधिया विषयाननया ऽनयात् क नु विहाय विहायसि यास्यसि? ॥
शृणु वचो मम भृङ्ग! सुधोपमं ननु तनुर्विषयानुभवं विना ।
विफलतामयते, न च सा स्थिरा, वितनुते ऽत्र कुधीरवधीरणाम् ॥
स्फुरति कायमृते क नु चेतना? तनुगता ऽनुमता सकलैश्च सा ।
तदितरः कथय क सं चेतनो? दृढतरानुपलब्धिहतो ह्यसौ ॥ ४ ॥
सुखमपि त्यज दुःखसमन्वयादिति वदन्त्यबुधाः परवञ्चकाः ।
कृतिशतेन विना ऽशनमाप्यते क? तदपास्य न को ऽपि हि जीवति ॥
उदरपूर्तिकृते परिधाव्य यस्तदितरत् सुखजातमुपेक्षते ।
अलसतामथ वा मतिमन्दतां स नियतं प्रकटीकुरुते नरः ॥ ६ ॥
निजमतेर्भ्रमता शुचिता ऽथ वा बहुमतैक्यपथेन परीक्ष्यते ।
विविधकायसुखाय विचेष्टते हलधरादिबुधावधि चेतनः ॥ ७ ॥
सकलसम्प्रतिपन्नमदूषिताऽक्षजमबाधितबोधमुपेक्षसे ।
शठमठाधिपकण्ठलुठत्पदेष्वथ च विश्वसिषीति महाद्भुतम्! ॥८॥
अनुपजीव्य न हीन्द्रियजां मतिं किमपि मानमुदेति तदात्मनः ।
जनकमेव विवाधितुमुद्यतं भवति विश्वसनीयमहो कथम्? ॥ ९ ॥
यदि च वैषयिके सकले सुखे किमपि पश्यसि दुःखमवर्जितम् ।
सुखतयैव तदात्मसुखे ऽपि न व्यभिचरे,न्नियमो न विलङ्घ्यते ॥

---

१ चार्वाकः ।

अथ विनाशितया सुखमीप्सितं त्वमवधीरयसी, दमसाम्प्रतम् ।
त्वरितमेव तथा सति भुज्यतां, वपुरिदञ्च यथा न भवेद् वृथा ॥
असुख आत्मनि चेत्त्वमदुःखतां परमवेत्य रतो ऽसि, न तत् क्षमम् ।
असुखतैव निवर्तयतीदृशान्नयविदं, न बुधो यतते मुधा ॥ १२ ॥
अपि च नित्यसुखानुभवाद्भवेदरुचिरेव नृणां श्रममन्तरा ।
ननु सिता मधुरा ऽपि न रोचते कटुरसेन विना ऽनिशमाशिता ॥
अचतुरा अलसा अथ वा स्वयं सुखमुपार्जयितुं धृतमत्सराः ।
सुखिसमाजसमागमसत्रपा रहसि वासमुशन्त्यपटच्चराः ॥ १४ ॥
बहुलदृष्टफला धृतषड्गुणा नयविदुक्तिरिहार्हति मानताम् ।
कथमतीन्द्रियसंशयितेप्सिताऽविदितवक्तृकवाचि तवाऽऽग्रहः ? ॥
परिहरन् किल दुःखमुपायतः सुखमुपास्स्व सखे ! सति सम्भवे ।
इतरथा विषहस्व तदापतन्, नयविदो न भजन्त्यतिभीरुताम् ॥
करितुरङ्गनिरन्तरसङ्करेष्वरिशिरांसि पदेन रुषा ऽर्दयन् ।
अगणयन् रिपुहेतिततिक्षतीर्बहु सुखं भुवि वीरवरो ऽश्नुते ॥१७॥
विविधदेशगतागतसञ्चिताऽगणितभोग्यपदार्थभृतालयः ।
वणिगकिञ्चनबान्धवपालनात् सुखयशःसुकृतान्यधिगच्छति॥१८॥
मदविलोलविलोचनमानिनीमन उपायशतैर्वशयन् युवा ।
सरभसस्मिततत्परिरम्भणाच्छतमखदाधिकं लभते सुखम् ॥१९॥
नयमुपायतया बहु मानयन् फलतया स्मरशास्त्रकृतादरः ।
उपलभस्व सुखं, त्वमतो ऽन्यथा जड ! लुठन्नटवीषु विपत्स्यसे ! ॥
अनृतचौर्यविवादपराङ्गनाऽभिगमनादि दुराचरणं त्यज ।
नृपतिदण्डभयाद्यदि शक्यते निभृतमत्र कृते किमु दूषणम् ? ॥२१॥
नरपतेः परमेश्वरतोचिता स परिपाति हिनस्ति सतो ऽसतः ।
मरणप्यपवर्गपदास्पदं, धनरती भजतः पुरुषार्थताम् ॥ २२ ॥
प्रमितिरक्षभवैव मतिर्मता ऽवनिजलाऽनलवायुषु तत्त्वता ।
नरकनाकजदुःखसुखे ध्रुवं निशितकण्टकसद्मशयालुके ॥ २३ ॥

तनुनिसर्गत एव हि चेतना भवति, किण्वचयें मदशक्तिवत् ।
लयमुपैति निसर्गत एव सा श्रुतिवचस्तु हितो न समादरः ॥२४॥
इति बृहस्पतिभाषितदर्शनाऽनिशविमर्शविभक्तहिताहितः ।
अनुभवामि सुखं, त्वयि सौहृदादुपदिशामि, हृदा तदुपास्यताम् ॥
इति विलासिवचःकशया ऽऽहतो ऽप्यचल एव निमीलितलोचनः ।
अविरमन् स समाधिसुखादलिश्चिरमाशिश्रियदश्रुतिनाटनम् ॥२६॥
अतिगते समये बहुले मनाङ्मनसि बाह्यकथासु सकौतुके ।
अनुजिघृक्षुरमुं बुधमानिनं तदुदितेन पथैव तमब्रवीत् ॥ २७ ॥
अयि विलासिसमाजशिरोमणे! न तनुमात्रमुपाश्रयते चितिः ।
अपि तु सर्वगतैव विभाव्यते, विवदते परमत्र तु बालिशः ॥२८॥
यदि चितिर्न तनोर्बहिरिष्यते, कथय, बाह्यमसंस्पृशती कथम् ।
विषयबृन्दमियं प्रतिभासयेत्? तनुरिहास्ति, शशी तु नभस्तले ॥
विषयसङ्गमृते यदि भासयेत्, सकलमेव कुतो न विभासते? ।
करणसङ्गवियोगभिदा फलं नियमयेदिति धीर्बहिरिष्यताम् ॥३०॥
नयनरश्मिभिरिन्दुसमागमे सति मतिर्भवति स्वतनौ यदि ।
शशिनि तज्जनिरस्तु, तनौ कथं? न खलु हेतुफले पृथगाश्रये ॥
शशिनि धीरजनीत्यखिलो जनो वदति, नापि परेण स बाध्यते ।
भवतु तत्र तनोस्तु निमित्तता, न हि कुलालतनौ कलशीजनिः ॥
चितिरतो ऽखिलवस्तुगता सदा, ऽऽवरणमेव तदग्रहकारणम् ।
तदिह यत्र बलादपसार्यते स्फुरति तत्र चितिर्न तु सा ऽऽवृते ॥
सकलवस्त्वनुभूतिरबाधिता प्रतिघरागविवर्जनशीतला ।
सुचिरयोगहृतावरणा सुखं प्रकटयत्यपदुःखलवं ध्रुवम् ॥ ३४ ॥
अपजिघृक्षमपास्तजिहासमप्युपनतं विधितो य उपेक्षया ।
अनुभवेद्विषयं, स परं सुखं लभत इत्यविवादमुपेयताम् ॥ ३५ ॥
निजगवाक्षगतः पथि गच्छतः सुखिसदुःखजनानवलोकयन् ।
हसति यद्, यदमूँश्च दिदृक्षते, ऽनुभवमात्रसुखाय तदादरः ॥३६॥

अथ यदा सुखिलोकविलोकनात् प्रयतते स तथा भवितुं स्वयम् ।
मुहुरुपात्त्यशतेषु मनस्तनू व्यथयतीति सतामतिरोहितम् ॥ ३७ ॥
क्षुधित इच्छति·भोक्तु,मथाशितो वसन,माप्तपटः सदनं, गृही ।
शशिमुखी,मथ सूनु,मथो धनं, नृपतिता,मवधिस्त्विह दुर्वचः ॥
तनुहितेषु हि तेष्वखिलेषु चेत् प्रयतनीयमुपायगवेषणे ।
क्षपयतः पुरुषायुषमत्र काः सुखलवास्थितिशान्तिसुषुप्तयः ॥३९॥
इदमशक्यमिदं च सुसाधमित्यवधृतौ किमपीह न साधनम् ।
क्रमश एव कुधीर्हि दुराशयाऽनृतविकल्पपयोधिषु पात्यते ॥४०॥
अथ बलात् क्व चिदीप्ससि विश्रमं मनसि वाञ्छति देहसुखेप्सया ।
विरम कार्यशतादव तां यया सुखमवाप्स्यसि नापि च खेत्स्यते ॥
अथ कृतज्ञतया सुखसाधने वपुषि भूरिसुखाय विचेष्टसे ।
सपदि तां सुखितां तुदतो भृशं तव कथं भविता न कृतघ्नता ॥
अयि विचारय सुन्दरमन्दिरान्तरगमञ्चककुञ्चितलोचना ।
निजतनुर्विपिनेषु रणेषु वा नयविदः कथमर्हति यन्त्रणाम् ? ॥४३॥
यदि च भाविसुखोच्चयतृष्णयोपतनमप्यवधूय सुखं लघु ।
व्रजसि दृष्टमुपेक्ष्य परार्थिनस्तव कथं न भवेत्स्वमतच्युतिः ? ॥४४॥
निजकुसूलगधान्यमतीन्द्रियाधिकफलस्पृहया वपतो भुवि ।
प्रकटयत्यधिकं तव मूढतामनुमितिप्रमितित्वनिराकृतिः ॥ ४५ ॥
तदिदमुत्कटसंशयमात्रतो यदि करोषि तदा शममाश्रय ।
फलति तत्र कदा चिदपि क्रिया, शमसुखानुभवो नियतः परम् ॥
अथ शरीरसुखान्मनसः सुखं त्वमधिकं वदसीदमसाम्प्रतम् ।
न हि मनो ऽक्षगणेन समीक्ष्यते, न पदजानुमिती प्रमिती तव ॥
तनुगतावयवं कमपीह चेद्वदसि चित्त,मिदं न हि युज्यते ।
बहुभिरन्वयव्यतिरेकिणी मतिसुखे तनुगावयवैर्यतः ॥ ४८ ॥
अखिलकायगतावयवेषु चेत् सुखमतिस्थिति,रंतदपूजितम् ।
वद तथा सति चेतयते कथं त्रिकल एकतमावयवे भवान् ? ॥४९॥

अथ पृथक्पृथगिच्छसि चेतनान् तनुगतावयवान् सकला,न्न तत् ।
निजनिजेष्टकृते व्रजतो दिशः क इह तान् कलहाद्विनिवर्तयेत् ॥
चिरपरीक्षणतो ऽपि न मुख्यता क चिदिहावयवे सुवचा तनोः ।
शिरसि वक्षसि वा सुखिते ऽपि को विषहते करपादनिपीडनम् ॥
तदवगच्छ शरीरमचेतनं तदनुकूलविरुद्धसमागमात् ।
तदितरः सुखदुःखयुतो भवेत्, स पुरुषो ऽभिमतः स च चेतनः ॥
अपि च लब्धफलान्स्वकृतांश्चमैर्नयाविदस्त्वमवेक्ष्य फलाप्तये ।
प्रयतमानतनुस्तनुषे मुधा ह्यपलपन्ननुमानविमाननाम् ॥ ५३ ॥
न खलु भावि फलं तव गोचरो, न च तथाविधहेतुफलान्वयः ।
अपि तु दृष्टबलेन स कल्प्यते, तदिह नानुमितिः प्रमितिः कथम् ? ॥
इदमिहैव विचार्य,महो सुखे स्वतनुमात्रसमास्थितिकं भवान् ।
भुवि चिरस्थिरकीर्तिकरोद्यमान् सपदि दुःखकरान् कुरुते कुतः ? ॥
विपुलवित्तविनाशमनैःश्रमानिशतनूद्यमदुःखपरम्पराः ।
नयविदामनिवार्यतमा, यशो विशदमत्र चिराय चिचीषताम् ॥
तनुलयानुविनाशिनि चेतने न हि यशोऽनुभवः श्रमकारिणः ।
किमु परस्य सुखैर्गुणकीर्तनैरिति भवेदफलैव यशोऽर्थिता ? ॥५७॥
अथ शरीरलये ऽपि स चेतनः परसुखस्वगुणस्तुतिजां मुदम् ।
समधिगच्छति,दीर्घसुखाय तत्सपदि दुःखमपि प्रसहिष्यते ॥५८॥
तदिदमस्तविवादमुपेयता,मनुमितिः प्रमितिष्वधिकादृता ।
अपि च देहलये ऽपि चितिस्थितिर्न च सुखस्य तनूपरतन्त्रता ॥
इह रहस्यमिदं प्रणयाद् ब्रुवे, फलतयेन्द्रियजा मतिरिष्यते ।
अनुमितिस्तु समस्तजगद्धिताहितविवेकनिदानतया ऽऽदृता ॥६०॥
अनुपलब्धिमतः प्रबला ऽनुमा नियमतः स्वगुणेन विबाधते ।
इतरथा गृहगो विपणौ सुताननुपलभ्य कुतो न हि रोदिति ? ॥
व्यवधितो यदि तत्र न योग्यता,न खलु सा ऽऽत्मनि बाह्यगुणोज्झिते ।
स्फुरति स स्वयमेव सदेति तु क्रमश एव शिशो! कथयिष्यते ॥

तदनुभूतिसुखस्पृहयालवः सुकृतराशिवशात्कति चिद् बुधाः ।
अपि महेन्द्रपदं विपदास्पदं विगणयन्ति, किमत्र महाद्भुतम् ? ॥
तदिदमर्जनरक्षणसंक्षयक्षणजदुःखशतैरविदूषितम् ।
अपरतन्त्रमुपास्यमपास्य कः क्षणिकामिच्छति वैषयिकं सुखम् ? ॥
न च सुखत्वबलेन विनाशिता ऽत्र भवता प्रतिपादयितुं क्षमा ।
ध्रुवमुपाधिरिहास्ति तु जन्यता, न जनिमद्धि चिदात्मसुखं मतम् ॥
अनुभवो हि सुखं रतिरोषयोरजनकं भवतीति पुरोदितम् ।
अभिदया ऽऽत्मनि चित्सुखयोर्न सा कथमपि प्रसरिष्यति जन्यता ॥
अखिलमानबलैरपसारणं क्रियत आवरणस्य, न चिज्जनिः ।
त्वमत एव विदन्निह नित्यतां जहिहि दुःखसमागमभीरुताम् ॥
अपि निसर्गत एव सुखात्मिका करणजन्यतया प्रतिसंहिता ।
विषयदोषविषैः कलुषा चितिः सृजति दुःख,मियं तु न तादृशी ॥
विषयजन्मनि दुःखमवारितं समवधार्य बुधा बलवत्तरम् ।
जहति तत्सुखमिष्टमनास्थयेत्यनुमतं नयविद्भिरिदं मतम् ॥६९॥
न हि विषेण विमिश्रितमोदनं हृदयमोदनमप्यवधीरयन् ।
निपुणसंसदि को ऽपि विगीयते, विषयजं सुखमीदृशमीक्ष्यते ॥
ज्वरयुतः शिशिराम्बु सुखं विदन्नपि भिषग्वचनाद्विनिवर्तते ।
त्यजतु सौख्यकरे ऽपि तथा भवान् कुचरिते दुरुदर्कफले स्पृहाम् ॥
अपलपामि सुखं न हि साम्प्रतं, परिणतिः कटुकेति वदामि चेत् ।
न हि विबाध्यत इन्द्रियजा मतिस्तदुपजीव्यतया न जयस्तव ॥
विमलचित्सुखलाभकृते तनुं श्रममपास्य महान्तमवन्ति ये ।
तदधिकानुपयोगदुरन्तताश्रमविदस्त इमे नयवित्तराः ॥ ७३ ॥
किमु न पश्यसि निर्मलमाधुरीसुभगशीतलवारियुतापगाः ।
प्रतिदिशं सुलभाः परितृप्तये, फलभरानमितानमितांस्तरून् ? ॥
प्रतिपुरं धनिनो निजपोषणोर्वरितमन्नमकिञ्चनराजये ।
ददति, येन विना श्रममाप्यते [illegible] च तत् ॥

न हि विचार उदेत्ययमश्रुतोपनिषदां गुरुवागवमानिनाम् ।
उपरतेष्वखिलेषु कथं भवेदिति न भीस्तत एव विवेकिनाम् ॥
प्रशमिहालिकभूपमतैक्यतः, स्वतनुपालनमात्रमपेक्ष्यते ।
तदितरस्तु जनो निजवासनाऽनुगुणमिच्छति भूरिविधं फलम् ॥
युधि नृपो विजयं मृतिमेव वा, ऽब्धिषु लयं मणिलाभमथो वणिक् ।
रतिमथापि मृतिं किल कामुको लषति, कुत्र मतैक्यमवेक्ष्यते ? ॥
गतविवादमतस्तनुरक्षणं, तदितरत्र कलिर्दुरपन्हवः ।
तदिह सर्वमतैक्यपथाश्रयः शमवता सुलभो न विलासिना ॥७९॥
तनुसुखं शमिनां न च केवलं तनुलये सति चित्सुखसंस्कृतेः ।
अविरतेरनुभूतिसुखं ध्रुवं भवत इत्यफलो न शमादरः ॥ ८० ॥
विवदसे यदि देहलये कथं चितिसुखे तनुमात्रकृते इति ।
स्वपनकालभवानुभवेक्षया विरम, संस्कृतिमात्रभवो हि सः ॥८१॥
भवतु नाम बहिःस्थितवस्तुनो ऽनुभवने स्वतनोरपि हेतुता ।
अनुभवे सकले न हि तावता तनुनिमित्तकता, व्यभिचारतः ॥
अनुसरन्तु पथो विविधान् जडा निजपुराकृतकर्मनियन्त्रिताः ।
क्षतिलवो ऽपि न मे तदविद्यया, किमितरागसि को ऽपि निबध्यते ? ॥
न च पुराकृतकर्म न विद्यते, त्वमधुनैव पुराकृतकर्षणात् ।
जनितमस्सि फलं, वद का त्रपा तव भवान्तरकर्मफलोक्तिषु ? ॥
अनुपलब्धिमृगी प्रपलायते विविधभावमृगाशनतर्जिता ।
इह विवादवने, ऽपि च जन्यता दृढवृकी लघु तां प्रजिघत्सति ॥
चणकमाषविलक्षणता यदि स्वकनिदानविभेदनिबन्धना ।
जगति भूपतिरङ्कविचित्रता न गमयेज्जनकस्य भिदां कथम् ? ॥
इह निसर्गमृषोक्तिसमाधिना शिशुमृगेण न सम्भवि रक्षणम् ।
उपजनान्वयि वस्तु सहेतुकं किमु निसर्गमिमं मनुषे मृषा ? ॥८७॥
त्वमनयैव दिशेह पुराकृतोचितिनिषिद्धविधाऽनुगुणं फलम् ।
नृपकृतं समवेक्ष्य तथेश्वरं प्रणिदधद् हृदि हन्त ! विमोक्ष्यसे ॥

रहसि दुष्कृतमाचरितं परैः स्पशमुखादवधार्य यथा नृपः ।
दिशति दण्ड,मियं परमेश्वरे ऽप्यनुमितिर्निरुपद्रवमिष्यताम् ॥८९॥
अयि स कः ? क्व वसत्यथ कीदृशः ? कियति वा समये स ? इतीरिते ।
स सकलानुभवो, भुवने ऽखिले, सुखतनुश्च, सदे,त्यलमुत्तरम् ॥
नगरशासकसङ्गगता धियो दधाति यत्र हि पुंसि समष्टिताम् ।
नरपतिः स मतो, न हि भूपता ऽविदुषि पुंसि चिरं प्रतितिष्ठति ॥
तदतिसंनिहितं लयवर्जितं सुखतया ऽवधृतं च सुषुप्तिषु ।
निजकुवासनया ऽसदिति क्षयीत्यसुखमित्यतिमूढधियां मतम् ॥
नगरशासकदोषगुणोचितप्रबलदण्डपदोन्नतिशक्तिमान् ।
निगदितो हि पुमान्वसुधाधिपः, प्रमितिशक्तिसमष्टिरतश्च सः ॥
प्रतिनरं यदि सातिशया मतिर्जगति शक्तिरपीत्थमवेक्ष्यते ।
नियमतो ऽवधिरस्त्यनयोः क्व चि,त्तदवधेः सदनं परमेश्वरः ॥९४॥
स्वविषयस्थितलोकहिताहिताऽवगमका नृपतेर्नियमा इव ।
तदुदिताः श्रुतय,स्तदनादरादरत एव हिनस्ति स पाति च ॥९५॥
श्रुतिवचांसि परम्परयाऽऽस्थयोपदिशतः पठतश्च यतात्मनः ।
विगतरागरुषोऽप्यवमत्य कः श्रयति कामुकवाचि वताऽऽदरम् ? ॥
अपहरन्वसु रोगमवारयन् कुभिषगप्यविलङ्घ्यवचास्तव ।
विगतलोभनिवारितसंसृतिश्रमशते ऽपि यवौ किमसूयसि ? ॥९७॥
न हि बृहस्पतिरेत्य तवान्तिके स्वमतमाह, पदैर्न च ते प्रमा ।
अनुमितिं न हृदा बहु मन्यसे, शठ ! खलीकुरुषे धिषणं मृषा ॥
अरुचिरत्र चिराय निवर्तताम् श्रुतिवचोनिचयोदितचित्सुखे ।
अरुचिरात्मनि चेत्, पत वारिधौ, तदतिरिक्तमिदं न हि चित्सुखम् ॥
अयि मुहुर्विदितेन्द्रियविभ्रमो विषयदुर्विषवेगविमूर्छितः ।
निजमतेः परिनिष्ठिततां स्तुवन् स्ववचसैव कथं न विलज्जसे ? ॥
वयममी परमेश्वरकारिते निगडिता भवबन्धनसद्मनि ।
यदि सहेमहि दुःख[illegible] कथम[illegible] मोचयेत् ॥

यदि तु दुर्मतिधिक्कृतशासनाः स्वरुचितो विदधीमहि दुष्कृतम् ।
अधिकमेव लभेमहि दुःखमित्यनुसरन्ति बुधाः श्रुतिचोदनाः ॥
तदवधार्य निजाधिकृतिं धियां सकलभूतहितं विहितं श्रुतौ ।
विदधता शुभकर्म फलार्थिना क्रमश एव पदोन्नतिराप्यते ॥
यदि तु नेच्छति किञ्चन चित्सुखानुभवमात्रकृतार्थतयां नरः ।
अनृणतामधिगन्तुमथेश्वरः क्षपयति त्वरितं भवबन्धनम् ॥१०४॥
अलमिदं मननाय तवाधुना, यदि बुभुत्सितमत्र विचारिते ।
तदनुयुङ्क्ष्व, वदामि परत्र तत् सकलमित्यभिधाय ययावलिः ॥
इत्युक्त्वा विरते प्रयात्यलिवरे तद्वाचमालोचयन्
सन्त्यज्येन्द्रियजप्रमैकशरणं लौकायतं दुर्मतम् ।
युक्त्या तेन जिजल्पिषुः श्रुतिवचस्स्वद्याप्यविश्वस्तधी-
र्बौद्धानां मतमाश्रयन्ननुययावेनं विलासी पुनः ॥ १०६ ॥

इत्यलिविलासिसंलापे खण्डकाव्ये
द्वितीयं शतकम् ।

अलिविलासिसंलापे

तृतीयशतकविषयानुक्रमणिका ।

आतिथ्योचितसत्क्रियाक्रम,(१)इहायत्नागते ऽप्यस्पृहा,
सत्यप्रव्रजितस्य,(२)रम्यविषया,(३)स्तोष्वादरः कामिनाम्(४) ।
दम्भेनापि तदर्जनं शठधियां,(५) विज्ञानवादोस्थिति-(६)
र्युक्त्या तस्य निराक्रिया,(७)ऽत्र शतके सङ्क्षेपतो दर्शिताः ॥१॥

---

(१)	२	श्लोकमारभ्य	४	श्लोकपर्यन्तम् ।
(२)	५	,,	६	,,
(३)	९	,,	१६	,,
(४)	१७	,,	१८	,,
(५)	१९	,,	२०	,,
(६)	२२	,,	५५	,,
(७)	५६	,,	१०५	,,

अलिविलासिसंलापे

तृतीयं शतकम् ।

अथ ततनिजपक्षो[1] ऽसावलिः सावहेलं
क्षतवचसि विलासिन्याक्षि निक्षिप्य किञ्चित् ।
अनिलचलदलाग्रैराहूयन्तं रसालं
मृदुपद[2]गतिगीतिः सादरं स्तुत्यमाप ॥ १ ॥

सविनय इव सो ऽमुं मारुतानम्रमौलिः
पिक[3]मधुरनिनादैः स्वागतेनाभिनन्द्य ।
अभिनवमधुधाराक्लृप्तपाद्यार्घ्यकृत्यः
कुसुममृदुलतल्पं कल्पयामास सद्यः ॥ २ ॥

क्षणमयमपनीयाऽऽयासमध्वानुभूतं
सुरभिमधुरमध्वाऽऽकण्ठपानेन तृप्तः ।
सपदि मधुकरीभिस्तद्रसालाश्रिताभिः
सुचिरमतिथिबुद्ध्या नृत्यगीतैः सिषेवे ॥ ३ ॥

मृदुमलयसमीरानीतचूतप्रसूनो-
दितविशदरजोभिश्चान्दनीं प्राप्य चर्चाम् ।
अपलपितशरीरोऽप्यच्छहीरोपमार्हः
कतिभिरनुममे ऽसौ मञ्जुना गुञ्जितेन ॥ ४ ॥

अनभिरुचितमासीत्तस्य नित्यस्वैरूपा-
ऽऽवृतिकरचलै[6]र्वृत्तं राजसाऽऽगन्तुरूपम् ।
अपि च तदनुमानं स्पष्टदृश्यस्य सर्वै-
रिति स तदवधूयाऽन्यत्र गन्तुं ववाञ्छ ॥ ५ ॥

---

१ विस्तारितस्वमतः । प्रसारिततनूरुहश्च । २ मृदुपदत्वं गतिगीत्योर्द्वयोरप्यन्वेति । ३ कोकिलानां कोकिलवच्च । ४ स्ववर्णस्यात्मस्वरूपस्य च । ५ अनैसर्गिकं परिणामि च । ६ परागजनितं रजोगुणजनितं च ।

सकलकरगरुच्यातिथ्यसत्कारसीमां
विदधदपि रसालस्तं निरोद्धुं न शेके ।
सुलभतनुनिदानादृष्टजाथनभोगैः
क्व चिदपि चिरवासो नेष्यते स्माऽनिकेतैः ॥ ६ ॥

अथ नुतसहकारारब्धनानाप्रकारा-
ऽतिथिसमुचितसाराहारसत्कारभारः ।
भ्रमरसहचरीभिः संभ्रमादभ्रमार्गं
युगपदनुगतो ऽस्मादुत्पपाताऽलिराज्ञात् ॥ ७ ॥

विहरति परितस्तं चूतमुद्भूतगन्धं
स्वनविजितविपञ्चीपञ्चमे तत्र भृङ्गे ।
अभिमतषडभिज्ञोपज्ञविज्ञानवादो
विपिन इह विलासी तं विचिन्वन् विवेश ॥ ८ ॥

युवतिकुलमिवासीत् कार्णिकारोचितश्री-
सुभगमुपवनं यत्सालसंपूर्णशोभम् ।
दधदपि च पलाशान् हृद्यतारुण्ययोगाद्
वहत इह नवोद्यकन्दलीनामभिख्याम् ॥ ९ ॥

मृदुमृदुपवनाप्त्या लुप्तसञ्चारखेदं
घनकुरबनिकुञ्जैः सौरभाल्लङ्घनीयम् ।
धृतमधुरसरागालापमाद्यन्मिलिन्दं
शशिशुचिरुचिमल्लीसास्यरम्यं यदासीत् ॥ १० ॥

---

१ बुद्धोद्भावितः । २ कर्णालङ्कारैः शोभिता । कर्णिकारवृ-क्षाणामुचिता च । ३ सालैर्वृक्षैः, आलस्ययुक्तमपि पूर्णशोभमिति वा ।
४ चञ्चलतृष्णान् किंशुकतरूंश्च । ५ सुन्दरयौवनं सौन्दर्य-रक्तत्वे च । ६ कन्दे लीनां गुप्तामभिनवोदितोद्भिद्विशेषाणां च ।
७ मृदुमृत्तिकस्योद्यानस्य मन्दतरवायोश्च । ८ सौगन्ध्येन हेतुना सूर्यसंबन्धिकान्त्या च । ९ मधुरं सरागं चालापः पीतमक-[illegible] मल्लीलतानां नृत्येन चन्द्रोपमि-

पृथुलकुचतरुण्याह्लादहेतौ वने ऽस्मिन्
लसति चरति मन्दं दक्षिणे गन्धवाहे।
जहसुरथ ववल्गुश्चालिलिङ्गुः प्रमेणुः
प्रणयमिह वहन्त्यश्चापलम्बालवल्ल्यः॥ ११॥
परिमलमणुमप्यास्वाद्य वासन्तिकाया
धृतचिरगुरुमाना अत्र वा सन्ति का याः?।
वञ्चयति हरिणाक्षीरन्यपुष्टोपदेशो
विपिन इह विहर्तुं कस्य नष्टो ऽपदेशः॥ १२॥
विकसितसितसीमाऽतीतमल्लीपरीतं
तदुपवनमवाप्य काऽप्यपश्यन्नलिं तम्।
स्वकरणगतदोषात्तद्दिदृक्षानपेक्षः
क्षुभितमनसिजो ऽयं व्यक्षिपद्दिक्षु चक्षुः॥ १३॥
निशमितमितदूताऽव्यक्तसन्देशमात्र-
त्वरितविरहतान्तस्वान्तकान्ताभियाते।
मदनमदनवीनारम्भहीनाभिमाना-
ऽभिसरणपरदीनालापिमीनाक्ष्युपेते॥ १४॥
चलितललितदोलारूढलोलालकान्ता-
कुलनयनमहेलारब्धहेलाकलापे।
जवनपवनवेगोद्धूतश्वासोजिघृक्षा-
स्खलितयुवतिवीक्षाव्यग्रकामार्तलोके॥ १५॥

तकान्तियुक्ता लीला येषां तादृशान्यास्यानि मुखानि येषां तादृशैर्नरैश्च।

१ पुष्टस्तनीनां तरुणीनां सुखजनके, पृथवः लकुचतरवो यस्मि-न्निति सप्तम्यन्तं वनविशेषणं वा।

२ मन्दं चरति, वाति सति चेति पृथक् पदं वा।

३ चाप इव लम्बा दीर्घा लवलीलताः। चाञ्चल्यं वहन्त्यो बालवता इति वा। ४ व्याजः।

बहुकुसुमचिकीषाव्याजदूरीकृताली-
निचयचतुरराभाऽऽक्रान्तसङ्केतकुञ्जे ।
सुभगतरुणचेतश्चञ्चरीकारविन्दे
वन इह स विलासी कर्तुमैच्छद् विहारम् ॥ १६ ॥

अनुपदमविशङ्कं निष्प्रयासं च लभ्याः
कथमिव रमणीया इन्द्रियार्था मयेति ।
चपलमतिरुपायं चिन्तयन् सो ऽनपायं
तदुचितमथ वेषं बौद्धभिक्षोर्बभार ॥ १७ ॥

हृदि नियतममान्तं रागमासज्य चीरे
वशयितुमृजुबुद्धीन् मुण्डयित्वा शिरः स्वम् ।
दधदजिनमजीनं कुण्डिकामण्डिहस्तो
मुकुलितनयनो ऽयं ध्यानमप्यभ्यनैषीत् ॥ १८ ॥

जयति यतिरसावित्याप्तविश्रम्भभक्ते-
र्जडमनुजसमाजादर्जयन् भोजनीयम् ।
स वसु दुरुपदेशैः सञ्चितं वञ्चितेभ्यो
दृढदृषदि विहारे न्यक्षिपच्छद्मभिक्षुः ॥ १९ ॥

अधिगतबहुभिक्षाचीररक्षामिषात्ता
रचितवितथदीक्षाः साधु भुञ्जन् भुजिष्याः ।
व्रतमिदमिति सर्वान्नीनतां स प्रशंसन्
चिरमरमत नारीसङ्गसङ्गृहृष्टः ॥ २० ॥

स्मरपरवशमेनं विस्मृतस्तोपदेशं
कपटयतिमकस्माद् वीक्ष्य विस्मेरचेताः ।
अलिरथ पथि तथ्ये स्थापयिष्यन् दयालुः
"स्मरसि रसिक ! कच्चिन्मद्वचांसी"त्यपृच्छत् ॥ २१ ॥

---

१ क्रीडां बौद्धमठं च । २ नवम् ।
३ परिचारिकाः । ४ सर्वान्नभोजित्वम् ।

चकितमविचिकित्सं प्रत्यभिज्ञाय सोऽलिं
हृदि समुदितलज्जाऽप्याश्रयन् धृष्टभावम् ।
स्वमतमतनुयुक्त्याभासविन्यासनसारं
बुधविहतविचारं सत्वरं प्रत्युवाच ॥ २२ ॥
भ्रमरहितमिदं नो वेद्मि सर्वं त्वदुक्तं,
भवतु दरुपपादः कायचैतन्यवादः, ।
विमतिरपि ममेष्टा नानुमाने प्रमाणे,
श्रुतिचितिसुखजीवेशांस्तु नित्यान् न मन्ये ॥ २३ ॥
न खलु विषयसत्तासिद्धिरन्यत्र वित्ते,-
रनुमिनु ननु तस्माद् वेद्यवित्त्योरभेदम् ।
तव मम च मते किं द्रव्यसंवित्त्यभिन्ना-
नुभवविषयकुम्भे द्रव्यभेदः प्रसिद्धः ॥ २४ ॥
मितिरुभयविधा ऽसावक्षजा वा ऽनुमा वा
समनुदयविनाशौ विन्दतीत्यस्थिरा सा ।
कथमिव तदभिन्ने वस्तुनि स्यात् स्थिरत्वं ?
क्षणिकमिह वदामस्तेन सर्वं पदार्थम् ॥ २५ ॥
जलधरपटले चेद् दृष्टनष्टस्वरूपे
व्यभिचरति न सत्तैकक्षणोत्पादनाशौ ।
गमयति गतबाधं सा समस्ते प्रपञ्चे,
क्षणिकमिदमितीदृक् बौद्धसिद्धान्तघोषः ॥ २६ ॥
विपणिविततरूप्यं भूषणादिक्रियायां
प्रभवति, न हि तद्वच्छुक्तिरूप्यं समर्थम् ।

---

१ भ्रान्तिशून्यम् । भ्रमरेति संबोधनम् । हितमनुकूलमिति वा ।

२ सहोपलम्भनियमादभेदो नीलतद्धियोरिति बौद्धाः ।

३ प्रत्यक्षम् । ४ "यत्सत्तत् क्षणिकं यथा जलधरः सन्तश्च भावा अमी" इत्यादिन्यायात् ।

अनुमतमत आद्ये सत्त्व,मन्ते ऽप्यसत्त्वं,
तदिह भवति सत्ता ऽर्थक्रियाकारितैव ॥ २७ ॥
यदि गुणिगुणकर्मैकाश्रितां वक्षि सत्तां
प्रसभमभिनिवेशाद् गौतमौलूक्यवाक्षु ।
अयि वद, समवाये सा विशेषे ऽस्ति नो वा ?
मतविहतिरिहाद्ये, ऽन्त्ये तयोः स्यादसत्त्वम् ॥ २८ ॥
यदि वदसि विशेषेष्वाश्रयैक्येन सत्तां,
प्रसरति घटनिष्ठे तदभावे ऽपि सा ते, ।
अलमिह समवायाभाव एतां न रोद्धुं,
कथमिव समवाये सत्त्वमेवं सति स्यात् ? ॥ २९ ॥
अथ तव समवायो ऽसन् विशेषश्च कार्ये
प्रभवति, गुणकर्मद्रव्यसत्ता किमर्था ? ।
सदसदपि च कार्यं चेद् विधत्ते, त्रिसत्त्वे
वद विनिगमकं किं ? वैपरीत्यं कुतो न ? ॥ ३० ॥
यदिह चिरमतीतं वस्तु तन्न क्रियेत,
ऽघटितसकलहेतु स्यान्न भाव्यद्य सद्यः, ।
फलजनिपटु वैलक्षण्यमेकक्षणे यत्,
क्षणिकविषयसत्ता ऽर्थक्रियाकारिता सा ॥ ३१ ॥
क्षणमिममपहायाऽन्यत्र हेतुत्वमिच्छन्
पतति महति जाले, नास्ति यस्माद् विमोक्षः ।

---

१ द्रव्यम् । २ समवायादौ सत्ताऽनङ्गीकारात् । ३ सत्ता-सामानाधिकरण्येन । ४ घटे सत्तासामानाधिकरण्यस्याऽभावे सत्त्वात् । ५ अभावस्य स्वरूपेणैव वृत्तेः । ६ समवायस्य स्वरूपेणैव वृत्तेः । ७ द्रव्यगुणकर्मस्वेव सत्ताङ्गीकारे । ८ अतीतस्य कर्तुमशक्यत्वात् । ९ सामग्र्यामसत्यां कर्तुमशक्यत्वात् ।

परसहकृतिशून्यं किञ्चिदेकं न शक्तं,
सहकृतिरपि कार्या ऽपेक्षते हेतुमन्यम् ।[1] ३२ ॥
इति महदनवस्थादौस्थ्यमुद्धर्तुकामै-
रतिशय इति कुर्वद्रूपतेति क्षणो ऽयम् ।
फलजननसमर्थः कल्प्यते बौद्धवृद्धै-
रुपगत इह नास्ति प्राच्यदोषावतारः ॥ ३३ ॥
अपि च भवदभीष्टा सर्वगा किं नु सत्ता,
स्वविषयसकलस्था वे,ति चाऽऽलोच्यमाने ।
प्रथममतमयुक्तं सर्वसत्त्वप्रसङ्गा,-
च्चरममतनिरासः कार्य आत्माश्रयेण ॥ ३४ ॥
प्रलयसमय एषा नास्ति चेत्तर्ह्यनित्या,
ध्रुवतनुरवकाशं सा तदा ऽऽप्नोतु कुत्र ? ।
निरधिकरणसत्तामाश्रितत्वस्वभावा-
मभिदधदुपहासं लप्स्यसे सत्सभासु ! ॥ ३५ ॥
अनुगतमतिरन्यापोहमात्रोपपन्ना[3]
गमयति न हि सत्तामुक्तदोषैर्निकृत्ताम् ।
सकलविषयधर्मे ऽपोहमात्रे च शून्ये
भवति भवति सर्वं शून्यमित्येष पक्षः ॥ ३६ ॥
अनुभवपथयाताशेषवित्तेः क्षयित्वे
गमयति तदभिन्ने वेद्यजाते ऽस्थिरत्वम् ।
सदपि सुखमभिज्ञैर्दुःखमेवेति भाव्यं
सुखमपि हि विनश्यद् दुःखमेव प्रसूते ॥ ३७ ॥
सुखतदितरधारावाह्यनित्यक्षणौघे-
क्षणजनितविरक्त्या दुर्लभा मे न मुक्तिः ।

---

१ न ह्येकं किंचित् पर्याप्तं स्वकार्ये इति न्यायात् ।
२ सत्तासम्बन्धं विना स्वविषयत्वासिद्धेः । ३ अतद्व्यावृत्तिः ।

तव तु किमपि नित्यं जानतस्तत्र रागे
प्रसरति बत दूरं याति निर्वाणवार्ता ! ॥ ३८ ॥
क चिदपि किल पक्षे दुःखतोक्तौ सपक्ष-
प्रकृतयुगगतैकस्थायिजातेरभावात् ।
क्षणगणगतवैलक्षण्यसिद्ध्योपमाने
ऽनुपनमति सतां स्वं लक्षणं भावनीयम् ॥ ३९ ॥
क्षणिकमथ च शून्यं दुःखमेवं चतुर्धा
विसदृशमिति च स्वं लक्षणं भावनीयम् ।
गलितविषयरूपोपप्लवत्वाद् विशुद्धो-
द्भवति तदनु मुक्तिः शून्यविज्ञानधारा ॥ ४० ॥
इति भगवति बुद्धे शासति स्वोपदेशं
निजमतिविविधत्वात्तस्य शिष्याश्चतुर्धा ।
जगृहुरणुतदुक्तेराशयं, तेन भिन्ना
अपि न हि विवदन्ते प्रोक्तसिद्धान्तसारे ॥ ४१ ॥
सति किल मितिकुड्ये मेयमालिन्ययोगः
कथमपि च कदा चिद् दुर्निवारः, स नेष्टः ।
निपुणमतिभिरस्मात्कारणान्मोक्षमाणै-
र्ध्रुवमभिलषणीया शून्यसाम्राज्यसिद्धिः ॥ ४२ ॥
गगनकुसुमकल्पा वित्तिराकारशून्या,
यदि भवति सुषुप्तौ शून्यरूपैव सा ऽपि, ।
मुनिमतपरतत्त्वं शून्यतामेव तस्मात्
प्रकटयति पुमर्थं माध्यमिकयुक्तिशैली ॥ ४३ ॥
प्रसजति जगदान्ध्यं सर्वशून्यत्ववादे,
भवतु तदिह तत्त्वं स्वप्रकाशा सती चित् ।

---

१ पक्षः ।

२. निराकारज्ञानस्य कदा ऽप्यदर्शनात् ।

स्फुरति विविधरूपा सा स्वयं विभ्रमादौ,
  व्यवहृतिरनया ऽऽस्तां, बाह्यवस्त्ववस्तु शून्यम् ॥ ४४ ॥
अहमिति च सुषुप्तावालयज्ञानधारा
  सृजति खलु विचित्रा जागरस्वप्नवित्तीः, ।
इह नियतमनादिर्वासना हेतु,रस्याः
  क्षय उदयति योगाचारदृष्ट्या विमुक्तिः ॥ ४५ ॥
न हि विषयमपास्य ज्ञानवैचित्र्यसिद्धि,-
  र्न च भवति विचित्रा वासनर्ते ऽनुभूतिम्, ।
अनुभवगतनानाकारनित्यानुमेयं
  वदति सदपि बाह्यं वस्तु सौत्रान्तिकस्तु ॥ ४६ ॥
कथमनुमितिरास्तां क्वाऽप्यमत्वा ऽपरोक्षं ?
  प्रथममुभयसम्बन्धेक्षणैकोद्भवा सा, ।
विषयमनुभवामीत्यत्र सर्वैकमत्यात्
  क्षणिकसदपरोक्षं वस्तु वैभाषिकाणाम् ॥ ४७ ॥
इति गृहकलहे ऽपि स्थैर्ययोधावरोधे
  धृतपरिकरबन्धा यौगपद्येन बौद्धाः ।
अभिदधति मुधेयं भीरुता ऽऽश्रित्य नित्यं
  भवततिभवदुःखाद्भावनैवाऽस्त्रमत्र ॥ ४८ ॥
उपनमति निसर्गादेव दुःखं सुखं वा
  भ्रमति समयचक्रे, दुःखता तत्र चिन्त्या; ।
भवति च तदुपेक्षा तेन, न द्वेषरागा-
  वभिनवसुखदुःखे रागरोषास्पदे हि ॥ ४९ ॥
सुखमिदमिति बुद्धौ तत्र रागो ऽनिवार्यो,
  नवनिपतितदुःखं द्विष्यते नाऽनुवृत्तम् ।

---

१ अनुभवमृते, तं विनेत्यर्थः । २ साहचर्यप्रत्यक्षं विना ऽनुमितेरनुत्पत्तेः । ३ नित्यात्माङ्गीकार एव पारलौकिकभयात् ।

गणयति जनुषाऽन्धो नाऽपि वन्ध्या स्वदुःखं
रिपुगदहृतचक्षुर्नष्टपुत्रासमानम् ॥ ५० ॥

इति कथितपथेनानित्यतातत्त्वसिद्धौ
स्वकृतसुकृतपापोत्पादिते सौख्यदुःखे ।
अनुभवति शरीरी नित्य इत्याग्रहं त्वं
त्यज, भज सुखदुःखे तुल्य, मेने ह्यलङ्घ्ये ॥ ५१ ॥

वयमपि कृतकृत्या भावनामात्रतुल्यी-
कृतसकलपदार्थाः सर्वदोपेक्षमाणाः ।
क्षणवशसुखदुःखे भुञ्ज्महे, पूजयामो
ऽर्जितसुखजनकार्थैर्द्वादशोऽपीन्द्रियाणि[1] ॥ ५२ ॥

फलमपि च परोक्षैर्दैवतैः पूजितैः किं,
फलति सुखमनल्पं स्वेन्द्रियाणां सपर्या ।
चितिरपि तदधीना, तेन चैतन्यमेषां
वहुभिरत उपायैस्तर्पणीयान्यमूनि ॥ ५३ ॥

अलमखिलरहस्यख्यापनेना, ऽन्तरायो
भवति हि सुखभोगे तेन[2], तद्[3] याहि दूरम् ।
अभिलषसि सुखं चेत्सेवमानः सदा ऽस्मान्
वस मठ इह, सौख्यं भोक्ष्यसे, मोक्ष्यसे च ॥ ५४ ॥

इति वदति विलासिन्यस्य शिष्या भुजिष्या
जहृपुरथ विशिष्याऽघोषयन् भृङ्गभृङ्गम्[4] ।
अलिरपि धृतधैर्यः स्थैर्यसिद्ध्या ऽस्यै वार्यो
भ्रम इति सुविचार्याचार्यकार्ये[5] ऽयतिष्ट ॥ ५५ ॥

---

१ बुद्धिमनःसहितानि ज्ञानकर्मेन्द्रियाणि ।
२ तस्मात् तादृशख्यापनात् । ३ पराजयम् ।
४ विलासिनः । ५ भ्रान्तिनिवारणे ।

विरम जड, विलज्ज व्याहतोक्तिप्रपञ्चात्,
पतसि कुमतमार्गे, पातयस्येवमन्यान् ।
स्फुटतरमनुभूयाऽत्रानुमन्यस्य बाधं
कथमपलपसि त्वं मानमेयव्यवस्थाम् ? ॥ ५६ ॥

कथमिव न विभेषि प्रस्फुटाध्यक्षबाधा-
दनुमितिरपि न स्याच्छून्यतैकान्तवादे, ।
अनिपुण ! भण शून्यं शून्यवच्छून्यवत्त्वा-
दिति किमनुमितिः स्याद्धेतुसाध्याश्रयैक्ये ? ॥ ५७ ॥

न समसमयसत्ता[1] वेद्यवित्त्यो, यतो ऽर्थो
ऽर्पयति मितिषु स्वं स्वं, ततः पूर्वभावी[2] ।
जनकफलगपौर्वापर्यमर्यादयैवा-
ऽऽश्रयति जगति सर्वो हेतुतां कार्यतां च ॥ ५८ ॥

गमयति मितिंकादाचित्कता हेतुमन्यं,
क्वचिदपि मनुषे त्वं न क्षणद्वन्द्वयोगम्[3], ।
स्वयमुदयति चित्रा ज्ञप्तिरित्यप्यसारं,
किमिति सति तथात्वे वासनामभ्युपैपि ? ॥ ५९ ॥

भवति किमपि न व्यापारशून्येन कार्यं,
न कलशजनिरिष्टा ऽव्यापृतारण्यदण्डात् ।
क्षणविलयिनि हेतौ व्यापृतिः क्वास्तु ? तस्मात्
क्षणयुगपरिरम्भो वस्तुनो निर्विवादः ॥ ६० ॥

कथमिव भवदिष्टं निःस्वरूपश्च[4] शून्यं
प्रभवति चिति चित्राकारभारार्पणाय ? ।

---

१ तुल्यकालस्थितिः । २ उत्पत्तिक्षणावच्छेदेनैव ज्ञानान्तरोत्पादशालिनी । विषयगतनानाकारवती ।

३ क्षणद्वयसम्बन्धः ।

४ शून्यस्वभावत्वाद् ।

तदपि तव न नित्यं, तेन वाच्यो ऽस्य हेतु-
निंयत,[1]मुपगते ऽस्मिन् दुर्निवारा ऽनवस्था ॥ ६१ ॥
अथ तव यदि शून्यं नित्यमेकं स्वकार्यं
जनयति, बत सर्वं स्यात्सदैवाविशेषात् ।
अपरमपि च तेनापेक्ष्यते चेत्तदेव
प्रभवतु, न तु शून्यं, किञ्च सिद्धान्तहानिः[2] ॥ ६२ ॥
अयि ! विषयसमूहालम्बनैकस्ववित्त्या
सह यदि विषयाणां मूढ ! वाञ्छस्यभेदम् ।
घटपटसुखदुःखाऽभावभावैक्यमद्धा
प्रसजति तदभिन्नाभिन्नतद्भेदबाधात् ॥ ६३ ॥
क्षमत इदमपोहो[3] निःस्वरूपो न भेत्तुं,
यदि तमपि न भावः को ऽपि भिन्द्यात्परस्मात् ।
उपगत इह सो ऽस्तु व्यक्तिवित्त्योर्विभेत्ता,
परिहर बकबन्धायाससाम्यादपोहम्[4] ॥ ६४ ॥
अधिकरणमपास्याऽस्य[5] प्रतिद्वन्द्विनं[6] वा
ऽनुभवति किमभावं लौकिकस्तार्किको वा ? ।
अधिकरणमभावश्चेदलङ्घ्या ऽनवस्था,
झटिति दिगियमूह्या तत्प्रतिद्वन्द्विनो ऽपि ॥ ६५ ॥
अधिकरणविरोधिज्ञप्तिनैयत्यशून्यै-
र्प्रमितिविषयभावाङ्गीकृतौ नैष दोषः ।

---

१ उपगतस्य हेतोरप्यनित्यतया हेत्वन्तरापेक्षणरूपा ।

२ अपेक्ष्यमाणे ऽपरस्मिन्ननभिमतस्य शून्यत्वाभावस्य प्रसक्तेरिति भावः । ३ अतद्व्यावृत्तिः, तद्भेदाभाव इति यावत् ।

४ बकपक्षजिघृक्षोः स्वदर्शनाभिया पलायमाने तत्र तद्दर्शनप्रतिबन्धाय तन्मूर्ध्नि नवनीतनिवेशः ।

५ अभावस्य । ६ प्रतियोगिनम् ।

न हि गतिरपरा ते ऽपास्य भावं स्वतन्त्रं,
स्थितिमतिकृतिषु त्वं सूक्ष्मदृष्ट्या ऽवधेहि ॥ ६६ ॥
घट इह भुवि नास्तीत्येव बुद्धिः प्रसिद्धा
सकलमतविरुद्धा नास्तितामात्रबुद्धिः ।
सृजति फलमभावः केवलो नेत्यवोचं,
मतविमतिषु शेषे भाव एवैष भारः ॥ ६७ ॥
स्फुरति जगदवश्यं, नाऽत्र सर्वस्य बाधः,
सकलमपि न सत्यं, तत्त्वमत्रास्तु किं नु? ।
इति महति विमर्शे बाधसत्यत्वशङ्का
निरधिकरणबाधाऽदर्शनेनाऽपनेया ॥ ६८ ॥
तदधिकरणबाधे ऽप्याग्रहादुच्यमाने
तदधिकरणपृच्छास्रोतसा प्रेर्यमाणः ।
पतति भृशमलङ्घ्ये को ऽनवस्थासमुद्रे,
ऽधिकरणमिति सत्यं सङ्गिरन्ते श्रुतिज्ञाः ॥ ६९ ॥
तदधिकरणमेकं सर्वसत्तानिदानं
स्फुरति विविधरूपैः स्वस्वहेतुप्रसङ्गे ।
सकलविषयबाधाऽऽधारतानित्यसिद्धं
श्रुतिशिखरविचारैश्चिन्त्यते मोक्षमाणैः ॥ ७० ॥
भवदभिमतशून्यं चेत्परेणाऽनिरूप्यं
सदथ भवति नित्यं, ब्रह्म त,न्नाम्नि भेदः ।
न तु बहु मनुषे त्वं नित्यतां क्वापि, तस्मा-
द्भ्रमसि बहुविकल्पैपृच्छ्यसे नास्तिकश्च ॥ ७१ ॥
भवदभिमतशून्ये भावता नेष्यते चेत्
स्फुरति विषयवित्त्योःसा, वदेयं कुतस्त्या? ।
अनुसरति हि कार्यं ऽप्युपादानधर्मो,
न कथमपरथोपादानकार्यत्वहानिः? ॥ ७२ ॥

---

१ अनुयोगिप्रतियोग्यविषयिका सत्यभावविषयिका । २ पृथक् पदम् ।

अपि च विमृश शून्ये भावतायां निवृत्तौ
प्रसजति नियतं तद्व्याप्यनैल्याद्यभावः ।
अनुपतति न कार्ये शून्यता, हेतुधर्मे
ऽसति तव भवतूपादेयता केन कार्ये ? ॥ ७३ ॥
त्रिविधसमयबाधागोचरं सर्वबाधा-
श्रयमनुभवसिद्धं साक्षिणं प्रद्विषन् कः ।
जयति बुधविवादे ? तज्जयं को ऽभिनन्दे-
द्वदतु स तु यथेच्छं शून्यतां युक्तिशून्याम् ॥ ७४ ॥
इति निगदितयुक्त्या हेतुता भाव एव
स्थिर उपगमनीया व्याप्तेः सम्भवेन ।
न तु जननविनाशव्याधिनित्याभिभूत-
क्षणगणचलवृत्तिष्वेष भारो ऽर्पणीयः ॥ ७५ ॥
मणिकघटशरावोदञ्चनाद्यैर्विचित्रै-
र्मृदिव विविधरूपैर्भासतामेष भावः ।
निजनिजसहकारिप्राप्तसाहाय्यसज्जः
किमिह वद विचित्रं ? सर्वदा दृष्टमेतत् ॥ ७६ ॥
कलशजनिषु मृत्स्ना दण्डचक्राम्बुसूत्रा-
द्युपकरणसमष्टिं दीर्घकालानुवृत्त्या ।
लभत इति समक्षं वीक्ष्य को ऽपक्षपाती
क्षणिकचिति विवक्षेज्जाग्रदाकारभारम् ? ॥ ७७ ॥
निगदित उपमाने चेतनत्वात्कुलालो
घटयति बहुदेशानेकदेशे मृदादीन् ।
शिखरिजलधिहेतून् को ऽन्य एकत्र कुर्या-
दघटितघटनायां यः पटीयान्स ईशः ॥ ७८ ॥

---

१ क्षणिकविज्ञानेषु ।

अनुभवति पुरस्ताद्वस्तु कश्चोपकारं
स्मरति तदनु संस्कारोद्भवा,त्तं चिकीर्षन् ।
प्रयतत उपलभ्याऽऽप्नोति शर्मानुपूर्व्या-
दियति महति काले चेतनः स्थास्नुरेकः ॥ ७९ ॥

सनियममनुभूतिस्मृत्यपेक्षाकृतीष्ट-
क्रममधिकरणैक्ये वीक्ष्य को मुक्तलज्जः ।
क्षणिकमथ च शून्यं मूढ ! विज्ञानमिच्छेत्
फलजनिषु नियोक्तुं ? त्वं समीक्षस्व तावत् ॥ ८० ॥

क्षणमुदयति यावद्बौद्धविज्ञानचन्द्रः
कवलयति हि तावद्राहुवत्तं क्षणोऽयः ।
जनयतु विषयं, तं संयुनक्तु, व्यनक्तु,
स्वयमपि च विभाति,त्यस्थिरेऽस्मिन् न शक्यम् ॥८१॥

करगतमपहाय प्रत्यभिज्ञोपपन्न
लघुतरमपबाधं चोचितं चेतनैक्यम् ।
प्रकटयसि मृषोक्तं निर्वहे,दित्यगत्या
गुरुमनुभवबाह्यां वासनां कल्पयंस्त्वम् ॥ ८२ ॥

क्वचन विषयबाधं वीक्ष्य रूप्यभ्रमादा,-
वनुभवितरि बाधं यो वदेदात्मचोरः ।
असदपि किल तस्योत्प्रेक्षमाणस्य सोऽयं
विबुधजनविगीतो भिक्षुपादप्रसारः ॥ ८३ ॥

न भवति घटसत्ता मृद्विनाशे कदा चित्,
प्रकृतिजनकसत्ताऽपेक्षिणी कार्यसत्ता ।
प्रकृतिविकृतिविज्ञानैककालत्वविद्विद्
नियममिममकस्माद्बाधते, तन्न युक्तम् ॥ ८४ ॥

---

१ अन्यथाऽनुभवसिद्धस्य कार्यकारणयोरैकाधिकरण्यस्याऽनुपपत्तिः ।

श्रयति मृदुदकाप्त्या पिण्डतां, कुम्भकार-
प्रथमचरमकृत्योः स्यात् कपालं घटश्च ।
वहति च दृढदण्डाघाततो मृत्स्वरूपं
न पुनरिह सुदर्शो ऽभावलेशो ऽपि कश्चित् ॥ ८५ ॥
दृषदि चतुरशिल्पोत्कीर्णसिंहादिरूपं
सदपि तदधिकाश्मोत्सारणाद्भाति यद्वत् ।
सदपि सकलरूपं ब्रह्मणि स्वप्रकाशा-
वृत्तिकरपररूपोत्सारणाद्भाति तद्वत् ॥ ८६ ॥
पतति जलधितोये नाविकस्य प्रमादात्
किमु वदसि विनाशं वा ऽऽवृत्तिं वा घटादौ ।
पुनरपि न विनष्टो दृश्यते, दृश्यते ऽसौ,
व्यवधिरत उपेयः, सा ऽस्तु सर्वत्र रीतिः ॥ ८७ ॥
अथ यदि सति कुम्भे दृश्यमाने ऽपि तत्त-
द्व्यवहितबहुरूपोद्भावनैकाग्रहेण ।
निगदसि तदभावं, तान्यनन्तानि, तस्माद्
घट इति लघु वाच्ये स्यादभावोक्तिभारः ॥ ८८ ॥
इति निगदितरीत्या भावसङ्घातसाध्ये
सुवच उचितभावप्रोद्भवे[1] सर्वदैव ।
अधिकरणविरोधिज्ञप्त्यधीनप्रकाशौ
क्वचिदपि मम नेष्टौ प्रागभावप्रणाशौ ॥ ८९ ॥
सुकृतदुरितकर्ता सौख्यदुःखोपभोक्ते-
त्यनुमत उपपत्त्या चेतनस्थैर्यवादः ।
क्षणिकमतकुमार्गे कर्तृभोक्त्रोर्विभेदे
प्रसजति कृतहानिश्चाकृताभ्यागमश्च ॥ ९० ॥

---

१ आविर्भावे, उपलक्षणं चैतत्तिरोभावस्यापीति भावः ।
२ प्रतियोगि— ।

इह पुनरपि सूक्ष्मं चिन्त्यमाने समष्टिः
स्थिरतरचितिभावे पर्यवस्यत्यवश्यम् ।
असति किमु कुलाले दण्डचक्रादि कुम्भं
घटयति ? तदुपेया चेतने सा स्वतन्त्रे ॥ ९१ ॥
श्रितपरिमितदेशश्चेतनो भिन्नदेश-
स्थितबहुविधरूपोद्भावने न क्षमेत ।
इति विपुलधरित्रीस्वर्णपातालसिद्धौ
ध्रुवमुपगमनीयो व्यापको भाव एषः ॥ ९२ ॥
ध्रुवतनुरथ चैकः सर्वभावानुगामी
भवति परमसत्तात्मकश्चेतनोऽयम् ।
पुनरयमनुगम्यव्यक्तिवैचित्र्ययोगा-
द्वहति जडघटत्वेशत्वजीवत्वसंज्ञाः ॥ ९३ ॥
स्फुरति ननु कदा चिद्व्यञ्जकानां समष्ट्या,
शकलपटुसमष्ट्या ऽऽच्छाद्यते वा घटत्वम् ।
स्फुरति समनुगच्छत्येवमेषा सदेति
प्रथयति निजरूपं भावता ब्रह्मतत्त्वम् ॥ ९४ ॥
सहकृतिपटवोऽस्मिन्सन्तु भावाः सहस्रं,
ध्रुवमुपगमनीया ऽनादिता तेष्वगत्या ।
न तु कथमपि नित्या, स्तावतैवोपपत्त्या,
फलजनकसमष्टेर्वादिशेषे च बाधात् ॥ ९५ ॥
घटपटमुखकार्ये का ऽपि नूनं समष्टिः
प्रकटयति फलं, न त्वत्र पर्याप्तमेकम् ।
क्रमिकसकलभावोद्भावनैकस्वभावा
जयति तु पुनरेका ब्रह्मरूपा समष्टिः ॥ ९६ ॥

---

१ अचेतनप्रवृत्तौ चेतनप्रयोज्यत्वस्यैव दर्शनात् ।
२ त्रिकालेऽप्यबाध्यत्वं परमत्वम् ।
३ त्रिकालाबाध्यत्वात्मकम् ।

क्षण इति परसत्ता ऽर्थक्रियाकारितेत्य-
प्यभिलप निजरुच्या तां स्वसङ्केतभेदात् ।
स्थिरचितिसुखसारा भावरूपा समष्टिः
कथमपि भवता चेत्स्वीकृता, सिद्धमिष्टम् ॥ ९७ ॥

नयनरसननासात्वक्श्रुतिज्ञातपूर्वं
स्मरति, पृथगमीषां चेतना तेन नेष्टा ।
न च समुदयधर्मः सै,कनाशे ऽपि सत्त्वात्,
स्थिरतदितरभावश्चेतनो यः स आत्मा ॥ ९८ ॥

मनसि चपलवृत्तिग्रामभूपत्वमास्तां
भवतु च तदधीनो मोहभुङ्क्त्यधिकारः ।
अणु वहतु कथं तन्नश्वरं सक्रियत्वात्
सकलतनुगभोगस्वप्रकाशाधिपत्यम् [1] ॥ ९९ ॥

स्मृतिफलबलकल्प्यो वासनौघः सुषुप्ता-
वतिचलजडजाग्रद्वृत्तिसञ्जातजन्मा ।
फलजनितविनाशः स्वप्रकाशाधिराज्ये
कलुषदृगनुरोधान्नाभिषेच्यो ऽप्रमत्तैः ॥ १०० ॥

स्थिरचितिसुखसत्तास्वर्णदीसूर्यकन्या-
कमलभवनजायाम्योन्ययोगप्रयागे ।
सपदि निजमनस्त्वं मज्जयन्नात्मतीर्थे
ऽनुभव सततसिद्धां मोक्षसाम्राज्यलक्ष्मीम् [2] ॥ १०१ ॥

अथ दुरभिनिवेशाच्छून्यमाध्यास्यसि त्वं
स्वरुचिजनितमिथ्यादृष्टिसंस्कारदार्ढ्यात् ।
अविशयमवशो [3] ऽन्ते लप्स्यसे शून्यभावं,
तदुपरम,सचेता आत्मनाशं क इच्छेत् [4] ॥ १०२ ॥

---

१ अस्माकमिति शेषः । २ अन्यत्रापि, त्रिवेणीतीर्थे मज्जितात्मानः साम्राज्यमाप्नुवन्तीत्यागमिकाः । ३ निःसन्देहम् । ४ अपुरुषार्थपरत्वेनेति भावः ।

यदि च चपलनानाभावनादीर्घशाखा-
प्लवननिरतचेताः कीशतां स्वीकरोषि ।
क्षणगलदवलम्बः प्रस्खलन्नन्तराले
निरयसुहृदि शून्ये त्वं पतिष्यस्यवश्यम् ॥ १०३ ॥
अभिदधदपि दुःखं धात्रसीष्टान्यवाप्तुं,
प्रतिपदमनुमानं वक्षि सामान्यमुज्झन् ।
क्षणिकमथ च शून्यं त्वं ब्रवीषि प्रपञ्चं,
द्रढयसि च विहारं, चेष्टितं ते विचित्रम् ! ॥ १०४ ॥
अपि च न सुलभस्ते द्वादशस्वेन्द्रियार्चो-
चितिविषयसमीहासंगतस्याऽवकाशः ।
तदनुसर विविक्तं भावनां कामपीच्छन्,
विविदिषितमहं ते तत्र वक्ष्ये क्रमेण ॥ १०५ ॥
मम मत,मयमात्मा ऽन्योन्यतादात्म्यभाजां
ध्रुवचितिसुखसत्ताव्यापितानां समष्टिः ।
स्फुरति सतत,मेतच्छादकानाद्यविद्या-
युतविषयसमष्ट्युत्सारणादेव मुक्तिः ॥ १०६ ॥
इति कथितमिदानीं वत्स ! सिद्धान्तमात्रं
श्रुतिमतमविचार्यं लौल्यहीनो जुषस्व ।
कृतगुरुवरिवस्यो वत्स्यसीहोपपत्तिं,
न तु तदवसरोऽस्मिन्बौद्धभङ्गाधिकारे ॥ १०७ ॥
अलिरिति विशदोक्त्या साधु धिक्कृत्य बौद्धं
चिरमरमत मौनी निर्विकल्पे समाधौ ।
विवसनमनयुक्त्या तं जिगीषन् विलासी
पुनरपि तमवोचत् त्यक्तविज्ञानवादः ॥ १०८ ॥

इत्यलिविलासिसंलापे तृतीयं शतकम् ।

१ वानरताम् । २ कारणेन सह कार्यस्य बाधात् । ३ दिगम्बरार्हतरीत्या ।

अलिविलासिसंलापे

चतुर्थशतकविषयानुक्रमणिका ।

दुर्मित्रोदितवादिभेदनविधो-(१)त्साहस्तदाकर्णना-
दल्प-(२)ज्ञस्य कुहेतुभिः श्रुतिवचःसन्दूषणाड-(३)म्बरः ।
स्याद्वादोत्थि-(४)ति रीश्वरे ऽप्यव-(५)मति जीवेतनूमा-(६)त्रता
तन्निर्मूल-(७)नमत्र चानुशयिनो,(८)रूपं शते दृश्यताम् ॥ १ ॥

(१)	२	श्लोकमारभ्य	११	श्लोकपर्यन्तम् ।
(२)	१२	,,	१३	,,
(३)	१४	,,	२४	,,
(४)	२५	,,	२७	,,
(५)	२८	,,	२९	,,
(६)	३०	,,	३३	,,
(७)	३६	,,	९६	,,
(८)	९७	,,	१०१	,,

अलिविलासिसंलापे.

चतुर्थं शतकम् ।

इत्थं निगद्य विरते वचनाद्यदाऽलौ
भङ्गप्रसङ्गमनुचिन्त्य विषण्णचेताः ।
स्वीयं विहारमपहाय विविक्तमीप्सन्
तत्र स्थितेन सुहृदा जगदे विलासी ॥ १ ॥
किं मित्र बिभ्यसि पत्रिदुरुक्तिमात्रा,
दामन्त्रयात्र तमथार्चय चातिमात्रम् ।
सत्रायते न खलु कोऽपि तथाऽनुनीतः
स त्रायते गुरुभयादपि मुक्तशङ्कः ॥ २ ॥
यत्नात्त्वदर्पितवधूजनभुक्तमुक्त-
माध्वीकलेशमपि पास्यति, दास्यमेषः ।
नूनं प्रयास्यति निरस्य बुधाभिमानं
तद्दीयतामतिथये मधुपानपात्रम् ॥ ३ ॥
यद्येष वन्यसुमनोमकरन्दबिन्दु-
सन्दोहतुन्दिलतया मधु नाभिनन्देत् ।
उद्यानभूप्रदनवद्यसुगन्धिपुष्पै-
रामोद्यतां,मयमनेन पथा विनोद्यः ॥ ४ ॥
सङ्गीतलोलुपतया ऽयमवाप्य भृङ्गी-
मङ्गीकरिष्यति कदाचन सङ्गतं नः ।
रङ्गे नटीव तदियं मधुपाङ्गनैनं
गानेन रञ्जयतु मञ्जुलगुञ्जितेन ॥ ५ ॥

---

१ पापं चिकीर्षति ।

कान्तारसन्ततगतागतयातनाभि-
र्यद्वैष वाक्कलहसाहसकण्ठशोषैः ।
श्रान्तो नितान्तमवसीदति हन्त, तेन
सन्तर्प्यतां शिशिरमारुततालवृन्तैः ॥ ६ ॥

अङ्गुष्ठमात्रतनुरम्बुजकोशबन्ध-
खिन्नो विशालनिलयार्थमिहोपयातः ।
वश्यो भवेदयमवश्यमभीष्टलाभा,-
त्तत्स्थाप्यतां सपदि राजतपञ्जरे ऽस्मिन् ॥ ७ ॥

तिर्यग्वचांसि न भवन्ति हि बुद्धिपूर्वं,
किञ्चिद् घुणाक्षरनयेन मृषा ऽमुनोक्तम् ।
का तेन हानिरधुना सममानि तस्मा-
त्स्वच्छन्दतो वदतु यात्ववतिष्ठतां वा ॥ ८ ॥

अस्मद्विवक्षितविकल्पचयैकदेशो-
पन्याससौहृदलघूकृतकार्यभारः ।
शेषोक्तिपूरणकृता परिबृंहणीयो,
भृङ्गो ऽयमत्रभवता न तु दूषणीयः ॥ ९ ॥

आहूय वा सबहुमानमहंयुमेनं
वादाहवे सह मया सुहृदा सहासम् ।
उक्त्वा विकल्पशतमल्पमतिं जय त्व-
मस्मान् जयेत्कथमयं हि सहायहीनः ॥ १० ॥

न त्वेष निष्ठुरगिरा परिभर्त्सनीय,-
स्ताड्यो ऽथ वा कुटिलदण्डकशाग्रहस्तैः ।
क्रुद्धो विदङ्क्ष्यति खलो ऽय,मनिष्टमेत,-
र्द्दहद्विगर्हिततरा ऽपि च भूतहिंसा ॥ ११ ॥

---

१ अर्हन् जिनः ।

आकर्ण्य कर्णसुभगं सुहृदुक्तमेत-
दाप्यायितः पुनरलिं विजिगीषमाणः १
नायं तदा द्रुतपदं प्रचलन् वदंश्च
कौपीनमप्यगणयद्गलितं विलासी ॥ १२ ॥
मन्दाक्षरोचितशिरोनतिसभ्यसङ्घ-
मन्दाक्षरोचितनिषेधगिरो ऽवधीर्य ।
उच्चैर्विहस्य सुहृदा सह साग्रहस्तं
प्रोचे प्रसार्य गगने सहसा ऽग्रहस्तम् ॥ १३ ॥
नेयं मतिस्तव विशुद्धिमती वयस्य
ब्रह्माप्रसिद्धमपि सत्यमतीव यस्य ।
दृश्यं स्वसत्यमिति दर्शनमुच्यमानं
संसत्सु सिद्ध्यति न साधनमुच्यमानम् ॥ १४ ॥
विश्वासहेतुनिजवक्तृगुणानपेक्षे
विश्वासहे तु मम नास्ति रुचिर्हि वेदे ।
निर्दोषजीववधसाधनयज्ञचेष्टा
नास्मादृशां हृदि कदापि नयज्ञ चेष्टा ॥ १५ ॥
यः सर्वभूतहितमुज्झितपक्षपात-
मन्योन्यबाधविधुरं पुनरुक्तिमुक्तम् ।

१ मन्दाक्षेण लज्जया रोचिता शिरोनतिर्यैस्तादृशानां सभ्यानां संघस्य मन्दाक्षराःशनैरुक्ता उचिताश्च या निषेधगिरः वादप्रतिषेधवाक्यानि ।
२ साधनेन हेतुना लभ्यमानम् । ३ विश्वासहेतवो ये निजवक्तुःस्वोच्चारयितुर्गुणा आप्तत्वादयस्तन्निरपेक्षे वेदानामपौरुषेयत्वाभ्युपगमात् । ४ बाधोपदेशेन प्रपञ्चमसहमाने ।
५ निर्दोषाणां जीवानां वधः साधनं येषां तेषां यज्ञानां चेष्टाऽनुष्ठानमस्मादृशां दयाप्रधानानां नेष्टेत्यन्वयः । ६ नयज्ञेति संबोधनम् ।
७ अत्र प्रदर्शितानां सप्तानां विशेषणानामुत्तरश्लोकसप्तकेन वेदेऽभावो बोध्यते ।

वक्त्यात्मनीन[1]मपशब्दविहीनमल्पं
　　श्रद्धीयते स न तु तद्विपरीतवादी ॥ १६ ॥
पादाऽर्पणे ऽपि धरणौ सततावधान-
　　शिक्षोपदर्शितदयं जिनशासनं क ।
क्रन्दत्पशुप्रसभमारणगर्हणीय-
　　यज्ञोपदेश्यकरुणं क च वेदवाक्यम् ॥ १७ ॥
तुल्ये किलागसि वयस्यपि विप्रशूद्र-
　　भेदेन दण्डविधिलाघवगौरवे यः ।
ब्रूते स्म सत्कृतिफलेषु च वैपरीत्यं
　　वेदः कथं स वद हास्यति पक्षपातम् ॥ १८ ॥
त्वं षोडशिग्रहविधाननिषेधयुग्म-
　　मेकत्र दुष्टमतिरो[2]त्रमखे निशम्य ।
श्रुत्वोदि[3]तानुदितहोमविगानपूजे
　　वेदे परस्परविरोधमवेहयत्रार्यम् ॥ १९ ॥
कः पिष्टपेषणसमं पुनरुक्तिदोष-
　　मङ्गीकरिष्यति, न चाप्स्यति सूरिगर्हाम् ।
वेदे निशम्य नवधा[4]ऽनवधानशंसि
　　त्वं विद्धि तत्त्वमसिवाक्यमुपेक्षणीयम् ॥ २० ॥
सर्वस्वदानमपि विश्वजि[5]तीह सत्र-
　　स्वारक्रतौ[6] च यजमानतनूनिपातम् ।

---

१ आत्मने हितम् । २ अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीतिश्रुतिः । ३ श्यावो वास्याहुतिमभ्यवहरति य उदिते जुहोति शबलो वास्याहुतिमभ्यवहरति योऽनुदिते । ४ छान्दोग्ये षष्ठप्रपाठके तत्त्वमसीत्यस्य नवधाऽभ्यास इति पौनरुक्त्यम् ।

५ विश्वजिति सर्वस्वं ददातीति श्रुतिः । ६ मरणकामो ह्येतेन यजेत । आर्भवे स्तूयमान औदुम्बरीं दक्षिणेन देशेनाहतेन वाससा परिवेष्ट्य ब्राह्मणाः समापयत मे यज्ञमिति संप्रेष्याग्निं विशतीति श्रुतिः ।

को वा सुधीरुपदिशेद्विदधीत को वा
वेदस्तथोपदिशतीति स नादरार्हः ॥ २१ ॥

न व्याकृतावनुमतः किल जर्फरीत्वि-
त्यादिप्रयोग उपलभ्यत एष वेदे ।
तेनापशब्दशतदूषितवाक्यवक्त-
र्याचार्यता न हितकाङ्क्षिभिरर्पणीया ॥ २२ ॥

संक्षिप्तवाग्भवति शिष्यजनावधान-
तात्पर्यवेदनपरीक्षणधारणार्हो ।
शाखासहस्रगहने श्रुतिकानने तु
नापाततुद्धिरपि संभवती,तरत् क्व ॥ २३ ॥

प्रामाण्यमर्दयति दूषणसप्तभङ्गी
वेदेष्वि,यं न सुवचा जिनशासनेषु ।
संक्षिप्तसारसकृदुक्तजनानुकूल-
साधारणात्महितशुद्धपदोज्ज्वलेषु ॥ २४ ॥

स्यादस्ति[1] कार्यकरणेन समस्तवस्तु[2],
स्यान्नास्ति तच्च विलयात्परतश्च बाधात्[3] ।
स्यादस्ति नास्ति च तयोः कथने क्रमेणं[4],
तत्स्यादवाच्यमुभयोर्युगपद्विरोधात्[5] ॥ २५ ॥

---

१ अत्र षड्भिः पादैर्द्वितीयश्लोकार्धेन चार्हतदर्शनाभिमता सप्त-भङ्गी प्रदर्शिता । २ आपणस्थरूप्यं भूषणादिकरणाच्छङ्काविषं च मरणादिकार्यकरणात् अस्तित्वेन संभाव्यत इति प्रथमा भङ्गी ।

३ आपणस्थरूप्यं नाशादारोपितं च बाधान्नास्तित्वेन संभाव्यत इति द्वितीयाभङ्गी । ४ पर्यायेणास्तित्वनास्तित्वयोर्विवक्षणे तृतीया भङ्गी । ५ एककाले ऽस्तित्वनास्तित्वयोः कथयितुमशक्य-त्वादनिर्वाच्यत्वे पर्यवसानमिति चतुर्थी भङ्गी ।

स्यादस्त्यवाच्यमिह सत्त्वनिरुक्त्यशक्तेः,[1]
स्यान्नास्त्यवाच्यमनिरूप्यनितान्तबाधम् ।[2]
स्यादस्ति नास्त्यवचनीयमिदं तु सत्ताऽ-
सत्तासमुच्चयविवक्षणतः[3] समस्तम् ॥ २६ ॥

सम्भाव्यते सकलमीदृशसप्तभङ्ग्या,
निश्चीयते न किमपीति कुतो विरोधः ।
अर्हन्मतस्य परदार्शनिकैः कदाऽपि,
तस्मादुपास्स्व मतमेतदपक्षपातम् ॥ २७ ॥

सम्यक्चरित्रमतिदर्शननष्टबन्धो
मुक्तो जिनः करुणयेदमुवाच शास्त्रम् ।
सर्वज्ञ एष सकलावरणप्रहाणात्,
त्रैलोक्यपूजितपदः परमेश्वरः सः ॥ २८ ॥

पातालभूगगनसर्वपथीनजीवाः
स्वादृष्टयत्नसहिता निजभोग्यभागान् ।
उत्पादयन्त्य,लमशेषकृतेश्वरेण,
क्लृप्तेन सिध्यति फले नहि कल्प्यतेऽन्यत् ॥ २९ ॥

देहेन्द्रियौघमनसां भवदुक्तयुक्त्या
चैतन्यबाधनमुपैमि, परोऽस्तु जीवः ।
नानात्वमत्र नियतं, सुखदुःखबद्ध-
मुक्तव्यवस्थितिरसंभविनी तदैक्ये ॥ ३० ॥

देहाद्बहिर्न हि सुखादि कदाऽपि दृष्टं,
तेनाऽस्तु देहपरिमाणक एव जीवः, ।

---

१ कालत्रयाबाध्यत्वस्य कुत्रापि निर्वक्तुमशक्यत्वात् सत्त्वस्यानिर्वक्तव्यत्वरूपा पञ्चमी भङ्गी । २ एकान्ततो बाधस्य सर्वत्र निर्वक्तुमशक्यतयाऽसत्त्वस्याप्यनिर्वाच्यत्वलक्षणा, षष्ठी भङ्गी ।
३ उक्तरीत्या सत्त्वासत्त्वयोरेककालेऽनिर्वाच्यत्वमाश्रित्य सप्तमी भङ्गीति सप्तभङ्गीनयः । ४ सर्व[illegible] तादृशाः ।

बन्धो ऽस्य सम्भवति देहमितत्वएव
मोक्षो ऽपि वा स्वतनुयोगवियोगभेदात् ॥ ३१ ॥
तस्मिन् विभौ तु सततास्विलकाययोगा-
दापद्यते सततबन्धनदुष्प्रसङ्गः ।
देहान् मृषेति मनुषे यदि, तर्हि मोक्षे
सिद्धे मुधा किमनुतिष्ठसि साधनानि ॥ ३२ ॥
अस्मन्मते तनुमितो निजपुण्यपाप-
देहादिभारभृदपारभवाब्धिमग्नः ।
सम्यक्[1]चरित्रमतिदर्शनलुप्तभारो
जीवः प्रयात्यनिशमूर्ध्वं,मियं विमुक्तिः ॥ ३३ ॥
भैक्षाशिता विवसनत्वमसङ्गता च
त्वां सूचयन्ति यतिमार्हतदर्शनज्ञम् ।
तस्मान्मुधा विवदसे मतिलेशमत्तो,
ज्ञेयावशेषमधिगच्छ सखे ऽद्य मत्तः ॥ ३४ ॥
इत्थं तथा[2]गतपथागतवेदनिन्दा-
सर्वेश्वराऽऽदरविरोधवचो निशम्य ।
सोत्कम्पसर्वतनु[3]रप्युदितानुकम्प-
स्तं प्रत्युवाच शमपूर्वकमेव भृङ्गः ॥ ३५ ॥

---

१ सम्यग्दर्शनज्ञानचारित्राणि मोक्षकारणमित्यार्हतदर्शनम् । संसरणकर्मोच्छित्तावुद्यतस्य श्रद्दधानस्य ज्ञानवतः पापगमनकरणाक्रिया-निवृत्तिः सम्यक् चारित्रम् । येन रूपेण जीवाद्यर्थो व्यवस्थितस्तेन रूपे-णार्हता प्रतिपादिते तत्त्वार्थे विपरीताभिनिवेशरहितत्वाद्यपरपर्यायं श्र-द्धानं सम्यग्दर्शनम् । येन स्वभावेन जीवादयः पदार्था व्यवस्थितास्तेन स्वभावेन मोहसंशयरहितत्वेनावगमः सम्यग्ज्ञानम् ।

२ जिनः ।

३ कोपात् शोकाद्वा ।

हा हन्त सन्ततससन्ततवासघूक
नानाविकल्पमयदुर्मतजज्झपूक ।
प्रामाणिको नहि वदन् विरमेद्विकल्पेऽ,
ऽप्रामाणिकोक्तिरपराध्यति वादकाले ॥ ३६ ॥

वस्तुस्थितिप्रमितिरेव हि मानकृत्यं,
न त्वस्ति वस्तु युगपत्सदसद्द्विरूपम्, ।
वस्तुन्यसद्द्विविधरूपमतिर्भ्रमः स्या,-
त्तां दोष एव जनये, न्न कदा ऽपि मानम् ॥ ३७ ॥

अन्योन्यबाधकमसत्त्वमथापि सत्त्व-
मेकत्र वक्षि युगपद्यदि, संशयः सः ।
यत्सर्वसंशयनिवर्ति तदेव शास्त्रं,
संशाययेत्तदपि चेत् शरणं किमन्यत् ॥ ३८ ॥

निर्णेतुमक्षमतया विविधागमार्थो-
च्छिष्टैकदेशलघुसंग्रहमात्रकारी ।
आचार्यलक्षणविहीनतया न मान्यः
संशायकोक्त्युपनमद्द्रुटाजिनो जिनो नः ॥ ३९ ॥

स्याद्वादसिद्ध्युपगमे स्वमतस्य हानि,-
स्तत्र प्रमाणकथने ऽपि स एव दोषः, ।
साध्यप्रमाणविशये तु कथं प्रवृत्तिः,
सेष्टा सदा मतिमतो ऽध्यवसायपूर्वा ॥ ४० ॥

---

१ उलूकस्यान्धकारवासप्रियत्वाज्जैनस्याप्यनिश्चयासिद्धान्तकृत्त्वाद् घूकत्वारोपः । २ प्रमाणैरेकतरपक्षनिश्चयस्यैव वादिना चिकीर्षितत्वात् । ३ प्रमाणहीनमग्राह्यमिति ।

४ निश्चयोत्पादनस्यैवाचार्यकार्यत्वात् ।

५ स्याद्वादस्य तत्र प्रमाणस्य च निश्चयाङ्गीकारे सर्वत्र संशयपर्यवसानरूपस्वसिद्धान्तहानेः ।

द्वित्रेतरेतरविरुद्धसशङ्कवाक्या-
 वृत्त्येकसारमपि शास्त्रमिति प्रवक्तुः ।
नीराजयन्तु वदनं कृतहस्तताला
 जैनाङ्गना बहुलगोमयदीपिकाभिः ॥ ४१ ॥
जीवस्त्वयैव कृतहान्यकृतागमाभ्यां
 भीतेन नित्य उदितो, ऽस्य तनूमितत्वे ।
मातङ्गकीटवपुषोरनयोः शरीर-
 व्यत्यास आपतति सम्भवपूर्त्यभावः ॥ ४२ ॥
सङ्कोचविस्तृतिकथा ऽत्र वृथा, तथात्वे ऽ-
 स्यापद्यते ऽवयविता ऽथ विनाशिता च ।
क्वापीक्ष्यते ऽवयविनोरुभयोर्न चैकदेश-
 स्थिति,स्तदलमेभिरसत्प्रलापैः ॥ ४३ ॥
कस्मात्तपःक्षतसवासनकर्मजालो
 जीवैः प्रयात्युपरि, किं भयमत्र वासे ।
कर्मस्यसस्त्विह परत्र च नास्ति वन्धः
 कर्मस्थितौ तु गगने ऽप्यनिवार्य एषः ॥ ४४ ॥
सार्वज्ञ्यमागमभवं, तव चागमो ऽपि
 सार्वज्ञ्यमूल, इतरेतरसंश्रयं तत् ।
वीजाङ्कुरोपमितिरत्र गुरुत्वदूष्या,
 लघ्वी तु वेदसकलेश्वरनित्यतैव ॥ ४५ ॥

---

१ अस्तित्वनास्तित्वयोःपरस्परविरुद्धत्वात्तयोरपि संभाव्यमानता-मात्रतया सशङ्कत्वात् सप्तभङ्ग्याः सत्त्वासंभावनाऽनिर्वचनीयत्वबोधक-पदचतुष्ट्यावृत्त्येकनिष्पन्नस्वरूपत्वात् ।

२ गजपरिमितो जीवः कीटशरीरे न संभवेत् कीटमितश्च गज-शरीरं न व्याप्नुयात् ।

३ अवयविद्वयस्यैकावकाशे स्थित्यदर्शनेन शरीरतत्परिमितजीव-योरेकावकाशे स्थितेरसंभवः ।

सार्वज्ञ्यमागमकृतं कृतकां च मुक्तिं
ब्रूषे जिने, तदुदयात्[1]प्रथमं य एव ।
संसारचक्रपरिचालनशक्तिशाली
सर्वेश्वरः सकलवित्स सदा विमुक्तः ॥ ४६ ॥

दृष्ट्वैकचेतननिदेशवशां प्रवृत्तिं
कार्ये लघावपि गृहे वहुचेतनानाम् ।
ब्रह्माण्डनिर्मितिमनेककर्तृ[2]कतामपीच्छ-
न्नेकं समस्तविभुमीश्वरमाश्रयस्व ॥ ४७ ॥

कुर्वन्तु काश्चन यथास्वरुचि प्रवृत्ती,-
रेकाऽपि कापि परभीतिकृता प्रवृत्तिः[3] ।
दृष्टा कुटुम्बनगरस्थितचेतनेषु
यद्भीतिजा ऽखिलकृतिः, परमेश्वरः सः ॥ ४८ ॥

यत्तारतम्यसहितं क चिदस्य दृष्टा
विश्रान्ति,रत्र परिमाणमुदाहृतिः स्यात् ।
ज्ञानं तथा, ऽस्य सकलातिशयान्वितस्य
विश्रान्तिभूमिरुचितः परमेश एव ॥ ४९ ॥

तन्नित्यमिष्टमुपपत्तिम,दन्यथा ऽस्य
हेत्वन्वरानुसरणे त्वनवस्थितिः स्यात् ।

---

१ जिनोत्पत्तेः पूर्वं य एव धर्माधर्मवोधकवेदोपदेष्टा स एवेश्वरः। न च ततः पूर्वं जिनान्तराभ्युपगमेन निर्वाहः । अनवस्थाप्रसङ्गात्। नित्यसर्वज्ञेश्वरस्वीकारेण निर्वाहे वीजाङ्कुरन्यायेन तत्स्वीकृतेरयुक्तत्वात्।

२ एककार्यानुकूलाऽनेकचेतनप्रवृत्तिः एकचेतनाभिप्रायज्ञानप्रयोज्या गृहानुकूलतक्षादिप्रवृत्तिवत् ।

३ वहुचेतनसमवेता परस्परहितानुकूला परस्परानिष्टप्रतिकूला वा एकजातीया प्रवृत्तिरेकचेतनभीतिप्रयोज्या कुटुम्बस्वामिराजभीतिप्रयोज्यकुटुम्बनगरान्तर्गतबहुजनप्रवृत्तिवत् । अत्र च भीषाऽस्माद्वातः पवतः सादि श्रुतिरुदाहृता ।

नित्यं गतातिशयमीश इदं दधानः
साधारणं सकलकार्यविधौ निदानम् ॥ ५० ॥
स्वस्वार्जिताशुभशुभावहकर्मभेदा-
त्प्राप्नोति जीवनिवहः फलभेदमद्धा[1] ।
आन्ध्येन पङ्गुसदृशाक्षमकर्मवृन्दा-
धिष्ठानताऽऽहतनिदानगुणो महेशः ॥ ५१ ॥[2]
क्षेत्री लभेत यदि कर्षणवीजवाप-
दाक्ष्यप्रमादवशतः फलसिद्ध्यसिद्धी ।
दोषोऽत्र नैव जलदस्य, तथेश्वरस्य
वैषम्यनिर्घृणतयोर्न ततः प्रसङ्गः ॥ ५२ ॥
अन्येषु हेतुषु तु सत्स्वपि कर्षृचेष्टा
स्यान्निष्फला, जलधरो यदि न प्रवर्षेत् ।
साधारणो जलधरः किल तेन हेतुः,
सा रीतिरप्रतिहता परमेश्वरेऽपि ॥ ५३ ॥
जीवो न वेत्ति सकलं स्वमपीह कर्म,
दूरे परस्य[3], कथमेष ततोऽधितिष्ठेत् ।
सर्वज्ञतां तदुचितां हि वहन् परेशोऽ-
धिष्ठानताभरसहो, ऽल्पमतिर्न जीवः ॥ ५४ ॥
इत्युक्तयुक्तिनिवहैः परमेशसिद्धौ
तस्य प्रपञ्चहितसाधनमार्गदर्शी ।
आदेश[4] एव किल वेदपदाभिधेयो,
नोल्लङ्घ्य एष तदधीनहितार्थिजीवैः ॥ ५५ ॥

---

१ सत्यम् । २ कर्मणामचेतनत्वेन चेतनाधिष्ठानं विना कार्योत्पादनसामर्थ्यविरहाद् बहुशस्तथा दृष्टत्वात् पयोम्बुप्रवृत्त्योरपि पक्षकुक्षिनिक्षिप्तत्वात् । ३ स्वपरकर्माणि । तज्ज्ञातृत्वे सत्येवाधिष्ठानसंभवात् । ४ आज्ञा ।

अस्तेयसत्यहितवागपरिग्रहाहिं-
साब्रह्मचर्यनियमस्य महाव्रतत्वम् ।
आघोषितं श्रुतिषु, नार्हदुपज्ञमेत-
च्चौर्येण दर्शनमभूषयदात्मनः सः ॥ ५६ ॥

उच्चाधिकारिभिरपीह सुदुष्करं त-
त्सर्वैरशक्यमिति सर्वसमानदर्शी ।
मन्दाधिकारिबहुले जगति क्रमेण
सिद्ध्यै व्यधाद्द्विविधयागविधीन् महेशः ॥ ५७ ॥

आप्तो भिषग् हि कटुकौषधपानरुष्टं
बालं प्रपाययति तद् गुडजिह्विकाभिः ।
युक्त्या ऽनुसृत्य रुचिमस्य, तथेश्वरो ऽपि
रागिव्रजोपकृतये विदधाति यागान् ॥ ५८ ॥

त्वच्छास्त्रएव निपतेयुरमी अवार्या
वैषम्यनिष्करुणताजडताख्यदोषाः ।
रागाभिभूतजनतासमुपेक्षणे वा,
तत्कृत्यशक्यकटुसंयमबोधने वा ॥ ५९ ॥

दण्डार्हणे गुरुलघू गुणतारतम्य-
द्रष्टुः प्रभोस्तु गुणएव, न पक्षपातः ।
दण्डाल्पता न दमयेत्खल,मल्पपूजा
नोत्साहयेच्च गुणिनं गुणवृद्ध्युपाये ॥ ६० ॥

माद्येत्खलो गुरुतरार्चनया, कुलीनो
दण्डे महीयसि कृते भृशमुद्विजेत ।
यायाद्विपर्ययमनेन च लोकयात्रा, ऽऽ
यत्यां शुभं विदधदेष न पक्षपातः ॥ ६१ ॥

---

१ अर्हता प्रथमं न ज्ञातम् । २ एवं च तेषुहिंसाजनित-
दोषसत्त्वेऽपिछापत्तिः । ३ उत्तरकाले ।

भूमिं मुहुः कृपति यः स लभेत पुष्टं
धान्यं, कृशं त्वलस इत्यतिरात्रयागे ।
यष्टा ग्रहग्रहणहानिकृतप्रकर्ष-
कार्श्यं फलं समधिग[1]च्छतु, को विरोधः ॥ ६२ ॥

आवश्यकत्वमलसाशुकृतोर्विवक्षु-
र्होमोदितानुदितकालयुगं विधाय ।
एकं प्ररोचयितुमन्यमधिक्षिपन्ती
तात्पर्य[2]तो न लभते श्रुतिवाग्विरोधम् ॥ ६३ ॥

मन्देषु विस्मरणशालिषु बोधनीये-
ष्वावृत्तिरेव दृढसंस्कृतिकृत् प्रसिद्धा, ।
अभ्यस्यते च विपरीतमतार्दनाय,
तत्पौनरुक्त्यमिह भूषणमेव वेदे ॥ ६४ ॥

कूटाहव[3]ाधिककराहृतभूरिवित्त-
सत्यानुतप्तनृपचित्तविशोधनाय ।
चेद्विश्वजित्यखिलदानमुवाच वेद,-
स्तन्नात्मनीनमिति[4] को विवदेत मूर्खः ॥ ६५ ॥

एकान्तविप्रहननादिमहाघनाश-
मीप्सन् तदप्रकटयन् श्रुतिवित् स्वशुद्ध्यै ।
सुत्वा जुहोतु निजदेहमपायि सर्व-
स्वारकृतौ, प्रव[5]यसो ऽस्त्वथ वैष पन्थाः ॥ ६६ ॥

---

१ फलप्राप्तेरुभयत्र तुल्यत्वेऽपि यत्नाधिक्यात् फलाधिक्योपपत्तेः ।

२ यत्परः शब्दः स शब्दार्थ इति न्यायात् परनिन्दायां तात्पर्याभावात् । परिगृहीतत्यागे निन्दोपपत्तेश्चेत्यपि बोध्यम् ।

३ कपटयुद्धम् । ४ आत्मनो हिताजनकम् । गर्हितमार्गेणार्जितस्य धनस्य त्यागे एव पारलौकिकहितस्योभयसंप्रतिपन्नत्वात् ।

५ कर्माशक्तस्य भृग्वग्निपातादीनां शास्त्रानुमतत्वात् ।

एषा दिगेव कथिता, न तु सर्वमद्य
शक्यं भवक्तुमतिविस्तृतशास्त्रगम्यम् ।
श्रद्धास्यते यदि, तदा तव जैमिनीयं
वैयासिकञ्च वदितास्मि मतं क्रमेण ॥ ६७ ॥

सर्वं न वैदिकवचो ऽधिकरोति सर्वान्,
लालाटिकः श्रुतिगिरामखिलो ऽनुकम्प्यः ।
वीक्ष्याधिकारमुपयोजय वेदवाक्यं,
तेनापयात्यहितवादविरोधशङ्का ॥ ६८ ॥

नव्या कृतिर्भवतु पाणिनिसूत्रनिघ्ना,
न व्याकृतिः श्रुतिवचोनियमाय शक्ता ।
श्रौतं पदं तु मुनिनैव पृषोदरादौ
शिष्टोपदिष्टमिति साधुतया ऽनुमेने ॥ ६९ ॥

स्तोकं बुबोधयिषुरल्पमतिः शिशुर्वा
संक्षेपमाश्रयतु वाचि, तथा न वेदः ।
वर्णाश्रमेतरहिताहितबोधनाय
वद्धोद्यमो वदति यद्बहु तन्न दुष्टम् ॥ ७० ॥

शाखासहस्रगहने श्रुतिकल्पवृक्षे
स्वल्पोपयुक्तमधिगत्य गुरुप्रसादात् ।
तन्मात्रमाचर, शुभं ध्रुवमाप्स्यसि त्वं,
वेदे ऽखिले ऽनधिगते ऽपि न का ऽपि हानिः ॥ ७१ ॥

निर्हेतुको न कृतकः सुखदुःखभेदः,
पुण्यैनसी इह निदानतया तवेष्टे, ।
आदेशने ऽस्य सकलस्य भवे ह्यनादौ
नित्या श्रुतिः शरण,माधुनिकं न शास्त्रम् ॥ ७२ ॥

---

१ तन्मुखप्रेक्षी तदधीन इति यावत् ।
२ आज्ञापने ।

इत्युद्धृता श्रुतिषु दूषणसप्तभङ्गी
त्वत्प्रीतये त्वदुदितेन पथैव तावत् ।
उत्सर्गबाधकबलाबलचिन्तया तु
ज्ञेयं गुरूंश्चिरमुपास्य रहस्यमस्य ॥ ७३ ॥
किञ्चित्तु तत्त्वमधुनोपदिशामि तुभ्यं,
येनाशु नाशितविपर्ययसंशयस्त्वम् ।
विश्वस्य वैदिकवचस्सु निजेष्टसिद्ध्यै
चेष्टिष्यसे, क्रमश एव विमोक्ष्यसे च ॥ ७४ ॥
जन्मस्थितिप्रलयकारणमस्य विश्व-
स्यैकं हि नित्यमखिलज्ञमुपेहि तत्त्वम् ।
नित्यत्वमस्य जहतामनवस्थितिः स्या,-
त्सर्वज्ञता त्वखिलकर्तृतया ऽभ्युपेया ॥ ७५ ॥
जन्ये ऽत्र हेत्वनुसृतौ नियता ऽनवस्थो,
पादानवीक्षणमृते च न कर्तृता ऽस्य, ।
अन्योपयोगविरहादथ लाघवाच्चा-
प्यन्यत्र मानविलयाच्च तदेकमिष्टम् ॥ ७६ ॥
तद् ब्रह्म नित्यसुखसत्त्वचिदम्बुराशे-
स्तस्य प्रकाशसुखसत्त्वयुजस्तरङ्गाः ।
जीवा अनादिनिजकर्मजमूर्त्तिभाजो
ऽन्योन्यं पृथक्स्थितिभृतो ऽपि ततो न भिन्नाः ॥ ७७ ॥
देहेन्द्रियौघमनसां स्थितिरेव मूर्ति,-
र्बन्धः स एव हि चितो, विलयो ऽस्य मोक्षः ।
आद्यं विभावयति शश्वदनाद्यविद्या,
मोक्षं व्यनक्ति विमला चितिरित्यवेहि ॥ ७८ ॥
अस्त्वन्यदेतदुपपाद्यमितो विदूरे, ऽ-
द्य प्रस्तुतं तव हितं कथयामि वत्स ।

आविद्यकैस्तनुमनोऽक्षगणैर्निबद्धा
जीवा मिथः परचितश्च विदन्ति भेदम् ॥ ७९ ॥

तेन भ्रमेण सततावृतचित्प्रकाशा
देहं मनोऽक्षगणमात्मतया विदन्तः ।
तत्तर्पणैकनिरता नियतप्रकाशं
चित्तत्त्वमल्पपरिमाणमुदाहरन्ति ॥ ८० ॥

तां भ्रान्तिमेव सहठं परिनिष्ठितेति
वाक्कौशलैः प्रतिसभं प्रतिपादयन्तः ।
तत्संस्कृतेर्दृढतया विवशाः पतन्ति
तेऽन्धे तमस्यथ परानपि पातयन्ति ॥ ८१ ॥

श्रुत्वेतरे गुरुकुलेषु चिदात्मतत्त्वं
शाब्दप्रमैककृतकृत्यतया पुरेव ।
देहाद्यभीष्टघटनानिरता उपास्ती-
स्तन्वन्ति मन्दमथ वा जहति प्रमादात् ॥ ८२ ॥

भ्रान्तिर्न नश्यति परोक्षधिया ऽपरोक्षा, ऽ-
नादिश्च संस्कृतिरिमां मुहुरातनोति ।
तेनाल्पताकुमतिसंकुचितात्मभावो
जीवो भवेऽनुभवति प्रलयोदयौ स्वौ ॥ ८३ ॥

एवं स्थिते प्रयततामिह मोक्षमाणो
भूमस्वचिन्तनविधौ, चिरकालयोगात् ।
साक्षात्कृते विमलसर्वगचित्प्रकाशे
कर्तव्यमस्य न हि किञ्चन शिष्यतेऽत्र ॥ ८४ ॥

कर्तव्यमस्ति यदि किञ्चन, तर्हि मत्वा ऽ-
विद्यानुवृत्तिमजहत्तदुपास्तिमेषः ।
तच्चिन्तनाय नियतं स्वतनूपयोगं
जानन्भवत्वनतियत्नमिमामसक्तः ॥ ८५ ॥

---

१ यो वै भूमा तदमृतं यदल्पं तन्मर्त्यमिति श्रुतिः ।

नोपासनास्ववसरो यदि देहचित्ता-
क्षाभ्यस्तबाह्यविषयार्जनरक्षणाद्यैः, ।
रागी विहाय स निरर्थकमोक्षचर्चा
सांसारिके प्रयततां स्वसुखप्रकर्षे ॥ ८६ ॥

तत्रैहलौकिकसुखार्थिषु दण्डनीति-
र्वार्तेति शास्त्रयुगलं गुरुणोपदेश्यम्, ।
यः पारलौकिकमभीप्सति शर्म, धर्मं
त्रय्या प्रबोधयति तं कृपया महेशः ॥ ८७ ॥

आन्वीक्षिकी तु परिपुष्यति दण्डनीतिं
वार्तां त्रयीं च तदियं त्रितयाङ्गभूता, ।
सैकाकिनी श्रममनर्थकशुष्कतर्कैः
सूते, ऽथ वा नृपसभासु जयप्रमोदौ ॥ ८८ ॥

आमुष्मिकैहिकविनाशिसुखार्थिभिस्तु
वार्ता त्रयी च समयं प्रविभज्य सेव्या, ।
त्रय्यन्तचिन्तनमुपेक्ष्य न मोक्षमाण
आवश्यकाधिकनिमेषमपि क्षिपेत ॥ ८९ ॥

वाञ्छन्निहत्यसुखमल्पमपि प्रयत्नैः
स्वर्गं न कामयतइत्यतिदम्भ एषः ।
तस्मादपक्वकरणः श्रुतिवर्त्मनैव
कर्माचरत्वनुगुणं विहितं हितं तत् ॥ ९० ॥

साम्राज्यमात्मदुरवापमवेक्ष्य को वा
नेच्छेत्स्वशक्यसुखकृद्वसुधाधिकारम् ।
रागे मुहुः स्फुरति मोक्षसुखे निराशः
स्वर्ग्यं मखादि कुरुते यदि को ऽत्र दोषः ॥ ९१ ॥

---

१ राजविद्या । २ कृषिसेवादिविद्या । ३ वेदत्रयेण ।
४ तर्कविद्या । ५ वेदान्ताः । ६ रागोपहतेन्द्रियः ।

यो ऽत्रालसो ऽस्थिरमतिश्च जहाति कर्मो-
पास्ती विरक्तिविदितात्मकताभिनीत्या[1] ।
घ्नन्त्यात्मचोरमिममात्महनं द्विमार्गी-[2]
भ्रष्टं स्वदुर्मतिजसंस्कृतयो ऽतिमात्रम् ॥ ९२ ॥

दानव्रतश्रुतिजपाध्वरतीर्थसेवा-
सम्पन्ननाकसुखभोगतया ऽतितृप्तः ।
तन्नाशदर्शनविरक्तमतिश्चिरेण
कश्चिद्द्विपाश्चादिह मोक्षपथे ऽधिकारी ॥ ९३ ॥

तस्मात्स्ववृत्तिमनिगूह्य निजाधिकार-
मालोच्य दुष्पथमपास्य भृशानुतप्तः ।
त्रैविद्यपर्षदमथात्मविदं गुरुं वा
नम्रः प्रसाद्य चर तद्वचसा स्वधर्मम् ॥ ९४ ॥

विद्वांसमेहि शरणं सुचिरं परीक्ष्य
निश्चित्य रागमददम्भनिवृत्तिमस्य ।
दृष्टाः शठा हि सरलान्बहु वञ्चयन्तः
सन्ति स्वभावसदयाश्च महानुभावाः ॥ ९५ ॥

आमन्त्रितो रहसि साक्षेपदीनरीत्या[3]
वत्स त्वया कृशधिया भृशनिन्दितो ऽपि ।
प्रादीदृशं तव हितं परतस्त्वमेव
सम्यग्विचार्य यदभीप्ससि तत्कुरुष्व ॥ ९६ ॥

---

१ मिथ्यानाटनेन । २ योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चोरेणात्मापहारिणेति महाभारतम् । असुर्या नाम ते लोका अन्धेन तमसा वृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जना इत्युपनिषत् । कर्मब्रह्मोभयभ्रष्टं ब्रह्मास्मीति च वादिनम् । ज्ञानकर्मपरिक्षीणं तं त्यजेदन्त्यजं यथा । इत्याद्यागमा अत्रानुसंधेयाः । ३ सव्यङ्ग्यम् ।

श्रुत्वा ऽलिवाचमहिताग्रहरागरोषा-
स्पृष्टां प्रकृष्टकरुणामृतसेकपुष्टाम् ।
उत्सृज्य नास्तिकमतं प्रणिपत्य भूयः
संत्रासगद्गदपदं व्यलपद्विलासी ॥ ९७ ॥

तात प्रसीद विषहस्व ममापराधं
त्रिर्निर्जितो ऽहमथ वा प्रतिबोधितो ऽस्मि ।
दीर्घानुवृत्तवितथाभिनिवेशशुद्ध्यै
त्वामेव पूर्णकरुणं शरणं प्रपद्ये ॥ ९८ ॥

मत्वा ऽप्रयाससुलभौ सुखभोगमोक्षौ
चार्वाकबौद्धमुनिजैनमताश्रयेण ।
दुर्वादिवञ्चितमना बहु हन्त हेत्वा-
भासैरदूदुषमहं श्रुतिवाक्परेशौ ॥ ९९ ॥

अद्य त्वया तु दयया सुदृढोपपत्तीः
श्रौते मते ऽप्यथ च नास्तिकवाददोषान् ।
हृद्यं स्फुटं च वदता निरयाद्गमाख्या-
त्सन्तारितो ऽस्मि, भगवन् शतशो नमस्ते ॥ १०० ॥

नान्या गतिर्मम भवन्तमपास्य दास्य-
मङ्गीकरोम्युपदिशोचितशुद्धिमार्गम् ।
भीतो रुदन्निति विलप्य चिरं पुरो ऽलेः
साष्टाङ्गपातमलुठद्धरणौ विलासी ॥ १०१ ॥

आलोकायतमोहितं त्वमनयान्न्यक्कृत्य दुर्दर्शनं
मत्या नित्याचितः स्थिरो ऽधिकरणे धिक्कृत्य बौद्धान् बलात् ।

---

१ मिथ्याऽऽग्रहः । २ तमः अज्ञानम् आलोकाय प्रकाशाय अहितम् । अथ वा आ इति पीडायामव्ययम् । अनयात् अनीत्या लोकायतानां चार्वाकाणां मया मित्या ऽऽहितं तर्कितं दुर्दर्शनम् अनया मदुपदिष्टया नित्याचितः नित्यज्ञानात्मनः मत्या न्यक्कृत्येत्यन्वयः । ३ भावरूपेऽधिकरणे स्थिरः तत्साधनकृत् । आधिके वादरूपे रणे स्थिरः अपलायमानो वा ।

सद्भावाश्रयशून्यशून्यवचसा[1] निन्द्यान् वृतात्माल्पता[2]-

नर्हन्नव्यमतं[3] श्रितान् जहदथशादेशवश्यो भव ॥१०२॥

तथागत[4]पथागताहितकथावितीर्णप्रथा-

न्यथावहकुसंस्कृतीः सुवितथा यथा मंस्यसे ।

तथा ऽऽचर सखे ऽन्यथा तव वृथा शरीरं भवे-

दथाऽऽशुहि मनोरथान् रहसि मन्मथारिं श्रयन् ॥१०३॥

त्वं चार्वाकलयन्[5]निशम्य गदितं देहात्मवादं त्यजन्

मुञ्चन् दूषितहेतु[6]शून्यवचने श्रद्धां च बौद्धेरिते ।

जैनान् हीनतमानपास्य कुधियोद्यन्[7]त्सप्तभङ्गीनये

मालिन्यं तनुचेतसोऽनुद चिरं सच्छ्रौततीर्था[8]श्रयात् ॥१०४॥

भ्रमन्[9]दूरे तिष्ठन्नपि तव पवित्रेण तपसा

विनिश्चित्य क्षीणं कलुषमखिलं शीघ्रं[10]मुदितः ।

---

१ सन् भावरूपो य आश्रयस्तेन शून्यं रहितं यत् शून्यमभाव-तत्त्वम् तत्कथनेन भावरूपाधिकरणरहिताभावमात्रतत्त्वताकथनेन निन्द्यानिति बौद्धविशेषणम् । सद्भावो मैत्री तद्रूपाश्रयविकलेन निर्हेतुकवचनेनेति वा । २ वृतयाऽङ्गीकृतया आत्माल्पतया आत्मनः कायपरिमाणकतयाऽनर्हमिति नव्यमतविशेषणम् । ३ वृतात्माल्पतान् अर्हतो जिनस्य नवीनं मतमाश्रितानिति वा । ४ सुगतः ।

५ गदितं मदुक्तं निशम्य चारु यथा तथाऽऽकलयन् विचारयन् गदितं चार्वाकलयं चार्वाकनिराकरणं निशम्येत्यन्वयो वा ।

६ दूषितं हेतुशून्यं यद्वचनं तत्र दूषिता हेतवो यस्य तादृशस्य शून्यस्य वचने इति वा ।

७ कुबुद्ध्या उद्यन्ती सप्तभाङ्गिर्येषां तान् जैनान् अये इति संबोधनम् । सप्तभङ्गीनये कुधियः अल्पमतीन् द्यन् खण्डयन् मोहकत्वादिति मालिन्यविशेषणम् ।

८ शास्त्राणि ऋषिसेवितजलानि च ।

९ भ्रमं भ्रान्तिज्ञानं क्षीणं विनिश्चित्येत्यन्वयः भ्रमन्नित्यलि-

विशेषणं वा । १० स्वान्तमाविर्भूतः द्रुतं तुष्टश्च ।

अहंकार्यासाद्यं प्रथममुपादिश्यास्थिरसुखं
क्रमात्साक्षात्कारावृतिमपहरिष्ये, ऽलमधुना ॥ १०५ ॥

आश्वास्यपङ्कजगलन्मकरन्दमित्रै-
राश्वास्य सान्त्ववचनैरिति तं ततोऽलिः ।
स्वच्छन्दमच्छसलिलां तटिनीमगच्छ,-
त्तं चान्वगच्छदुदयच्छमधीर्विलासी ॥ १०६ ॥

इत्यलिविलासिसंलापे खण्डकाव्ये
चतुर्थं शतकम् ।

---

१ अहंकारिभिः सरागैः असाद्यं प्राप्यम् । अहमिति पृथक्पदम् कार्येण जैमिनीयाभिमतापूर्वेण प्राप्यमिति वा । २ साक्षात्कारस्य ब्रह्मण आवृतिमज्ञानम् । कारायां बन्धनालये आवृतिमवरोधं साक्षादपहरिष्य इति वा ।


अलिविलासिसंलापे

पञ्चमशतकविषयानुक्रमणिका ।

प्राची-(१)दक्षिण-(२)पश्चिमो-(३)त्तर-(४)दिशातीर्थामरौघस्तुति-
व्याजेनाऽखिलवाच्यवाचकगतालङ्कारसंग्राहके ।
निर्ध्याते शतके ऽत्र चित्रकवितासम्पादने कौशलं
स्यात् [illegible]स्मरतीर्थसंस्मरणतः श्रेयश्च नित्यं नृणाम् ॥ १ ॥

---

(१) १ श्लोकमारभ्य १८ श्लोकपर्यन्तम् ।
(२) १९ „ ४० „
(३) ४१ „ ४८ „
(४) ४९ „ ८१ „



अलिविलासिसंलापे.

पञ्चमं शतकम् ।

ततो गुरुरिवादृतः पितृवदुद्यतो ऽनुग्रहे
प्रियोक्तिषु सखा यथा सुतवदत्र वाञ्छन् सुखम् ।
अलिः सुमसमैः पदैः पथि विलासिनं रञ्जयन्
निनाय शनकैः श्रमं परिहरन् नदीं गोमतीम् ॥ १ ॥

अथाम्बुजइवाम्बुजे स उपविश्य तत्सौरभं
मरन्दमिव सौरभोपममरन्दमास्वादयन् ।
विलासिन इहाप्लुतान्मलमिवापयत्कश्मलं
निरीक्ष्य बुबुधे नदीयमिह चेदलं गङ्गया ॥ २ ॥

ततोऽलिमुनिराव्रजद्धरिपदाम्बुजे नीरज-
स्ययाचितपुमर्थदे सुरतरौ सदा सादरः ।

---

१ अत्र शतके तीर्थयात्रावर्णनमुखेन कुवलयानन्दस्थक्रमेणालंकाराः संगृहीताः । काचित्तद्विशेषा अपि । काचिद्विस्तरभिया के चन विशेषाः परित्यक्ताः । इयं समासगता श्रौती पूर्णोपमा ।

२ तद्धितगताऽऽर्थी पूर्णा । ३ वाक्यगता श्रौती ।

४ तद्धितगता श्रौती पूर्णा । ५ समासगताऽऽर्थी लुप्ता । एते भेदाः कुवलयानन्दे नोक्ताः काव्यप्रकाशादौ द्रष्टव्याः । ६ अनन्वयः उपमानोपमेययोर्वाक्यैक्ये एकत्वात् । ७ उपमेयोपमा पर्यायेण द्वयोरुपमानोपमेयत्वात् । ८ प्रतीपम् अधिकगुणस्य कश्मलस्योपमेयत्वाश्रयणात् न्यूनगुणया गोमत्याऽधिकगुणाया गङ्गाया वैयर्थ्यप्रतिपादनाच्च ।

९ उपमानाद्धुपमेयस्य भेदेन प्रतीत्यभावात् न्यूनत्वोत्कर्षयोरनुक्तेश्च अनुभयाभेदरूपकम् । १० न्यूनाभेदरूपकम् ।

११ अधिकाभेदरूपकम् ।

श्रुते ऽपरगुरुर्भवात्तमजलान्नवात्सागराद्
　　विरक्त्यचलनौकया ऽभिनवयोद्धरन्नैमिषम् ॥ ३ ॥
सहस्रपरिवत्सरप्रचलितः क्रियोन्मीलितः
　　कलावपि पवित्रतां वहति यत्र सत्रोत्सवः ।
तपोवनमिति द्विजाः सुरपुरीति बृन्दारका
　　विदन्ति कलिवालिनो भुवि यदृश्यमूकं जनाः ॥ ४ ॥
श्रियाऽतिविपुले कृशे कुचरितैर्महत्यध्वरै-
　　रणावकरुणैश्चिरं निवसता ऽमुना नैमिषे ।
विशुद्धसरयूतटप्रकटहर्म्यदेवालया
　　क्रमादनुसृता ऽऽदिमा शुचिपुरीष्वयोध्या मुदा ॥ ५ ॥
विलोक्य कपिचापलान्युदधिलङ्घनं स्मर्यते-
　　वासिष्ठ इति नागरैर्मालिनि यत्र बंभ्रम्यते ।
सिताम्बुजशशाङ्कता शुचियशस्सु संशय्यते ऽ-
　　धुना ऽपि दशकन्धरप्रलयधूमकेतोः प्रभोः ॥ ६ ॥
विधाय रघुनायकप्रणतितीर्थसेवा इह
　　प्रयागमगमत्ततस्तमनघं विधास्यन्नलिः ।
न यत्र रविजन्हुजे अपि तु तीर्थराजस्य ते
　　मयूरचमरीमृगच्छदकचाञ्चिते चामरे ॥ ७ ॥

---

१ अपरनवाभिनवपदैर्भेदे प्रतीतेऽपि ताद्रूप्येण प्रतीतेराद्ये उत्कर्षापकर्षयोरवर्णनाज्जलराहित्यरूपन्यूनत्ववर्णनादचलत्वरूपाधिक्यवर्णनाच्च अनुभयताद्रूप्यरूपकम् । २ न्यूनताद्रूप्यरूपकम् ।
३ अधिकताद्रूप्यरूपकम् । ४ उत्सवस्यारोप्यमाणस्य प्रकृतसत्ररूपेण पवित्रतावहनक्रियोपयोगित्वात्परिणामः ५ ऋश्यमूकपर्वते वालिप्रवेशाभावस्य रामायणे प्रसिद्धत्वात्कलिविषये तदारोपः । अयं चानेककर्तृकैकधर्मिकानेकधर्मवर्णनात्मक उल्लेखः। ६ एककर्तृक उल्लेखः।
७ एकदर्शने तत्सदृशवस्त्वन्तरस्य स्मृतेर्भ्रान्तेः संदेहाच्च स्मृतिमान् ।
८ भ्रान्तिमान् । ९ ससंदेहः । १० प्रकृते ऽप्रकृतधर्मारोपफलिका स्वगतधर्मापलापरूपा शुद्धापह्नुतिः ।

इयं निशितकर्तरी न तु सितासितासङ्गमः
क्रुणत्ति यदघौट्टति दिवि भवत्वसौ सम्भवात्[2] ।
अयञ्च वटपादपो न हरितातपत्रं[3] महत्-
सुतीर्थपटलीपतेरिति वदन्ति यत्रास्तिकाः ॥ ८ ॥
सितं न खलु सैकतं लसति राजतीयं स्थली
सुराः पथिककैतव[5]ादिदमुपासते मुक्तये ।
इति च्छलितयात्रिकान् चतुरतैर्थकान्सो ऽर्चयन्-
कृतोचितविधिर्ययौ शिवदिदृक्षया काशिकाम् ॥ ९ ॥
इयं शमनयातनाविधिशतापवादो[6] ध्रुवं
सहर्षमिह जान्हवी धुरि च नृत्यती[7]वोर्मिभिः ।
इहाश्रयति भारती विधिधियेव[8] शिष्टान्द्विजा-
निह ध्वजविधूननैरिव[9] निवार्यते संसृतिः ॥ १० ॥
भवं तरितुमत्र किं सुरसरिज्जले[10] बालका-
स्तरन्ति किमु तद्धिये[11] सततमुच्छलन्त्यण्डजाः ।
कलाविभववैदुषीविरतिमुक्तिसङ्केतभूः
पुरीयमिह सेव्यतामनिशमेष विश्वेश्वरः ॥ ११ ॥
कलिन्द[12]तनयां शिरस्युरसि तुङ्गशैलद्वयं
वहन्त्युदरधारितोरगशिशुस्तपो दुश्चरम् ।

---

१ आरोपे हेतूक्तेर्हेत्वपह्नुतिः। २ प्रकृतस्यान्यत्रारोपोक्तेः पर्यस्तापह्नुतिः। ३ परस्य भ्रान्तिवारणाद् भ्रान्तापह्नुतिः। ४ यथार्थापह्नवाच्छेकापह्नुतिः। ५ कैतवपदेनापह्नवाभिधानात् कैतवापह्नुतिः।

६ उक्तविषया अपवादत्वसंभावनारूपा वस्तूत्प्रेक्षा। इयमित्यनेन काशिकाया विषयस्योक्तत्वात्। ७ अनुक्तविषया वस्तूत्प्रेक्षा। प्रवाहस्य विषयस्यानुक्तत्वात्। ८ असिद्धविषया हेतूत्प्रेक्षा भारत्या द्विजेषु विधिधियो ऽभावात्। ९ सिद्धविषया हेतूत्प्रेक्षा ध्वजविधूननस्य विषयस्य सत्त्वात्। १० सिद्धविषया फलोत्प्रेक्षा भवतरणस्य सत्त्वात्। ११ असिद्धविषया फलोत्प्रेक्षा भीतेरभावात्। १२ रूपकाति-

विधाय शरदम्बुदे स्थितिमनश्वरीं बिभ्रती
बिभर्ति भजतो जनानिह हि काऽपि सौदामनी ॥१२॥
चतुर्विधपुमर्थदः सुरनगोऽत्र, नाके तु ने,-
त्यमुष्य निजसूक्तिभिर्गिरिशभक्तिमुद्रेचयन् ।
अभीक्ष्णमघमर्षणं स मणिकर्णिकायां व्यधा,-
ज्जगाम च ततो गयां पितृगणोद्धृतावुद्यतः ॥ १३ ॥
नवैवं जलमाधुरी, विमलशीतता ऽन्यैव सा,
परैव लघुगामिता, जगति फल्गुनद्या इति ।
स्तुवन्कृतनिमज्जनो ऽभजदथैष विष्णोः पदं,
पिपर्ति शिखरैः पुरं हरिहयस्य यन्मन्दिरम् ॥ १४ ॥
ततो ऽक्षयवटे पितॄनतृपदेष पिण्डोदकै-
र्थदाप्तिमुदिताः सुधामपि न पातुमिच्छन्त्यमी ।
अथोपमिथिलं स्तुवन्सनाति वैद्यनाथेश्वरं
ययौ पशुपतिं शिवं हिमगिरौ च नेपालगम् ॥ १५ ॥
समर्च्य गिरिनन्दिनीं रहसि कामरूपाश्रितां
निमज्ज्य कपिलाद्दते जलधिजान्हवीसङ्गमे ।
अथोत्कलमहीस्थितं स भुवनेश्वरं प्राणमत्
सहाभिमतसम्पदोदयाति यत्सपर्या सताम् ॥ १६ ॥

शयोक्तिः केशपाशस्य कुचयो रोमावलेः शिवस्य पार्वत्याश्च कालिन्दीगिरि-सर्पशिशुशरन्मेघाविद्युद्भिर्निगरणात् ।

१ कल्पवृक्षस्य नाके ऽपह्नवपूर्वकं तत्त्वेनाध्यवसितस्य विश्वनाथस्य काश्यां वर्णनात्सापह्नवा ऽतिशयोक्तिः ।

२ फल्गुनदीजलमाधुर्यादौ प्रसिद्धमाधुर्यादिभेदाभावे ऽपि भेद-वर्णनाद् भेदकातिशयोक्तिः । ३ इन्द्रपुरपूरणसंबन्धाभावेऽपि संबन्धवर्णनात् संबन्धातिशयोक्तिः । ४ सुधापानेच्छासंबन्धसत्त्वेऽप्यसंबन्धवर्णनादसंबन्धातिशयोक्तिः ।

५ सपर्यासंपदोर्हेतुकार्ययोः [illegible]र्णनादक्रमातिशयोक्तिः ।

ननाम पुरुषोत्तमं विमलनीलशैलालयं
　　यदर्चनकथा[1] ऽप्यलं भजदभीष्टसम्पत्तये ।
पतन्ति शिरसि स्रजः सुरकरोज्झिताः प्राक्, ततो
　　मुखं सुकृतकारिणां विशति यत्प्रसादौदनः[2] ॥ १७ ॥
सुराधिपदिगापगापतितरङ्गमालोन्नता
　　हृताध्वगजनातपा सरलनारिकेलावली ।
विशालपुरुषोत्तमालयविराजिकेतुच्छटा ऽ-
　　तनोदिह मनोमुदं सहविलासिनो ऽस्येक्षिता[3] ॥ १८ ॥
कलिङ्गविषये ततः परिनिपीय गोदावरीं
　　सुधामधुसितारसं स्वदितवानवामन्यत ।
स्वतोयमभिनन्दतः सरिदियं तथा निन्दतः
　　सदा रसिकसंसदि प्रकटयत्यमन्दाक्षताम्[4] ॥ १९ ॥
प्रसन्नकविता मुखे सहृदयस्य मन्दाकिनी
　　तथा त्रिदशविष्टपे भुवि चकास्ति कृष्णा नदी ।
इति स्तुतरसां[5] बुधैरथ निषेव्य कूलङ्कषां
　　मुदा ऽन्ध्रविषयं गतो ऽभजत कालहस्तीश्वरम् ॥ २० ॥
तमो हरति[6] भानुमानथ च कालहस्तीश्वरो,
　　भवत्युचितकृन्नतो भवति चात्र भक्तो गुणैः[7], ।

---

१ अर्चनप्रसक्तिमात्रेण तत्कार्याभीष्टसंपत्तिवर्णनाच्चपलातिशयोक्तिः । २ प्रसादभक्षणरूपकारणात्पूर्वमेव सुरपुष्पाञ्जलिपातरूपकार्यवर्णनादत्यन्तातिशयोक्तिः । ३ तरङ्गमालादीनां प्रकृतानामनेकेषां संतोषजननरूपैकक्रियान्वयात्प्रकृतानेकविषया तुल्ययोगिता ।

४ अप्रकृतानेकविषया तुल्ययोगिता । ५ निर्लज्जतां कार्यक्षमेन्द्रियतां च । इयं हिताहितयोर्वृत्तितौल्यरूपा तुल्ययोगिता ।

६ गुणोत्कृष्टैः साम्यकथनरूपा तुल्ययोगिता । ७ प्रकृतस्य शिवस्याप्रकृतस्य सूर्यस्य चैकक्रियान्वयाद् दीपकम् । ८ शब्दावृत्तिदीपकम् भवद्वाचरतीत्यर्थभेदात् ।

चकास्ति शशिनः कला शिरसि शोभते ऽङ्के ऽद्रिजा,
स्तुवन्त्यमुमिहर्षयः श्रुतिगिरः स्तुवन्त्यादरात्, ॥२१॥
प्रमोदयति वैष्णवान्सपदि वेङ्कटेशः परं,
प्रहर्षयति शीतलो मलयवायुरेवाध्वगान्, ।
स्मृतो ऽयमरुणाचलो दहति संसृतेः साध्वसं,
कथं चिदुदितो रविर्ननु निहन्ति नैशं तमः, ॥ २२ ॥
इति प्रतिसुरालयं नवनवैः स्वसूक्तिक्रमै-
र्मनो ऽस्य चिरदूषितं पथि विलासिनः पावयन् ।
अलिर्यदनयत्क्रमादमुमथैष काञ्चीपुरी-
मुपाक्रमत सो ऽस्य तच्छुभपरम्परासाधने ॥ २३ ॥
इहाम्रतरुमूलगो ददृश एककाम्रेश्वरः,
सभक्ति नतमौलिना मुहुरनेन चापूज्यत ।
यदीयशिरसि स्थिता विकचमल्लिकामालिका
बिभर्ति कविभिः स्तुतां त्रिदशसिन्धुलीलां किल ॥२४॥
कलाधरकलां वहन्स्वशिरसा व्यनक्ति ह्यसौ
सताम्नुचित आदरो द्विजपतेः शुचेः साध्विति ।
त्रिलोकजिदपि स्मरः क्षणरुषा ऽस्य भस्मीभवन्
निवेदयति निश्चितां महदतिक्रमे दुर्दशाम् ॥ २५ ॥
श्रिताखिलमनोरथान्फलति कल्पवल्ली यथा
न तु भ्रमरसंगता विजयते ऽत्र कामाक्ष्यहो, ।

---

१ शब्दभेदादर्थावृत्तिदीपकम् । २ उभयावृत्तिदीपकम् ।
३ द्वयोर्वाक्ययोः सामान्यक्रियैक्यात् प्रतिवस्तूपमा ।
४ तमःसंसारभीत्यो रविशिवयोश्च दुःखदत्वेनानन्ददत्वेन च बिम्बप्रतिबिम्बभावाद् दृष्टान्तः । ५ काञ्चीपुरीनयनशुभसाधनयोरैक्यारोपाद् वाक्यार्थवृत्तिनिदर्शना । ६ अन्यगतलीलाया अन्यत्रासंभवेनारोपे पर्यवसानात् पदार्थवृत्तिनिदर्शना । ७ सदर्थबोधननिदर्शना । ८ असदर्थबोधननिदर्शना । ९ उपमेयन्यूनत्वपर्यवसायी व्यतिरेकः । भृङ्गैः संगता भ्रान्ता प्रीतिं न प्राप्नोति श्लेषानुप्राणितः ।

दृशौ शिशिरयत्यसौ शशिकलेन नव्या नृणां
विभाति तु सदोदिता वरदराजकायच्छविः ॥ २६ ॥
अथैक्षत चिदम्बरे द्रविडगे नटेशं शिवं
यतः सहं दयादृशा ऽलभत पाणिनिर्व्याकृतिम् ।
यदीक्षणमृते जनुर्भवति जन्मिनां निष्फलं,
विना च्छलमदौ चकासति यदर्चने दीक्षिताः, ॥२७॥
इयं कुटिलगामिनी लसदनेकधाविभ्रमा
रुचिं विदधती नृणां बहुलसज्जवायौवने ।
निरुध्य सुचिरं मनोभुवमुपेत्य रत्नाकरं
रसादभिसरत्यहो रहसि सह्यशैलाङ्गजा ॥ २८ ॥
पदक्रमजटाघनाद्यखिलवेदविद्योन्नताः
प्रमाणनिपुणाः पदे स्खलनवर्जनादुर्जयाः ।
द्विजाः सदसि संमताः सरसवाक्यमर्यादया
कलिं निजतपोबलाज्जहति कुम्भकोणे पुरे ॥ २९ ॥
यतीनथ महीपतीन्कृतमतीनतीवात्मना ऽ-
नुरञ्जयति सेवकानिह च रङ्गनाथश्चिरम् ।

---

१ उपमेयाधिक्यपर्यवसायी व्यतिरेकः । २ दयादृष्टिव्याकरणयोर्लाभे साहित्योक्तेः सहोक्तिः । ३ प्रस्तुतस्य हीनत्वपर्यवसायिनी विनोक्तिः । ४ प्रस्तुतशोभनत्वपर्यवसायिनी विनोक्तिः ।

५ श्लिष्टसाधारणोभयविधविशेषणोत्थापिता समासोक्तिः । लसन्तो ऽनेकप्रकारा विलासा यस्याः अनेके धाविन आवर्ता यस्या इति श्लेषः । बहुलाःसज्जा वायवो यत्र तादृशे वने अथवा बहुर्विपुलो लसन् शोभमानो जवो वेगो यस्या इति श्लेषः वने यौवने च नृणां प्रीतिमुत्पादयन्ती । मनः सुचिरं निरुध्य अत्र नृणामित्यनुवर्तनीयम् तेषां चित्तं सौन्दर्येण स्वाधीनीकृत्येति यावत् अथवा मनोभुवं कामं चिरं निरुध्य तद्वेगं चिरं विषह्येति यावत् रत्नाकरं समुद्रं धनिनं च । अत्र कावेरीवृत्तान्ते वर्ण्यमानेऽप्रस्तुताभिसारिकावृत्तान्तप्रतीतेःसमासोक्तिः । ६ परिकरः सर्वेषां विशेषणानां साभिप्रायत्वात् । ७ परिकराङ्कुरः रङ्गनाथत्वेन सूत्रधारतया

कवेरतनयातटोल्लसितपूततीर्थावलिं
विलासिनमदीदृशत्तमिति चोलभूमावलिः ॥ ३० ॥

अहीनवसनाकृतिर्वहति विग्रहे भूषणा-
न्य,हर्निशमुपास्यते जगति योदयाकाङ्क्षिभिः, ।
सदानवविभूतिभासिततनुश्च मीनाक्ष्यसौ
स पाण्ड्यविषये मनो हरति सुन्दरेशश्च मे ॥ ३१ ॥

समस्तवसुधातलातुलविशालदेवालयां
निरीक्ष्य मधुरां पुरीं विविधगोपुरैरद्भुताम् ।
भयेनगरदाहिभिर्निरुपमानभोगैर्वृताऽ-
मुना सुरपुरी हृदा न चकमे च पूर्भोगिनाम् ॥ ३२ ॥

अनन्तशयनाश्रितक्षितिधरोऽत्र पद्मार्पणैः
प्रमोदजनकैरलावनिशवृद्धये सोद्यमः ।
स्वविक्रमलवानमद्बलिशिरोनिविष्टाङ्घ्रिको
विभाति पुरुषोत्तमः सततमेष संसेव्यताम् ॥ ३३ ॥

यत्यादीनां सर्वेषामनुरञ्जनशक्तिद्योतनात् ।

१ प्रकृतानेकविषयः श्लेषः । मीनाक्ष्याः सुन्दरेशस्य च वर्णनीयत्वात् । आद्ये अहीने वसनाकृती यस्याः सा विग्रहे शरीरे भूषणानि वहति । या उदयाकाङ्क्षिभिरिति च्छेदः सर्वदा नवया विभूत्या ऐश्वर्येण भासिततनुरित्यर्थः । अन्त्ये अवसनाकृतिर्दिगम्बरः विग्रहे शरीरे अहीन् सर्पान् भूषणानि वहति । यः दयाकाङ्क्षिभिरिति च्छेदः । सः दानवानां विभूत्या भस्मना भूषितशरीर इत्यर्थः । २ अप्रकृतानेकविषयः श्लेषः । मधुरापुरीवर्णने प्रकृते स्वःपातालयोरप्रकृतत्वात् । स्वःपक्षे भये सति नगरदाहिभिः शत्रुपुरदाहकैः नभोगै राकाशगामिभिर्देवैर्वृता निरुपमेत्यर्थः । पातालपक्षे गरदैर्विषप्रदातृभिरनुपमशरीरैरहिभिः सर्पैर्भयेन वृता गरुडभीत्या गुप्तस्थानावस्थितेस्तेषामभीष्टत्वात् । ३ प्रकृताप्रकृतानेकविषयः श्लेषः । केरलदेशे पुरुषोत्तमस्यानन्तशयनस्य प्रकृतत्वात् पुरुषश्रेष्ठस्याप्रकृतत्वाच्च । आद्ये अनन्तस्य नागस्य शयने पर्यङ्के आश्रितां भूयसीं क्षितिं भरति । पद्मानां संपत्तावर्पणैर्दानैः प्रकृष्टो मोदो

असंख्यजनुरार्जितप्रबलपापनीलीरसं
नदीनदसुरालयस्नपनघर्षणैः क्षालयन् ।
प्रयाति विपुले मले ऽप्यजहतीं तनुं श्यामिकां
विलोक्य स विलासिनः पुनरचिन्तयच्छोधनम् ॥ ३४ ॥

स योजनशताधिकभ्रमणखिन्नदेहो वसन्
क्व चित्परिचितं पुरा प्रतिनिवृत्तमालोकयत् ।
प्रयाणसमयासितं कृतमहाब्धिरत्नाकरे-
तरेतरसमागमाप्लुतिजकाञ्चनाभं नरम् ॥ ३५ ॥

परेशदयया क्व चिल्लसति पूतता ऽलौकिकी,-
त्यवेत्य स निराशतां हृदि निरस्य भूयो ऽचलत् ।
निदाघजनिताखिलप्रबलतापविच्छित्तये ऽ-
भिषिञ्चति मुहुर्महीं जलधरो ऽम्बुधाराशतैः ॥ ३६ ॥

दशाननजिगीषया रघुवरेण सेतौ कृते-
व्रजन् जलधिमध्यगं सकलपापशैलस्वरूम् ।

हर्षो येषां तादृशा जना यस्यां तादृशी केरलदेशसंबन्धिनी या भूस्तस्या निरन्तरवृद्धये उद्युक्तः । स्वस्य विक्रमलेशेन नतस्य बलेः शिरसि न्यस्तपाद इत्यर्थः । अन्ये अनन्ताः शयेन हस्तेन नामिता राजानो येन संतोषजनकैः पद्मानां कमलकुसुमानां दानैरलौ भ्रमरे विषये निरन्तरवृद्धये सोद्यमः तत्पेयमकरन्दाश्रयकमलदानेन तत्पोषकः । स्वकीयपराक्रमलेशेन नम्राणां बलिनां राज्ञां शिरस्सु स्थापितपादः पुरुषोत्तमो नारायणः पुरुषश्रेष्ठश्च । १ कारणनिबन्धना ऽप्रस्तुतप्रशंसा । सेतुगमनरूपे कार्ये प्रस्तुते तत्कारणस्य पापशोधनेच्छारूपस्य वर्णनात् ।

२ कार्यनिबन्धनाऽप्रस्तुतप्रशंसा । सेतुमाहात्म्यातिशयस्यकारणस्य वर्णने प्रस्तुते तत्कार्यस्य महापापिनैर्मल्यस्य वर्णनात् । ३ सामान्यनिबन्धना ऽप्रस्तुतप्रशंसा । तीर्थविशेषस्य सेतुरूपस्य वर्णने प्रस्तुते तीर्थसामान्ये परेशानुग्रहजनितमाहात्म्यस्य वर्णनात् । ४ विशेषनिबन्धना ऽप्रस्तुतप्रशंसा । महतां दीनार्तिच्छेदनतत्परतारूपे सामान्ये वक्तव्ये विशेषस्य मेघस्य वर्णनात् । ५ वज्रम् ।

महेश्वरपुराहृतैरभिषिषेच गङ्गाजलै-
रपावयदमुं चतुर्द्विदशतीर्थतोयेषु च ॥ ३७ ॥
तमो निरसितुं ध्रुवो भ्रमति भानुमानम्बरे
निरन्तरममुष्य किं फलमिह प्रकाशात्मनः, ।
इमे मधुकरा वनान्यनुसरन्ति लब्ध्वा मधु
प्रयत्नशतकैर्नरान् हृतगदान्विधातुं किल ॥ ३८ ॥
निशम्य पथि गच्छतामिति वचांसि सेत्वाप्तये
नवीकृतमना मनाग् जलधितोयमार्गे सभीः ।
नलाभिधवलीमुखातुलितकौशलज्ञापकं
विभाजकमुदन्वतोः किमपि वस्तु भक्त्यैक्षत ॥ ३९ ॥
श्रमेण पदमप्यहं न चलितुं क्षमे, तद्भवान्
समानयतु राघवेष्वसनकोटितीर्थाज्जलम् ।
छलादिति विलासिनं जलधिसङ्गमे स्नापयन्
निनाय कृतकृत्यतां, प्रमुदितः प्रतस्थे ततः ॥ ४० ॥
विहाय रजताचलं निवसता ऽत्र गोकर्णके
दयामधिषु तन्वता ऽलमविवेकिना शम्भुना, ।
इमे सुचतुरा नृपाश्चिरमुपाश्रिता ये ऽर्थिभिः
विभाव्य लघु दूषणं सपदि तान् बहिष्कुर्वते ॥ ४१ ॥

---

१ चतुरधिकानि द्विरावृत्तानि दश चतुर्विंशतिरित्यर्थः ।

२ सारूप्यनिबन्धनाऽप्रस्तुतप्रशंसा । ३ प्रस्तुताङ्कुरः इमे इत्यनेन प्रकृतालेर्वन्यानामलीनां न कीर्तनात् । ४ पर्यायोक्तम् । सेतोरेव रूपान्तरेण कथनात् । रत्नाकरमहोदध्योर्मध्यस्थो नलाख्यकपिशिल्पकौशलानुमापको हि सेतुरेव ।

५ धनुः । ६ व्याजेन परेष्टसाधनरूपं पर्यायोक्तम् ।

७ निन्दया स्तुत्यभिव्यक्तिरूपा व्याजस्तुतिः । ८ स्तुत्या निन्दाभिव्यक्तिरूपा व्याजस्तुतिः ।

स एव भुवि निन्द्यतां सृजति यो नरान्नास्तिकान्,
समाधिरुपाशिक्ष्यता,मलमनेन वेशे स्थिते, ।
धनं हरत शर्मणे क इह दृष्टवान् दुर्गती,-
रितीह वदतो नरानभिननन्द गूढाशयान् ॥ ४२ ॥
न वन्द्यहँमुमापतेः कुरु यथेप्सितं, किंत्वयं
सकृत्प्रणतिमात्रतो वितरतीह मुक्तिं शिवः ।
अगे प्रणयमाश्रयन्नपि बिभर्ति नागे रुचिं
जनैरिति नुतं शिवं बहु ननाम गोकर्णगम् ॥ ४३ ॥
तमो व्यनशदाश्रितो रविर्मृते प्रभासङ्गता,-
दनौषधवराप्लवादिह शशी विमुक्तः क्षयात्, ।
अथैष समलोकयत्प्रणतमुक्तिदां द्वारकां
सुरोचितसुखं नरैरपि यदाश्रितैर्भुज्यते ॥ ४४ ॥
विमोचयति संसृतेः स यमलार्जुने संयतो ऽ,-
प्यतीव विशदं यशस्तनुत एष कृष्णो ऽपि सन्, ।
इतो ऽजनि पितामहो वटदले शयानाच्छिशो,-
र्गुणानिति गृणन् हरेर्व्यतरदत्र पुष्पाञ्जलीन् ॥ ४५ ॥

---

१ निन्दया निन्दाभिव्यक्तिरूपा व्याजनिन्दा ।

२ स्वयमुक्तस्य प्रतिषेधरूप आक्षेपः । ३ विधिना निषेधावगमनरूप आक्षेपः । ४ निषेधेन विध्यभिव्यक्तिरूप आक्षेपः ।

५ विरोधाभासः । अगे पर्वते प्रीतिं वहन्नपि अगे रुचिं न बिभर्तीति विरोधः नागे सर्पे इति परिहारः । ६ कारणाभावेऽपि कार्योत्पत्तिरूपा विभावना ।

७ हेतूनामसामग्र्येऽपि कार्योत्पत्तिरूपा विभावना ।

८ प्रतिबन्धकसत्त्वेऽपि कार्योत्पत्तिरूपा विभावना ।

९ अकारणात्कार्योत्पत्तिरूपा विभावना ।

१० विरुद्धात्कार्योत्पत्तिरूपा विभावना ।

११ कार्यात्कारणोत्पत्तिरूपा विभावना ।

हृते ऽग्रजनिहाटके गुरुवराङ्गनासङ्गमे
कृते ऽपि वदने ऽर्पिते ऽपि च सुराघटे मानवैः ।
हृते द्विजशते ऽपि यत्सलिलसेविभिर्नाप्यते
कदा ऽपि यमयातना ऽगमदथैष तत्पुष्करम् ॥ ४६ ॥

सदम्बुकणिका दहेदखिलपातकानीति कै-
रबोधि, तदुदाहृतिर्वहति यत्र शिप्रा नदी ।
य आश्रयदवन्तिकां पितृगणो ऽस्य नाके ऽवसत्,
जिगीषुरलकामियं सुरपुरीं श्रिया ऽत्यक्रमीत्, ॥ ४७ ॥

समर्च्य विधिना महोपपदमत्र कालेश्वरम्
प्रहर्षयितुमाप्लुतान्सुरभिर्नर्मदां नर्मदाम् ।
वगाह्य समङ्केश्वरप्रणवनाथपूजाविधेः
परं मथुरयोत्सुको निरगमत्ततो ऽसावलिः ॥ ४८ ॥

क्व कालियमहाफणी क्व मधुरो यशोदासुतो,
निहन्तुममुमुद्यतः स निरवास्यत स्वह्रदात्, ।
अयं हलिसखो वशे ऽकुरुत कौशलेनाङ्गनाः,
सुयुक्त इह माधवे सुमनसां विकासः परः, ॥ ४९ ॥

अमुष्य यमुनातटोद्भवतयोचिता कृष्णता,
पदार्थ्यलभतामुतः स सहसा ऽऽपदं पौण्ड्रकः, ।

---

१ कारणे सत्यपि कार्यानुत्पत्तिरूपा विशेषोक्तिः ।

२ अर्थनिष्पत्तेरसंभाव्यत्वरूपोऽसंभवः । ३ कार्यहेत्वोर्भिन्नदेशत्वरूपाऽसङ्गतिः । ४ अन्यत्र करणीयस्यान्यत्रकरणरूपाऽसङ्गतिः ।

५ अन्यत्कर्तुं प्रवृत्तस्य तद्विरुद्धकरणरूपाऽसङ्गतिः । नर्मणा प्रत्युत कोपसंभवात् ।

६ अननुरूपघटनारूपं विषमम् । ७ अनिष्टाप्तिरूपं विषमम् ।

८ विरूपकार्योत्पत्तिरूपं विषमम् । ९ अनुरूपघटनारूपं समम् । १० सरूपकार्योत्पत्तिरूपं समम् । ११ इष्टावाप्तिरूपं समम् । पौण्ड्रको राजा वासुदेवपदं स्वगतं कामयमान आपदं कृष्णात्प्रापेति पुराणे प्रसिद्धम् । पदं प्रापेति श्लेषेणोक्तावपि ।

बलेः सदसि वामनो ऽजनि जगत्त्रयक्रान्तये,
पुरा ऽयमिति तुष्टुवे स मथुरापुरे श्रीपतिम् ॥ ५० ॥
अथोदितसरस्वतीजलरुचिः कुरुक्षेत्रगो
व्यलोकयत तान् ह्रदान् हसितवारिधीन्, येष्वहो ।
समस्तनृपविग्रहक्षरितशोणितौघः पुरा
ममौ, न तु ममौ यशो भृगुभटस्य भूमण्डले ॥ ५१ ॥
तनूकृतमपि क्रमादघमसंख्यतीर्थाटना-
न्मनो ऽत्यणु विलासिनो न खलु वोढुमत्राशकत् ।
अघक्षपणतो नरानुपकरोति तीर्थव्रजो,
ह्यमी तमुपकुर्वते विकलुषा यशःख्यापनात् ॥ ५२ ॥
ह्रदोऽप्यथ बलाद्धृता प्रयततीर्थदेवार्चनैः
कथास्वसदीश्वरश्रुतिवचस्स्वविश्वासिता ।
स दिक्षु च विदिक्षु चाप्यध उपर्यपश्यत्प्रभुं,
निरास दुरितं व्रतैः सुकृतमाप चानुत्तमम् ॥ ॥ ५३ ॥
विभेत्यलस आस्तिकः स्फुरति तीर्थसेवाश्रमात्,
सुखाय न बहिर्जडो व्रजति याति तस्मै सुधीः ।
विनश्यति मलं सतां प्रयततीर्थसंसेवना-
दनेन मतिरेधते स्फुरति तेन च ब्रह्म तत् ॥ ५४ ॥

---

१ फलप्राप्तये तद्विपरीतप्रयत्नारम्भरूपं विचित्रम् ।
२ आधाराधिक्यरूपमधिकम् । ३ आधेयाधिक्यरूपमधिकम् ।
४ आधेयादाधारस्य सूक्ष्मतारूपमल्पम् ।
५ अन्योन्योपकाररूपमन्योन्यम् । ६ प्रसिद्धाधारं विना ऽऽधेयवर्णनरूपो विशेषः । ७ एकस्यानेकत्र युगपदवस्थानरूपो विशेषः । ८ एकप्रयत्नेनानेकफलसंपादनरूपो विशेषः ।
९ एककार्यसंपादकस्य तद्विरुद्धकार्यार्थमुपादानरूपो व्याघातः ।
१० विरुद्धस्य सौकर्योपनिबन्धनरूपो व्याघातः ।
११ पूर्वपूर्वस्योत्तरोत्तरं प्रति हेतुत्वात् कारणमाला ।

सदागमवदो गुरुः सुमतिदश्च साध्वागमः
 सदाचरणकृन्मतिर्नियतमैक्षि[1] काश्मीरके, ।
अतो मनसि तत्स्पृहा तदपि नेत्रयोरग्रत-
 स्तदाविरभवेद्[2] द्रयादिह च सिद्धिदा शारदा ॥ ५५ ॥
यकास्ति भुवि भारतं विलसतीह काश्मीरकं
 सदा विजयते ऽत्र सा सरससूक्तिदा शारदा[3], ।
धनैः सुभगवाक्क्रमैः सुरभिकुङ्कुमै[4]र्भूरियं
 जिगाय हि सदा ऽलकामथ सुधां च कस्तूरिकाम् ॥५६॥
विहाय जडता ऽऽननं कवयतां वितस्तां[5]मगा,-
 दिहास्त हृदयं पुरा तनुरुवास[6] पश्चादलेः, ।
समर्प्य पदम्[7]ग्रहीत्सुखभरं स काश्मीरकां,-
 द्वितीयं फलकुङ्कुमान्यहरदेतदस्माच्छ्रमम्, ॥ ५७ ॥
अथो हिमगिरेः पथा कनखलं शनैः प्रा[8]विश-
 त्सरिन्मुनिवराश्रमानधिवसंश्च मायापुरीम् ।
इह द्युसरितीक्ष्यते न पुन[9]रिन्द्रिये चापलं,
 पतन्ति नतयो नृणामिह च भागधेयानि[10] वा, ॥ ५८ ॥
य एति नमतीक्षते ऽर्चति च नौति[11] दक्षेश्वरं
 पुनाति गिरिशः सती सुरसरि[12]च्च तं मानवम् ।

---

१ गृहीतमुक्तरीत्याऽर्थनिबन्धनरूपा एकावलिः । २ दीपकैकावलीयोगाद् मालादीपकम् । ३ उत्तरोत्तरमुत्कर्षरूपः सारः ।
४ क्रमेणान्वयरूपं यथासंख्यम् । ५ एकस्य पर्यायेणानेकाश्रयरूपः पर्यायः । ६ एकत्रानेकावस्थानरूपः पर्यायः ।
७ अल्पेनाधिकग्रहणरूपा परिवृत्तिः ।
८ अधिकदानेन हीनग्रहणरूपा परिवृत्तिः ।
९ एकस्मिन् निषिध्यापरस्मिन् वस्तुनियमनरूपा परिसंख्या ।
१० तुल्यबलयोर्विरोधे विकल्पः । ११ बहूनां क्रियाणां यौगपद्यरूपः समुच्चयः । १२ अनेकेषामेककार्ये संवादरूपः समुच्चयः ।

विभेत्यथ च वेपते ऽपि च पलायते क्षीयते
 ततः सुकृतकारिणः सकलमेव पापं क्षणात् ॥ ५९ ॥
इयेष च तपोवनं स गिरिगूढमासेवितुं
 तदैव वहवो जना ददृशिरे च तत्कान्त्रिकाः, ।
विशुद्धिरिह पापिभिः सततधिक्कृतो ऽप्यक्षम-
 स्तदीयमिति पातकं किल निहन्ति तेषां यमः ॥ ६० ॥
खगा अपि शमे रताः किमुत तत्र भूमीसुरा,
 विभीरहिभुजः पुरो ह्यनुकरोत्यहिस्ताण्डवम्, ।
श्रुतेक्षितसुराङ्गनासरसगीतिनृत्या अमी
 समाध्यशिथिला द्विजाः, किमिव विघ्नकृद्योगिनाम्, ॥६१॥
गृहानुपगतो ऽतिथिर्गुरुवदर्च्यते साधुभि,
 विलास्ययमिहाश्रमे ऽलभत कन्दमूलं ततः, ।
अतीतृर्पदमुं जलैरिह च को ऽपि, नैसर्गिकी
 दया खलु तपस्विनां, श्रमणया ऽऽर्चि यद्राघवः ॥ ६२ ॥
सशैलचिरवासतो दृढमेतिस्ततः प्रस्थितो
 ययौ वदरिकाश्रमं पथिमिलद्धृषीकेशदृक् ।
निदाघशतकं यदि क्रममपीास्य तत्रापते-
 द्भवेदपि कदा चनातपभपथ्यं स्थितानामिह ॥ ६३ ॥

---

१ एकगतक्रमिकानेकक्रियागुम्फरूपं कारकदीपकम् ।
२ कारणान्तरसन्निधेः कार्यसौकर्यरूपः समाधिः ।
३ वलवतः शत्रोः पक्षे पराक्रमरूपं प्रत्यनीकम् ।
४ कैमुत्येनार्थसांसिद्धिरूपा काव्यार्थापत्तिः । ५ वाक्यार्थहेतुकं काव्यलिङ्गम् । ६ सामान्येन विशेषसमर्थनरूपो ऽर्थान्तरन्यासः ।
७ विशेषेण सामान्यसमर्थनरूपो ऽर्थान्तरन्यासः ।
८ विशेष सामान्याविशेषनिबन्धनरूपो विकस्वरः ।
९ उत्कर्षाहेतौ तद्धेतुत्ववर्णनरूपा प्रौढोक्तिः ।
१० [illegible]

प्रकाशचरणोरगैः खगकुलैरनण्डोद्भवै-
रिहाघशुपमीयिते धृतगुरुच्छदैर्मानवैः, ।
अभूत्क्षपितकल्मषो विविधतीर्थसंसेवना-
दिहायमुदिते रवौ विरचितप्रदीपावलिः ॥ ६४ ॥

इहर्षिमभिलष्यता स ददृशे यदृच्छागतः,
स वन्दित उदैरयच्छुतिगिरा ऽऽशिषो मोक्षदाः, ।
तदर्थमननोन्मुखो ऽध्यगमदेष रूपं निजं,
वचोविभवलङ्घिनी बदरिकाश्रमे पुण्यता ॥ ६५ ॥

समर्च्य विधिवत्स्थितं नरमथापि नारायणं
विलासिनि विभन्त्सुभिर्दुलमवापि विघ्नैर्लयः, ।
परेशकृपया नरो भवति सिद्धिमान्,नत्र चा-
प्यनिष्टकरणोद्यतैः कुमतिभिः क्षयः प्राप्यते ॥ ६६ ॥

विविक्तवनसेविनो मृगयवो मृगान् घ्नन्त्यहो,
सुरभ्युदयते ऽम्बुजं सरसि गाढपङ्के ऽपि च, ।
अतश्च भवितव्यता बलवती तमित्थं भुवः
प्रदक्षिणमकारय,न्ननु निमित्तमासीदलिः ॥ ६७ ॥

अभूद्वदि विलासिनो भवतु नित्यमीदृक् श्रमो ऽ-
न्वहं नवनवेक्षणाद्भवति हि प्रसादो ऽत्र मे ।

---

१ एकमिथ्यात्वसिद्धये मिथ्यार्थान्तरकल्पनारूपा मिथ्याध्यवसितिः । २ प्रस्तुते तद्वृत्तान्तप्रतिबिम्ववर्णनरूपं ललितम् ।

३ यत्नं विनेष्टार्थलाभरूपं प्रहर्षणम् । ४ अधिकार्थालाभरूपं प्रहर्षणम् । ५ उपायार्थिनः फललाभरूपं प्रहर्षणम् ।

६ इष्यमाणविरुद्धार्थप्राप्तिरूपं विषादनम् । ७ परगुणेन गुणप्राप्तिरूपउल्लासः । ८ दोषेण दोषरूपः उल्लासः ।

९ गुणेन गुणाभावरूपाऽवज्ञा ।

१० दोषेण दोषाभावरूपाऽवज्ञा ।

११ दोषस्यैव गुणदर्शनात् प्रार्थनारूपा अनुज्ञा ।

धिगाढ्यमपि यो गृहे वसति कूपमण्डूकव-
न्ममायमपरिग्रहो ऽद्भुतनिरीक्षणाद्रोचते[1] ॥ ६८ ॥
जसौजसि हि यो लगत्यथ च तस्य पृथ्वी वशे
भवत्व,तिकटूदयं त,द्लसत्त्वमत्रोचितम् ।
अपामरजसंमतं हितमसङ्गतासेवनं,
यतो ऽत्र हृदि मुद्रयाद्भवति, सैव रत्नावली ॥ ६९ ॥
हिमाचलरुचा सितो भवति यत्र कृष्णो हरि,-
र्हरिन्मणिविभूषणैः पुनरुपैत्यसौ कृष्णताम्, ।
निशास्वपि रविप्रभौषधिशतैरिहारभ्यते,
हरन्नपि मलं नृणां विशद एव नारायणः, ॥ ७० ॥
हिमाद्रिसितिशुक्लतां हरियशोभिराप्नोत्यसा,-
विह स्फटिकभूर्हिमावृतभुवः पृथग्लक्ष्यते, ।
विदन्ति बुधपामरा इह तुषारहीरौ समं
विरक्तिसितभास्वरच्छविनिदानभेदस्तयोः, ॥ ७१ ॥

---

१ गुणे दोषत्वकल्पनारूपो लेशः । २ दोषे गुणत्वकल्पनारूपो लेशः । ३ जसं हिंसकमोजः शौर्यं तस्मिन् यो लगति तस्य पुरुषस्य वशे पृथ्वी भवति । हिंसकादभीताः सर्वे तस्य वश्या भवन्तीत्यर्थः । अथ च जगणसगणजगणसगणयगणा लघुगुरू च संनिवेशिताश्चेत् पृथ्वीनामच्छन्दः सिध्यतीत्यर्थान्तरेण मुद्रालङ्कारः ।

४ सत्त्वरजस्तमसां शब्दानामर्थान्तरतात्पर्यकाणां क्रमेण निवेशाद्रत्नावली । तदुभयमपि चतुर्थचरणे सूचितमिति मुद्रालङ्कारेण चारुतातिशयः । ५ स्वगुणत्यागादन्यदीयगुणग्रहणरूपस्तद्गुणः ।

६ पुनःस्वगुणसंप्राप्तिरूपं पूर्वरूपम् । ७ वस्तुविकारेऽपि पूर्वावस्थानुवृत्तिरूपं पूर्वरूपम् । ८ अन्यदीयगुणाग्रहणरूपोऽतद्गुणः । ९ पूर्वसिद्धगुणातिशयरूपोऽनुगुणः ।

१० सादृश्याद्भेदाग्रहणरूपं मीलितम् ।

११ सादृश्याद्विशेषाग्रहणरूपं सामान्यम् ।

प्रफुल्लनवमल्लिका सुरभिभावतो ज्ञायते,
हिमाच्च विशिनेष्ट्यहो दधि गिराविह स्निग्धता, ।
विराममधुनार्थये ऽध्ययनतस्तनुर्वेपते
जुहुध्यनलमित्यलं चलति शिष्यगुर्वोर्वचः ॥ ७२ ॥
अभाजि पथिकैर्लता कुसुमिता, ऽऽश्रमे कीदृशाः
प्रवान्ति मरुतो, ऽत्र के न तप आरभन्ते, जडाः ।
इतीह वनवासिनां निशमयन् विचित्रा गिरो
विलास्यलकनन्दया स्वसविधं समाकृष्यत ॥ ७३ ॥
विलासिनि शनैर्व्रजत्युपजहार दण्डं मुनि,-
विनिःश्वसति को ऽप्यमुं निजकुटीं समीपे ऽब्रवीत्, ।
अयं गिरिदिदृक्षुताग्रहजनस्मृती वर्णयन्
जुगोप च परिश्रमं तनुहृदोरजातत्वरः ॥ ७४ ॥
मतङ्गज सुरापगान्तिकतमेत्यवादीत्परो,
घंटी परमपेक्षितेत्यभिदधे ऽपरः सूचयन्, ।
शिवार्चनकृते सुमान्यवचिनोमि मे न श्रमं-
स्त्वि,ति व्यपदिशन्स तान्व्यरमयत्महासाद्धसन् ॥ ७५ ॥

---

१ भेदप्रतीतिरूपमुन्मीलितम् । २ विशेषप्रतीतिरूपो विशेषः । ३ साभिप्रायोत्तरदानरूपमुत्तरम् । ४ लता कैर्भग्नेति प्रश्न एव पथिकैः पान्थैरित्युत्तररूप इति चित्रोत्तरम् । ५ शीता मूर्खा-श्चेत्येकमेव प्रश्नद्वयोत्तरमिति चित्रोत्तरम् । ६ दण्डोपहारेण श्रमज्ञत्वसूचनात् सूक्ष्मम् । ७ कुट्याःसामीप्यबोधनेन चलना-शक्तिज्ञातत्वसूचनात् पिहितम् । ८ हेत्वन्तरकथनेनाकारगोपन-रूपा व्याजोक्तिः । ९ करिन् चण्डालजात गङ्गा मद्यधारा चेति नीचोद्देशेन गजं प्रति कथनाद् गूढोक्तिः ।

१० अल्पकलशः मुहूर्तार्धं च । अत्र सूचयान्निति तात्पर्यस्य कविनैवाविष्कृतत्वाद् विवृतोक्तिः ।

११ मर्मगुप्तये क्रियया परवञ्चनरूपा युक्तिः ।

व्रजेत् किमिति पर्वतं यदि तु लभ्यते ऽर्के मधु
स्थिरो भव तपश्चरन्निह पवित्रमेतत्स्थलम् ।
स केन चिदितीरितः प्रतिजगाद किं श्रेयसि
क्व चिद्भवति तृप्तिरित्यनुसरामि तीर्थान्तरम् ॥ ७६ ॥
नमेरुचिरसंश्रयात्प्रशममेति तापः सतां,
न हेमगिरिमर्थये, हिमगिरौ निवत्स्याम्यहम् ।
परानिति गिरा जयन् विततबर्हनृत्यच्छिखि-
प्रकामरमणीयताहृतविलोचनो ऽत्रावसत् ॥ ७७ ॥
तपोऽकृत भगीरथश्चिरमिहोद्धरिष्यन् पितॄन्,
मखो ऽत्र भविता कलेरुपरमे प्रपश्याम्यहम्, ।
अचार्यत स योगिनेत्यनुगिरं स्थलीरास्थया
हरिन्मणिगणप्रभास्थगितनव्यदूर्वाततीः ॥ ७८ ॥
इहैव भगवान् भवः परिणिनाय शैलात्मजा,-
मिहार्जुनकिरातयोः शरगणैरपूर्वम्बरम्, ।
मरुत्तमखतर्पितद्विजवरोज्झितैः काञ्चनैः
सुमेरुरिह निर्ममे, वनमहीरदर्शीति सः ॥ ७९ ॥
तमीशमभजत्स, यच्छिरसि तण्डुला अर्पिताः
सृजन्ति सुकृताङ्कुरा,न्भवति सा ऽस्य केदारता ।

---

१ लोकप्रवादानुकरणरूपा लोकोक्तिः । २ छेकोक्तिः । श्रेयासि केन तृप्यत इति लोकोक्तेरद्यापि मे दिदृक्षा न शान्तेत्याशयात् ।
३ नमेरूणां छायावृक्षाणामाश्रयादित्यर्थकस्य वाक्यस्य मेरोःपर्वतस्याश्रयेणेत्यर्थकरणाद् वक्रोक्तिः । ४ मयूरस्वाभाविकनृत्यवर्णनरूपा स्वभावोक्तिः । ५ भूतभाव्यर्थसाक्षात्कारवर्णनरूपं भाविकम् ।
६ समृद्धिमद्वस्तुवर्णनरूपमुदात्तम् ।
७ प्रसिद्धान्योपलक्षणमुदात्तम् ।
८ अद्भुतमिथ्यैश्वर्यवर्णनरूपा अत्युक्तिः ।
९ योगेन नाम्नोऽन्यार्थत्ववर्णनरूपा निरुक्तिः ।

न यत्र सुकरा गतिः सकलतीर्थव,त्किन्तु सा
सरिच्छिखरिहिम्यभूक्रमणकष्टयात्रा किल ॥ ८० ॥
भवन्ति यदवेक्षणश्रमत आस्तिका आस्तिका,
असौ भवति मुक्तये सकृदपि स्वपूजाकृताम् ।
यदीयकरुणालवा हरिकुबेरशक्रश्रियो,
न यस्य गुणवर्णने क्षममलंकृतीहाशतम् ॥ ८१ ॥
विदेहनृपनन्दिनी करसरोरुहप्रोद्यत-
स्वयंवरणमालिकामधुमलिम्लुचेन्दिन्दिरैः ।
यदङ्गचिरसङ्गतिप्रणयिनीः कटाक्षच्छटा
निगूहति सखीजनाद्धृदि स मे ऽस्त्वयोध्यापतिः ॥ ८२ ॥
स्वजानुयुगरिङ्गणोच्चलदुलूखलैकाहति-
प्रभग्नयमलार्जुनोल्बणरवश्रुतिव्यग्रया ।
स्खलद्गति यशोदया स भयशङ्कमङ्के धृतो
हसन्मनसि मामके लसतु माथुरो बालकः ॥ ८३ ॥
शिवावमतिपातकासहनवीरभद्रोद्धृत-
स्वमस्तकफलार्पणानुनयलब्धवस्तानन: ।
विहाय मदमस्तुतास्फुटगिरैव दक्षो ऽपि यं,
प्रसीदतु दयानिधिः कनखले स दक्षेश्वरः ॥ ८४ ॥

---

१ प्रसिद्धनिषेधवर्णनरूपः प्रतिषेधः । २ सिद्धस्यैव विधानरूपो विधिः । ३ कार्येण सह कारणस्य वर्णनरूपो हेतुः ।

४ कार्यकारणयोरभेदरूपो हेतुः । ५ कृतिनां पण्डितानां चेष्टाशतं न पर्याप्तम् । अलङ्काराणां निर्माणशतं समाप्तमित्यर्थान्तरम् ।

६ शृङ्गारस्य कविसमवेतरतिभावं प्रत्यङ्गत्वाद्रसवदलङ्कारः ।

७ सुतविषयकयशोदारतिभावस्य कविसमवेतकृष्णरतिं प्रत्यङ्गत्वात्प्रेयोऽलङ्कारः । ८ रिपुविषयकरत्याभासस्य कविरतिं प्रत्यङ्गत्वादूर्जस्विनामाऽलङ्कारः ।

क्षुधा ऽपहृतधीः पराशरसुतो ऽपराध्यत्वयं,
प्रभो भवदनुग्रहो ननु रुणद्धि विघ्नानिह, ।
क्षणभ्रुकुटिभीरुभिर्मुनिजनैरिति प्रार्थितः
प्रसादसुमुखो हृदि स्फुरतु काशिकाधीश्वरः ॥ ८५ ॥
सुरान्तरवधीरितं शिशुमनेडमूकं हृदा
स्वपादकमलानतं क्षणमवेक्ष्य काञ्चीपुरे ।
कवीन्द्रकुलदुर्लभातुलितसूक्तिधाराशतैः
पिपर्ति भवतीं विना कथय कैव कामाक्ष्यहो ॥ ८६ ॥
स्वभक्तनिधनोद्यते भ्रुकुटिभीषणो यो ऽन्तके,
ददौ च शरणागते ऽभयवरान् मृकण्डोः सुते, ।
जयत्ययमवन्तिकामधिवसन् महाकालता-
प्रपन्नकरुणाश्रितं युगपदुद्वहन् शङ्करः ॥ ८७ ॥
मुने समभिवादये, किमसुरो ऽनिरुद्धं छला-
द्बबन्ध, सुत मा त्रसीः, खगपते त्वरस्व,ः खल, ।
क शार्ङ्ग,मिति संभ्रमाद्बहुविधं वचो व्याहरन
प्रसीदतु हरिश्चिरं मयि विभूषयन् द्वारकाम् ॥ ८८ ॥
स्मरन्निति स सप्त ता जगति मोक्षदात्रीः पुरीः
प्रफुल्लसुरभिद्रुमे मृदुसमीरणे ऽस्मिन्वने ।
प्रकाममधुरैः फलैः सुरसरिज्जलैर्वर्तयन्
पिकालिसुभगध्वनीन् निशमयन् न्यवात्सीच्चिरम् ॥८९॥
प्रयाव सदनं सखे स्मरसि किं न बन्धून् प्रियान,
त्वरस्व, चिरमत्र नौ निवसतोरभूद्विश्रमः, ।

---

१ कोपशमस्य रतिं प्रत्यङ्गत्वात् समाहितमलङ्कारः ।

२. भक्तविषयकरतिभावोदयस्य कामाक्षीरतिं प्रत्यङ्गत्वाद् भावोदयोऽलङ्कारः । ३ कोपप्रसादयोःसंधिः शिवरताबङ्गमिति भावसंधिरलङ्कारः । ४ रत्यादीनां शैवलता हरिरताबङ्गमिति भावशवलताऽलङ्कारः । ५ इन्द्रियपञ्चकजप्रत्यक्षवर्णनात् प्रत्यक्षप्रमाणालङ्कारः ।

तदाशयबुभुत्सयेत्यभिहितो ऽलिना ऽसौ यदा
　शिरो ऽनमयता, ऽमुना ह्यनुमिमे विरक्तिस्तदा ॥ ९० ॥
अवोचत विलास्यलिं, सदनमद्य कारोपमं
　स्वतन्त्रगतिरोधनान्मम विभाति सत्यं गुरो ।
शुदन्ति तनयादयो मशकवन्निजेष्टाप्तये,
　त्यजन्त्यपहृतामिषं श्ववदिमं गृहं रङ्कवत् ॥ ९१ ॥
श्रुतिर्हितमुपादिशद्द्विजहतैषणानां त्रयं
　नरेण सुखमाप्यते ऽतिलघुभैक्षचर्यावता ।
उपाहसमहं पुरा धनमदान्धदृष्टिस्तु या-
　मवैम्यवितथां भवत्प्रवचनाञ्जनैरद्य ताम् ॥ ९२ ॥
उपैमि परमेश्वरो नियतमस्त्यनस्मत्क्रिया-
　सुसाधरचनाक्षमो विजनकाननासेवनात् ।
इहापि कथमन्यथा सलिलकन्दमूलैः फलै-
　रकिञ्चनतया भवेत्कथय मादृशां जीवनम् ॥ ९३ ॥
चिरं निवसता मया न ददृशे ऽत्र बीजं वपन्
　कृषन्नपि महीं नरः क्व चिदतो न कर्तेह सः ।
अकर्तृकमिदं कथं, जनिमतो हि कर्ता ध्रुवो
　विविक्तमिति रोचते ऽनुमितिदार्ढ्यसम्पत्तये ॥ ९४ ॥
स्वभाव इति वोच्यतां नियतिमाश्रयस्वाथ वा
　निदानमिह चेतना प्रथमतस्तु संभाव्यते ।
गले पतति कर्तृतातनुसमीक्षणात्सा ततो,
　मुमुक्षुरत ईहते प्रथमभूमिकां निर्जनम् ॥ ९५ ॥

---

१ शिरोनमनेन गृहगमनानिच्छाया अनुमानादनुमानप्रमाणालङ्कारः ।
२ उपमितिप्रमाणालंकारः ।　३ शाब्दप्रमाणालङ्कारः ।
४ अर्थापत्तिप्रमाणालंकारः ।　५ अनुपलब्धिप्रमाणालङ्कारः ।
६ संभवप्रमाणालङ्कारः ।

गृहे भवति दोष इत्यवितथः प्रवादो यतो
नरैककृतिगोचरे ऽखिल इहेक्षिते वस्तुनि ।
अदृष्टनरदुष्कराचलसरिद्विनो नाश्रये-
त्परेश,मनुमीयते भुवि हि कार्यतः कारणम् ॥ ९६ ॥
महीभ्रमणकर्षणैरिति विलासिहृच्छोधयन्
सुराङ्घ्रिरजसां चये सुकृतबीजमत्रावपन् ।
प्रसिच्य मुहुरादरात्तदतिपूततीर्थाम्बुभिः
क्रमादलिकृपीवलो ऽजनयदास्तिकत्वाङ्कुरम् ॥ ९७ ॥
श्रमाहृतमहामखोन्नदभिरामसामध्वनि-
प्रकाममुदितामरद्विजसमाजमालोकयन् ।
प्रणामशतमादरात्सततमाचरन्संभ्रमात्
क्रमादनुपमामयं सरितमाप मन्दाकिनीम् ॥ ९८ ॥
विशङ्कटतटीनटद्द्रुमपतत्प्रसूनावली
विलासिन इहातनोदतनुफेनपुञ्जभ्रमम्, ।
अलिस्तु मधुसौरभानुसृतिकैतवादापतन्
न्यवर्तयदमुं सतां किमपि बोधने कौशलम् ॥ ९९ ॥
अतीत्य जनदुर्गमां तुहिनतुङ्गशृङ्गावली-
मनङ्गमदभङ्गकृत्त्रिनयनोत्तमाङ्गच्युताम् ।
इदंप्रथमदर्शनामचलमूर्ध्नि गङ्गोत्तरी-
पदेन विदिते तटे ऽभजदथैष भागीरथीम् ॥ १०० ॥
भगीरथमहीभृता तपसि तिष्ठता धूर्जटे-
र्जटापटलसङ्कटादियममोच्चि, तत्तत्पितॄन् ।
अमोचयत संसृतेः प्रतिविधित्सये,त्यङ्गता
स्मरन्नपि हि मुच्यते जगति को ऽपि भागीरथीम् ॥१०१॥

---

१ ऐतिह्यप्रमाणालङ्कारः । २ उपमारूपकयोःसन्देहसंकरः ।
३ वृत्त्यनुप्रासः । ४ भ्रान्तिमदपह्नुत्यर्थान्तरन्यासानामङ्गा-
ङ्गिभावसंकरः । ५ छेकवृत्त्यनुप्रासयोःसंसृष्टिः । ६ परिवृत्तिका-

समाधिनिरतान् क चित्क चन दीक्षितानध्वरेऽ-
न्यतश्च हरिकीर्तनावसरलुप्तदेहस्मृतीन् ।
परत्र शतरुद्रियश्रुतिजपाभिषिक्तेश्वरान्
विलोक्य वचनेष्वलेरिह शनैर्विलास्याश्वसीत् ॥ १०२ ॥
अनेकपथगामिना मुहुरवेक्ष्य तत्रास्तिकान्
उपास्तिषु मखक्रियास्वथ च निर्विकल्पस्थितौ ।
हिताय कतमा भवेदिति स संशयानो ऽप्यभू-
च्छ्रुतीरितनिजोचितान्यतमसाधने निश्चितः ॥ १०३ ॥
तमेव विनयादलिं शरणमाश्रयाम्यहितं
क्षमेत विशयावलिं चिरमनाययाऽपोहितुम् ।
असाविति विचारयन् तमनमद्विलासी वचो
रसानतिरुचाऽर्पयन् कमलमञ्जुलाक्षोऽवदत् ॥ १०४ ॥
स्मरस्य मलयोद्भवः कथय को नु वातो गुरो,
प्रियं न नयशालिनामतिभयाच्च कस्माद्वनम्, ।

व्यलिङ्गयोरेकवाचकानुप्रवेशसंकरः । तस्याप्यर्थान्तरन्यासोत्थापितापह्नुतिसंकरेणाङ्गाङ्गिभावसंकरः ।

१ चित्रवक्रोक्त्यनुप्रासगूढश्लेषप्रहेलिकाः । प्रश्नोत्तरं च यमकमष्टालंकृतो ध्वनावितयष्टौ शब्दालंकाराः । तत्र वक्रोक्तिः ७७ श्लोके अनुप्रासः १८ । १०० श्लोकयोः श्लेषः ३१ । ३२ । ३३ श्लोकेषु प्रदर्शिताः । इदं पादगोमूत्रिकाचित्रम् ।

अस्य न्यासः ।

त व न द श ण श्र म्या तं
मे वि या लिं र मा या हि
क्ष त श व चि म य पो तुम ।
अ वि वि र त न द्वि सीं चो
सा ति चा यन् भ म ला व
र न रु, र्प क ल ञ्जु क्षो दत् ॥

तरिं भवपयोनिधेर्निजगदुश्च कं पण्डिताः,
समाधिरिह हस्तगोऽप्यचतुरैर्नरैर्दुर्लभः[1] ॥ १०५ ॥
गुरौ जगति सर्वतो भवति दुर्दशा काऽमिता,
नरस्य मणिविभ्रमं जनयतीह का च च्छविः, ।
वृते श्रुतिधनैर्हिमालयतपोवने नास्ति कोऽ,-
नुयोगचरमाक्षरैरलिरिहोत्तराण्यब्रवीत्[2] ॥ १०६ ॥
समस्तवसुधाकृतालयनिलिम्पपुष्पावली-
समस्तवसुधाकृता ऽलय उपायतः स्वाशयः ।
न्यवेद्यत विलासिना प्रयतमानसत्वोचितं,
निशम्य मुमुदे ऽलिना प्रयतमानसत्त्वोचितम्[3] ॥ १०७ ॥
मनो बहुसुखं गिरा मम सदा नयस्त्वं गुरौ
शमस्य परमेश्वरो वितरितेह चामुत्र च ।
नरामहितदेवतानुसरणार्थिनो रोचते
क्रियाऽत्र कतमोच्यतां[4] कथय कर्म कर्ता च कः ॥ १०८ ॥
प्राच्योदीच्यसमस्ततीर्थसुमनःस्नानार्चनासेवनै-
र्नास्तिक्ये गलहस्तिते श्रुतिवचःश्रद्धाङ्कुरे रोहति ।
अलोच्य प्रयतं विलासिहृदयं स्वं च श्रमं सार्थकं
तुष्टो मीलितलोचनो ऽलिरचलश्चित्तेन दध्यौ शिवम् ॥ १०९


इत्यलिविलासिसंलापे खण्डकाव्ये
पञ्चमं शतकम् ।

---

१ गूढम् तकारस्थानगतो हकारश्चेत् वाहः अहिभयात् हरिरित्युत्तराणि ।

२ कामिता कामुकत्वमेव सर्वापेक्षया दुर्दशा काचस्य कान्तिर्मणिभ्रममुत्पादयति नास्तिकः पुरुषस्तपोवने नास्तीति प्रश्नोत्तरमलंकारः ।

३ यमकम् । संपूर्णभूमीविहितमन्दिराणां देवानां पुष्पपुञ्जतुल्यस्तोत्रामृतकरेण विलासिना । पवित्रचेतस्कतानुरूपम् । प्रयतमानानां मुमुक्षूणां सत्त्वस्यान्तःकरणशुद्धेर्योग्यम् । ३ अनयः शम् राः धनम् इति क्रियाकर्मकर्तृपदानि । क्रियादिगुप्तरूपा प्रहेलिका जातिः ।



अलिविलासिसंलापे

षष्ठशतकविषयानुक्रमणिका

शास्त्रीया इह वाजपेयविषयाः प्राधान्यतो दर्शिता(१)
युक्त्या काम्यमखप्रवर्तनकरी मीमांसकप्रक्रिया(२)॥
तद्वर्ह्यत्वफलाऽल्पताऽतिशयितानाशव्यवस्थापनै-
स्तत्सिद्धान्तनिराक्रिया(३)च गदिता संक्षिप्य षष्ठे शते ॥ १ ॥

---

(१) ३ श्लोकमारभ्य २० श्लोकपर्यन्तम् ।
(२) २२ „ ६५ „
(३) ६८ „ १०२ „

अलिविलासिसंलापे

षष्ठं शतकम् ।

शारदाऽमृतकरावदातया हस्तिनां पिदधती दृशा रदान् ।
भक्तपालनावधौ विशारदा शारदा स्फुरतु मानसे मम ॥ १ ॥
जातु चित्समममलिर्विलासिना स्वर्णदीतटतपोवनान्यटन् ।
श्रौतकर्मरासिकस्य कस्य चिद्वाजपेयमखमण्डपं ययौ ॥ २ ॥
तत्र साङ्गसकलत्रयीविदः स्नातकाः सुचरिता हुताग्नयः ।
ऊहतन्त्रविधिबाधकोविदाः सङ्घशो ददृशिरे महीसुराः ॥ ३ ॥
न्यायसञ्चितधनार्पणोत्सुकेनार्थिना च विदुषा क्षमेण सः ।
दीक्षितेन शरदि प्रवृद्धया श्रद्धया ऽध्वरवरो व्यतायत ॥ ४ ॥
ऋत्विजामिह हिरण्यमालिनां मण्डपे प्रचरतां यियक्षया ।
सार्चिषामपि हिरण्यरेतसां सूक्ष्मदृग्भिरपि नैक्ष्यतान्तरम् ॥ ५ ॥
आजिधावन[1]विधावहंयवो यज्वना यदपरे विजिग्यिरे ।
कर्मदेवै[2]र्निवहेषु तज्जयस्तेन निर्विशयमन्वमीयत ॥ ६ ॥
तत्र सप्तदशभिः प्रजापतिस्तूपरैः[3] पशुभिरिज्यते स्म यत् ।
सप्तलोकदशदिग्विसृत्वरीं तेन कीर्तिरुदियाय सुत्वनः ॥ ७ ॥
कः प्रशास्तरि पुरोनुवाक्यया याज्यया सुरगणाय होतरि ।
दातुमादिशति हव्यमीक्षको नान्वमोदत तयोर्वचःक्रमम् ॥ ८ ॥
साम सामयिकमुद्गिरत्यथोद्गातरि व्युपरताखिलक्रियः ।
यज्ञवाटगजनो ऽस्खलत्क्रमानृत्विजो ऽस्तुत निनिन्द चाद्भुतम्[4] ॥ ९ ॥
कश्चिदत्र विमतः सुराग्रहे तद्विशेषविधिवाक्यदर्शिना ।
जैमिनीयनयपारदृश्वना धीमता ऽल्पधिषणः समादधे ॥ १० ॥

---

१ वाजपेये ऋत्विजो यजमानश्च पृथग्रथानारुह्य बाणान् क्षिपन्तो धावन्ति तदाजिधावनकर्म । २ कर्मणा देवत्वं प्राप्ताः । तैत्तिरीयोपनिषदिप्रसिद्धाः । ३ अजातशृङ्गाः पशवः सप्तदश प्राजापत्यांस्तूपरान् पशूनालभतइति श्रुतिः । ४ सामश्रवणजनितानन्दपारवश्येन स्खलनसंभवकालेऽपि सावधानत दर्शनान्नीरसत्वानुमानाच्च ।

पावनानि पठता मुहुर्यजूंष्यारुरोहयिषुणा त्रिविष्टपम् ।
स्वर्गराज्यगतबाधसिद्धये ऽध्वर्युणा स्थपतिरभ्यषिच्यत ॥ ११ ॥
तं बृहस्पतिसवद्वयान्तरादिष्टदृष्टबहुवैभवक्रमम् ।
वाजपेयमखिलं प्रपश्यता सालिना ऽत्र मुमुदे विलासिना ॥१२॥
विस्तृताशयतमानदीक्षितो वाडवाऽशितरसो ऽतिदुस्तरः ।
दानवारिवरदत्तसद्रमो वाजपेयजलधिः स पप्रथे ॥ १३ ॥
उत्करम्भमधिपाशुकामितं काञ्चनच्छविमलौकिकीं श्रितम् ।
पावनानि सवनानि बिभ्रतं वाजपेयकनकाद्रिमैक्षत ॥ १४ ॥
सारवप्रसरयूपशोभिताद्भक्तितः कुशलवादिसेवितात् ।
वाजपेयरघुनाथपत्तनान्न व्यरम्यत विलासिना चिरम् ॥ १५ ॥
सामरागरुचिधारिनन्दने सोमसङ्गतसुराग्रहाश्रिते ।
वाजपेयसुरधाम्नि निर्वृतिं देवराडिव विलास्यविन्दत ॥ १६ ॥

---

१ बृहस्पतिसवेनेष्ट्वा वाजपेयेन यजेत वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति श्रुतेः बृहस्पतिसवनामकयागद्वयमध्ये वाजपेययागानुष्ठानम् ।

२ विस्तृता स्वर्गे आशा यस्य तादृशो यत्नवान् दीक्षितो यत्र । विस्तृतं आशयेऽन्तस्तमो यस्य नदीभिः पतित्वादवलोकित इति द्वे पदे वा । ३ बडवैर्विप्रैर्वाडवेन वन्हिनाऽशितः सोमरसो जलं वा यत्र । ४ दानवारये विष्णवे वराय दत्ता सद्रमा लक्ष्मीर्येन । दानजलेन वररूपेण दत्ता लक्ष्मीर्यत्र । ५ उत्कण्ठिता रम्भाऽप्सरोविशेषो यत्र । उद्धृताःकरम्भा दधिसक्तवो यत्र ।

६ अधिपैराजभिरप्याश्वमीप्सितम् । अधिकेन पाशुकेन तन्त्रेणामितम् । ७ सुवर्णस्यानिर्वचनीयां च । ८ सवनानि त्रीणि स इति पृथक्पदं वा । ९ सारौ दृढौ वप्रौ तटौ यस्यास्तादृश्या सरय्वा नद्या । सारवःसमन्त्रशब्दः प्रसर उच्छ्रयणं यस्य तादृशेन यूपेन ।

१० कुशलवप्रभृतिभिर्नृपैः कुशलैर्वादिभिः पण्डितैश्च ।

११ अमरागाणां कल्पवृक्षाणां शोभां धारयता नन्दनेन वनेन सहिते । साम्नां रागेषु गीतिषु प्रीतिमतां मोददे । १२ शिवयुक्तैर्देवैराग्रहेणाभिनिवेशेनाश्रिते । सोमरसयुक्तसुराग्रहैर्यज्ञपात्रविशेषैरन्विते ।

भूयसा धनवता दिवं पराभूय साधनचयेन यज्ञभूः ।
दिद्युते सुरसंभाजनादरं प्राप्तभासुरसभाजनादरम् ॥ १७ ॥
तत्र तूपरवसाधनात्परं भूरितूपरवसा ऽभवद्धुता ।
प्रोक्तशस्त्रसदसीक्षितं क्षतं प्रायशस्त्रसदसीमपातकम् ॥ १८ ॥
साधिकारजनपुण्यसाधिका वाजपेयकृतिरश्रवा जपे ।
विस्मयाय भवति स्म विस्मयाकामितारतबुधासिकाऽमिता ॥ १९ ॥
वैदिके वचसि विश्वसन्नयं सन्नयं श्रुतमसाधु साधु वा ।
साधुवादपरविद्वदीक्षितो दीक्षितो ऽत्र विदधे यथोदितम् ॥ २० ॥
तं श्रुतिस्मृतिपुराणपारगैः कर्ममार्गमनुचिन्त्य संश्रितम् ।
ब्रह्मभूयसुखविश्लथादरेणालिरित्यभिदधे विलासिना ॥ २१ ॥
पश्य पश्य वनवासिनो ऽप्ययमू वेदराश्युदधिपारगानपि ।
ब्राह्मणान्विदधतो यियक्षया दारधेनुधनधान्यसङ्ग्रहम् ॥ २२ ॥
ऐहलौकिकसुखस्य नाशितामभ्युपैमि, विरमाम्यतस्ततः ।
पारलौकिकसुखं त्वनश्वरं संगिरे विबुधवादसंगरे ॥ २३ ॥
आयुरत्र परमं शतावधि, व्याधयो ऽन्तरभवास्तथा ऽऽधयः ।
स्वापशैशवजरासु किं सुखं, त्याज्यमल्पसुखमैहिकं ततः ॥ २४ ॥
तर्कयाम्युदितदोषकारणं योनिजत्वमथ वा महीस्थितिम् ।
कर्ममात्रजनिता तु विन्दते दुःखमेव सुखमेव वा तनुः ॥ २५ ॥
येन येन भुवि जन्यते तनुस्त्यज्यतां सकलमेव कर्म तत् ।
तेन दुःखसुखमिश्रताभयं सम्भवेन्न हि विमृश्यकारिणाम् ॥ २६ ॥

---

१ देवानामानन्दजननात् शीघ्रम् । २ प्राप्तः भासुरस्य सभाजनस्य आदरो यस्मिन् कर्मणि । ३ उपरवा यज्ञाङ्गगर्तविशेषाः ।
४ तूपरा अजातशृङ्गाः पशवः । ५ जपकाले श्रवणरहिता ।
६ गर्वरहितानां कामित्वेऽनासक्तानां बुधानामासनेन अमिता अनुपमा । ७ ब्रह्मभावः । ८ कर्मदेवानां नारकिणां च तनुः कर्ममात्रजा न योनिजेतिभावः ।

नारकित्वजनकं त्रयीविदा निन्द्यकर्म तु कथं कारयिष्यते ।
न प्रवृत्तिरिह दुःखमात्रदे कर्मणीक्षितचरी विवेकिनाम् ॥ २७ ॥
यः खलो ऽवमतवेदशासनः कर्म कुत्सितमिहाचरेद्धठात् ।
नारकीं तनुमवाप्य कर्मजां पच्यतां स नरकेषु, का क्षतिः ॥२८॥
स्वर्ग्यकर्म-जहतामनास्थया नारकित्वधरणिजनिक्षमे ।
कर्मणो ध्रुवमवारिते नृणां, सर्वकर्मविरहो ह्यसम्भवी ॥ २९ ॥
नाकगस्त्रिदशभावभृद्धुवा ऽस्वमताऽऽप्तसततप्रजागरः ।
सौख्यमेव विगदः सुधाशनाल्लप्स्यते किल सदेति साम्प्रतम् ॥३०॥
अप्सरोगणविलाससंभृतव्योमयानवरकामचारिणः ।
कल्पवृक्षपटलीसुरभ्युपच्छन्दितस्य वद के दुराधयः ॥ ३१ ॥
प्राप्य कल्पतरुमूलमात्मनो दुःखलेशरहितं ध्रुवं सुखम् ।
अर्थयेत सुकृती लभेत च, प्राज्ञ एष, न च ते मितम्पचाः ॥३२॥
अक्षयं सुकृतमाह हि श्रुतिर्वैश्वदेवमुखपर्वयाजिनाम् ।
सोमपानममृतत्वदं च, तन्न क्षयित्वभयमत्र युज्यते ॥ ३३ ॥
वेदवाध्यविषयामिहानुमां जन्यतानियतनाशसाध्यिकाम् ।
मानतां श्रुतिगिरामुपेत्य कस्तार्किको ऽर्हति सभासु भाषितुम् ॥३४॥
व्यापृतिर्न खलु कामनां विना, त्वं समाधिमपि मोक्षकामुकः ।
आश्रयस्य,हमिहाश्रये मखान् स्वर्गकाम, इति का भिदा ऽऽवयोः ॥
रात्रिसत्रनयतो ऽनिर्वृतं क्व चि,त्क्वापि कामपदसंनिधिश्रुतम् ।
विश्वजिन्नयसुकल्पमन्यथा स्यात्फलं, न विफला हि चोदना ॥३६॥
ज्ञानतो वदसि मोक्षमात्मन,स्तेन जन्यमपि नित्यमिच्छसि ।
यागजं सुखमुपेक्षसे भिया ऽनित्यमित्य,हह पक्षपातिता ॥ ३७ ॥

---

१ अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतम् इति श्रुतिः ।
२ अपाम सोमममृता अभूमेति श्रुतिः । ३ आर्थवादिकं फलम् । ४ अधिकारविधौ पठितम् । ५ प्रवर्तनानुपपत्त्याऽऽक्षितम् । ६ तमेव विदित्वाऽति मृत्युमेतीति श्रुतेः ।

वेद कः शमदमादिसाधनाऽनुष्ठितौ क्षपयतो ऽखिलं जनुः ।
आफलं तदनुवृत्तिमुत्तरेषूद्ध्वेष्वि,तरथा वृथा श्रमः ॥ ३८ ॥
अस्तितैकपरमार्थमद्वयं मोक्षमात्थ, वद तत्र किं सुखम् ।
तद्धि सिद्धमिति कामना कथं, तां विना ऽत्र किमिति प्रवर्तसे ॥ ३९ ॥
कर्मिणा सकृदनुष्ठितोदिताङ्गान्विताभिमतसप्ततन्तुना ।
गम्यते स्वरथ भुज्यते सुखं, कर्ममार्गमिति रोचयामहे ॥ ४० ॥
आत्मभिन्नसकलार्थनाशभृत्केन वा प्रलयकाल ईक्षितः ।
व्याप्तिदर्शनमृते च नानुमा, नाकलोकलयवाक् ततो मृषा[1] ॥ ४१ ॥
को ऽपि नोज्झति दिनोदयः स्वतः षष्टिदण्डपरतां तथेक्षणात् ।
व्याप्तिधीः प्रलयबाधिका बुधैः प्रत्यनीकविधया ऽत्र चोच्यते ॥ ४२ ॥
अध्वरेषु पशुबीजहिंसनात्प्रत्यवायलवशङ्कया ऽप्यलम् ।
वेद एव खलु पुण्यपापयोर्वेदकः, स विदधाति तान् यतः ॥ ४३ ॥
अध्वरप्रकरणस्थिता लिङः स्वार्थसङ्गतनिषिद्धकर्मणाम् ।
बोधयन्ति हि मखोपकारितां, ते न पुण्यजनकत्वबोधकाः ॥ ४४ ॥
वाक्यभेदभयत,स्तथा च तैर्यागसिद्धिरपि काममुच्यताम् ।
स्यान्निषेधवचनैश्च पातकं हिंसयेति, यदि कैश्चिदुच्यते ॥ ४५ ॥
तन्न युक्त,मखिलाङ्गकर्मणां न प्रधानफलतो ऽपरं फलम्[2] ।
दृश्यते क्व.चन लौकिके महावाक्य, इत्थमुचितं हि वैदिके ॥ ४६ ॥
लौकिका इव हि वैदिका[3] अपि स्वार्थबोधनकृतः पदोच्चयाः ।
तेन पुण्यजनकत्वबोधनाद्बाध्यते ऽङ्गगतपापहेतुता ॥ ४७ ॥
साध्यसाधनतयोर्विरुद्धयोर्नैकवस्तुनि कदापि सम्भवः ।
तेन साधनतया ऽन्विता क्रिया साध्यतां स्पृशति न प्रधानगा ॥ ४८ ॥

---

१ तथा च नाकलोकस्य नाशात्तत्रत्यसुखनाशः स्यादिति भीर्न कार्येति भावः । २ अङ्गानां प्रधानफलेनैव फलवत्त्वप्रसिद्धेः ।

३ य एव लौकिकास्त एव वैदिका इति न्यायात् ।

आदितेयनिवहो निपीड्यतां स्वर्गतो दितिसुतैर्विरोधतः ।
कर्मदेवगण एतयोः सम,स्तेन कैरपि न पीड्यते वृथा ॥ ४९ ॥
दुःखमिश्रणविनाशिते दिशा प्रोक्तयेत्थमुपमृद्य हृद्यया ।
स्वर्गलोकसुखसर्वकाम्यता लेशतोऽतिशयवर्जमुच्यते ॥ ५० ॥
काञ्चनाम्बुजमरन्दसौरभास्वादतुन्दिलमिलिन्दगुञ्जिता ।
नाकिनाऽमृतजला सुरापगा कल्पपादपवनेऽवगाह्यते ॥ ५१ ॥
मौक्तिकैः सिकतिलेऽथ तत्तटे पद्मरागहरिदश्मवेदिषु ।
सान्धिवेलमुपचीयते तप,श्चर्च्यते च सह नारदादिभिः ॥ ५२ ॥
कामगोज्ज्वलविमानमध्यगेनाप्सरःसरसगीतिभिः समम् ।
गन्धवाहमुपयुज्य शीतलं स्फाटिकं स्वसदनं प्रविश्यते ॥ ५३ ॥
कल्पपादपफलैः सहात्र स प्रह्वया सुभगदेवकन्यया ।
स्वादुनाऽमृतरसेन तर्प्यते, तद्धि तेन जितमात्मकर्मभिः ॥ ५४ ॥
हंसतूलशयनाप्तविश्रमं चन्द्रिकाऽऽतपविभेदवर्जिते ।
स्वप्रभे सुरपुरेऽटताऽऽप्यते वैजयन्तमणिचन्द्रशालिका ॥ ५५ ॥
अद्भुतं विभवमत्र पश्यता स्वोपमाध्वरिसुहृत्सहासिका ।
लभ्यते सुखकरी, ततस्ततश्चावरुह्य पुरसंपदीक्ष्यते ॥ ५६ ॥
आश्रमः सुरसरित्तटे क्व चित्, क्वाप्यहिंस्रपशुपक्षिकं वनम् ।
क्वापि रत्नगिरिश्रृङ्गकन्दरा, वेदशास्त्रविमलाः क्व चित्कथाः ॥ ५७ ॥
देवकोटिखुरली क्व चित्, क्व चिद्वीरपाणविवशा मरुद्भटाः ।
क्वापि हेतिततिकान्तिविद्युता, ऽन्यत्र वाजिरथकुञ्जरव्रजाः ॥ ५८ ॥

---

१ अदितिसुतानां दितिसुतैः सापत्नभ्रातृत्वप्रयुक्तस्वर्गाधिकारविषयककलहसंभवेऽपि कर्मोपार्जितफलैः तैत्तिरीयोपनिषत्प्रसिद्धैः कर्मदेवैर्नास्ति विरोधः। तेहि य एव तदानीमधिकारिणस्तेभ्यः फलं प्राप्स्यन्तीति।

२ सुरर्षिभिः। ३ अमरावतीस्थप्रासादः। ४ शिरोगृहम्।

५ ब्राह्मणानुकूलमिदं सर्वम्।

६ क्षत्रियप्रीतिकरमेतदखिलम्। खुरली कृत्रिमयुद्धम्।

रत्नराशिरपरत्र, चान्यतो वाससां विरजसां चयोऽद्भुतः।
गन्धमाल्यविपणिः फलैश्चिता, गोधनं क्व चन कामधुङ्मुखम्॥५९॥
सीधुपानवहुलस्खलत्पदं गीतयोऽथ गतयश्च कामिनाम्।
नाट्यनृत्तमणिदर्पणालया, वैणिका अमरगायनैः सह॥ ६०॥
एषु चेष्टमुपभुज्य मन्दिरे मानिनी विबुधवारकामिनी।
केलये चटुगिराऽनुनीयते, बुध्यतेऽथ पिकसारिकारुतैः॥६१॥
सर्वनाकिसुलभं फलं त्विदं, को वसन्तशरदुत्सवादिषु।
कल्पते ऽखिलविशेषवर्णने, नाकलोकविभवो वचोऽतिगः॥६२॥
किञ्च कर्मचयचोदिका श्रुतिर्भूयसी,ह्युपनिषत्तनीयसी।
कर्मिणश्च वहवो जनाः क्षितौ, वह्वनुग्रहनयो न सुत्यजः॥६३॥
कृत्वपेक्षितफलार्हचेतनं वास्तवैरथ च कल्पितैर्गुणैः।
स्तौति चेदुपनिषत् स्तवीतु सा,तावता त्यजति न क्रियान्वयम्॥६४॥
भूतवस्तुकथनेन किं फलं, शेषता ऽस्य नियता क्रियाविधौ।
शेषि कर्म विहितं निषेव्यतां, किं वने विषयशून्यचिन्तनैः॥६५॥
इत्युदीर्य विरतं विलासिनं चञ्चलं विषयभोगतृष्णया।
भीषयन् प्रशमयंश्च साध्वालिः प्रत्युवाच तदभीष्टवर्त्मना॥ ६६॥
आशयैव भृशमात्सि मोदका,नीक्षसे मधु, भृगुं न सङ्कटम्।
नापठीः किमखिलाः श्रुतीर्गुरोः, किं प्रलोभयसि मां, परीक्षसे॥६७॥
याज्ययाजयितृदक्षिणाहविर्देशकालगतशुद्ध्यपेक्षिणः।
दुष्करा अविकलाङ्गसम्पदः काम्यकर्मविधयः श्रुतीरिताः॥ ६८॥

---

१ वैश्याभिलषितम्। २ शूद्रसुखकरम्।

३ बहूनामनुग्रहो न्याय्य इति सर्वसंप्रतिपत्तेः।

४ देहेन्द्रियाणामिव नाशदर्शनाल्लोकद्वयसंबन्धिनमात्मानमुपगम्य तं नित्यत्वादिभिर्वास्तवैरद्वितीयत्वादिभिश्च कल्पितैर्गुणैर्यागकर्तृस्तुतिरूपार्थवादमात्रमुपनिषद इति भावः। ५ सिद्धपदार्थः। ६ अङ्गत्वम्। भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यत इति न्यायात्। ७ प्रधानम्।

द्वित्रदण्डवसुखण्डपण्डितान् संघटय्य यदि को ऽप्यदूषितान् ।
यागमत्र विदधीत, तावता स्यात्कथं बहु फलं त्वदीरितम् ॥६९॥
अग्निहोत्रविविधेष्टिसोमयागाश्वमेधफलमेकरूपताम् ।
चेद्व्रजे,त्प्रयततां प्रयासदे कः क्रतौ सुविहिताग्निहोत्रकः ॥ ७० ॥
तारतम्यममखिलैरुपागमं प्रोच्यते स्वफलतारम्यदम् ।
अन्यथा श्रमदचोदनावृथाभाव आपतति, नेष्यते तु सः ॥ ७१ ॥
स्वर्गतो लघुनि सद्मनि क्षणान् कांश्चिदाप्तवसुधाधिकाश्रियः ।
देवदूतगणपातितो महीमग्निहोत्रकृदुपैत्यतो ध्रुवम् ॥ ७२ ॥
सोमयाजिन इतो ऽधिकं सुखं स्वर्गराज्यमणु वाजपेयिनः ।
इन्द्रता ऽपि च शताश्वमेधिनः श्रूयते स्वकृतितारतम्यतः ॥ ७३ ॥
अन्यगां श्रियमवेक्ष्य भूयसीं दह्यमानमनसामसूयया ।
आधयो हि नियतास्त्रिविष्टपे, काम्यकर्म न तदिष्यते बुधैः ॥ ७४ ॥
कल्पवृक्षसुरधेनुसंनिधिं प्राप्तवानपि न कर्मयन्त्रितः ।
कामयेत नियताधिकं सुखं, ते ऽपि कर्मवशगा मितप्रदाः ॥ ७५ ॥
काम्यकर्मणि कृते ऽपि तत्फलं सद्य एव परिपच्यते कुतः ।
दुष्कृते सति पुराकृते तदा तत्फलं किमिति न प्रसाध्यते ॥ ७६ ॥
दुर्बलत्वसबलत्वनिर्णयो दुर्लभो ऽत्र परमेश्वरादृते ।
वेत्ति यो ऽखिलजगद्विचित्रतां कर्मशक्तिमयमेव बुध्यते ॥ ७७ ॥
पूर्वमेव परमेश्वरास्तितां प्रत्यपादयमतो ऽत्र न ब्रुवे ।
कर्ममात्रवशगस्य ते ध्रुवश्चित्रदुःखसुखसङ्गतिक्रमः ॥ ७८ ॥

---

१ क्षीणे पुण्ये मर्त्यलोकं विशन्तीति श्रुतेः ।
२ अल्पप्रदेशसंबन्धि । ३ मनोव्यथाः । परसंपदुत्कर्षो हि हीनसंपदं पुरुषं दुःखाकरोति । ४ बुद्धिः कर्मानुसारिणीत्युक्तेः कर्मफलाधिकतदनश्वरत्वकामनैव न स्यात् ।
५ स्वर्गमभ्युपेत्यापि तदनियमं प्रतिपादयति । ६ द्वितीयशतके ८८ श्लोककमारभ्य ९४ पर्यन्तम् चतुर्थशतके ४६ श्लोकमारभ्य ९४ पर्यन्तं च । ७ ईश्वराङ्गीकारे तदनुग्रहेण मोक्षसिद्धेस्तदभावे कर्मणां मोक्षानुपायत्वस्योत्तरत्रैव प्रतिपादनात् ।

वीक्ष्य कर्मचितलोकसंक्षयं अमुत्र च तथैव तत्क्षयम् ।
निश्चिनु श्रुतिरपीत्थमूच इत्यक्षयित्वमुपचारभाषितम् ॥ ७९ ॥
कर्मणा न न धनेन नात्मजैश्चामृतत्वमिति वेदभापितम् ।
सोमपानजनिताऽमृतत्वगीस्तेन कालविपुलत्त्वबोधिका ॥ ८० ॥
या निषेधबलवत्त्वसाधना व्याप्तिसंभृतबला च या श्रुतिः
स्वार्थमीषदपि सा जहाति नो गौणमर्थमपरां नयत्यतः ॥ ८१ ॥
नित्यताश्रुतिभटे पराजिते भूरिशः प्रलयबोधिनी श्रुतिः ।
तन्निषेध्यनुमितावसिद्धतां संशयादपि करोति हेतुगाम् ॥ ८२ ॥
दुर्बलां स्वफलसिद्धिमन्थरां प्राक् त्वया ऽनुमितिमादृतामतः ।
जन्यतानियतनाशिताऽनुमा निर्भया श्रुतिबलात् प्रबाधते ॥ ८३ ॥
अर्थवादवचनानि सन्तु ता,न्येवमप्यविदितार्थबोधनात् ।
मानता ऽसति विरोध एषु, भूतार्थवादमपि यांति मानता ॥ ८४ ॥
बाधितार्थकमुपैत्वमानतां, काममस्य गुणवादता ऽस्तु वा ।
बाधवर्जितमबुद्धबोधकं चाप्रमाणमिति बालिशोक्तयः ॥ ८५ ॥
तेन सातिशयताविनाशितापाककालनियमास्वतन्त्रताः ।
जानता ऽपि सुरलोकशर्मणः केन काम्यमिदमेतदुच्यताम् ॥ ८६ ॥

---

१ तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यकृतो लोकः क्षीयते इति श्रुतिः। २ न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरिति श्रुतिः। ३ निषेधाश्च बलीयांस इति न्यायात्। ४ यज्जन्यं तदनित्यमिति व्याप्तिसहकृता न कर्मणेत्यादि श्रुतिरेव स्वार्थं मुख्यमाह तद्विरोधादक्षय्यं ह वै चातुर्मास्ययाजिनः अपामसोममृता अभूमेत्यादि श्रुतिराभूतसंप्लवं स्थानममृतत्वं हि भाष्यते इति गौणबहुकालस्थितिमात्रबोधिकेत्यर्थः। ५ तद्धेदं तर्ह्यव्याकृतमासीत् तमएवेदमासीदित्यादिका।

६ प्रलयनिषेधकस्य रव्युदये रव्युदयान्तरषष्टिदण्डोत्तरत्वनियमस्यासिद्धिं तत्संशयं वा संपादयति। ततश्च संदिग्धव्याप्यत्वासिद्धहेतोरपि न साध्यसिद्धिरित्युत्तरेण संबन्धः। ७ विरोधे गुणवादः स्यादनुवादोऽवधारिते। भूतार्थवादस्तद्धानादर्थवादस्त्रिधामत इत्युक्तेः। ८ उपसंहरति।

किञ्च बीजपशुहिंसयोत्थितं पातकं बहुलमापतेत्क्रतौ।
बाधकत्वकथनं तु तद्विधेर्नोचितं निपुणदर्शिनां पुरः ॥ ८७ ॥
स्वर्गसाध्यकविधौ श्रुतो हि लिङ् कर्म साधनतया समीपगम्।
प्रोच्य लब्धनिजसाध्यसाधनस्तत्प्रकारविषयानपेक्षते ॥ ८८ ॥
तत्क्रियाप्रकरणश्रुता लिङः स्वर्गसाधनतया ऽन्वितां क्रियाम्।
साध्यभावमुपनीय निर्वृताः स्वर्गमश्रुतमिहाक्षिपन्ति नो ॥ ८९ ॥
साध्यते स्वयमसिद्धरूपिणा ऽसाधितेन नहि कर्मणा फलम्।
साधयेत्प्रकरणोक्तहेतुभिः साधिता निजफलं क्रिया तु सा ॥ ९० ॥
साध्यसाधनतयोर्विरुद्धता नैककालमनपेक्ष्य संमता।
मृत्प्रसाधितघटेन साधिता दृश्यते ननु जलाहृतिक्रिया ॥ ९१ ॥
अश्रुतार्थपरिकल्पना ततो, यागकाङ्क्षितविधाऽसमर्पणम्।
स्वर्गमङ्गफलमिच्छतो भवेद्, वाक्यभेद उभयान्वये ध्रुवः ॥ ९२ ॥
ज्याय इष्टमभिकाङ्क्षितार्पणं, विश्वजिन्नयकथा तु मुख्यगा।
तेन यागमुपकुर्वदप्यलं प्रत्यवायजननाय हिंसनम् ॥ ९३ ॥
मुख्यकर्मफलपाककालिकी स्याद्यदा ऽङ्गफलपक्तिरप्रिया।
किं सुखं वद तदा, क्रमे ऽपि सा स्यात्कदा चन, वृथा न तर्जनिः ॥ ९४ ॥

---

१ यागे प्रत्यवायसांकर्यमुपपादयति।

२ इतिकर्तव्यताम्। यागेन स्वर्गं भावयेदिति स्वर्गस्य साध्यस्य यागस्य करणस्य च ज्ञाने कथं साधयेदित्याकाङ्क्षाऽवशिष्यते।

३ प्रयाजाद्यङ्गैर्यागस्वरूपं संपादयेदित्येवंरूपम्। ४ एकस्मिन्वाक्ये एकस्य वस्तुनः साध्यत्वेन साधनत्वेन चान्वयो विरोधान्न स्याद्वाक्यभेदे तु स्यादेव। ५ अश्रुतस्य स्वर्गस्य साध्यत्वेनान्वयकल्पनमुत्थितायाः कथंभावाकाङ्क्षायाः अपूरणं च। ६ स्वर्गं भावयेद् यागस्वरूपं भावयेदिति स्वीकारे विधेयभेदाद् वाक्यभेदापत्तिः।

७ आकाङ्क्षिताविधानं ज्याय इति न्यायात्।

८ मुख्यकर्मणि फलाश्रवण एव स्वर्गः कल्प्यते।

९ नाभुक्तं क्षीयते कर्मेत्युक्तेः।

प्रत्यवायपरिहारिभिर्मखैस्तद्विनाशमुपयन्ति नो बुधाः ।
पङ्कसङ्गमलिनस्य कर्दमैर्मर्दनं न तनुशोधनं विदुः ॥ ९५ ॥
कृच्छ्रदानजपतीर्थसेवया तं विनाशयसि चेत्पुरैव ताम् ।
आचरन् विविधपातकक्षतिं लप्स्यसे, वहु सुखं यदीच्छसि ॥ ९६ ॥
तेषु सातिशयनाशिकाम्यता दुःखमिश्रणमृते समा मखैः ।
तारतम्यमनुवर्तते ह्यमी, ष्वेतदीयफलगा च जन्यता ॥ ९७ ॥
ब्राह्मणा विविदिषन्ति चेत्परं ब्रह्म तैर्मुहुरुपासितैः परम् ।
यज्ञदानतपसामनाशकस्यैकरूप्यमनुमन्यते श्रुतिः ॥ ९८ ॥
नाङ्गसम्यदखिला ऽत्र मृग्यते नित्यताऽधिकृतिमात्रचोदितैः ।
कामनैव सुखदुःखसाधनं, ज्ञानमेव नियतं तया विना ॥ ९९ ॥
ग्रन्थविस्तरलघुत्वमूलिका ऽसंख्यशाखघनवेदकानने ।
लब्धयेव भवतैकदेशिना दुर्लभा ऽनुमितिवीजमूलिका ॥ १०० ॥
कामनातदितरद्वयीकृतस्वार्थसङ्गतिनि काण्डयुग्मके ।
आग्रहादविदुषोच्यते वृथा बाध्यबाधककथा ऽविरोधतः ॥१०१॥
क्रत्वपेक्षितफलार्थिबोधनं निर्विशेषवचसामसम्भवि ।
स्याच्च ते प्रकरणान्तरं वृथा, नास्ति किं प्रकरणे निजे ऽपि लिङ् ॥
तत्र कं चन विशेषमाश्रयत् कर्तृगं पुरुषचोदनापरम् ।
कर्मकाण्डमथ चा ऽप्युपासनाकाण्डमित्युपगतं श्रुतिद्वयम् ॥१०२॥

---

१ कृच्छ्रादीनां पापनाशकत्वं पापाभावे पुण्यसंपादकत्वं च सत्यामिच्छायां तदभावे तु चेतः शुद्धिसंपादकत्वमिति वक्ष्यति ।

२ हिंसाया अभावात् । ३ तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनेति । ४ जैमिनिसूत्रे अध्याय ६ पा. ३ सू. १-७ द्रष्टव्यम् । ५ पक्षिविशेषः ।

६ फलकामं प्रति कर्मकाण्डस्य विरक्तं प्रति ज्ञानकाण्डस्य प्रवृत्त्या विषयभेदात् ७ ब्राह्मणत्वाद्यभिमानवतो रागिण एव च यागाद्युदेश्यत्वसंभवात् । ८ उपनिषत्प्रकरणपठितस्य सत्यज्ञानादेः कर्मप्रकरणे कर्षणात् । ९ आत्मानमेव लोकमुपासीतेत्यादौ ।

या तु बोधयाति संसृतिभ्रमाधारमात्रपरमार्थमद्वयम् ।
आत्मतत्त्व,मथ न प्रवर्तयेद्गुह्यमित्युपनिषन्मता हि सा ॥१०४॥
अन्यमानशतत्राधिको ऽपि सा प्रागबुद्धपरमात्मबोधनात् ।
मानमेव, ननु मानतातनौ तावदेव बहु, न प्रवर्तना ॥ १०५ ॥
अस्तु वस्तु तव यन्न संस्तुतं, प्रस्तुतं शृणु वचस्तु निस्तुलम् ।
निःस्पृहो यजसि चेद्यजेश्वरप्रीतये, न मखविद्विषो वयम् ॥ १०६ ॥
दर्शितास्तत्र तु काम्यकर्मणां दुष्करत्वफलफल्गुतादयः ।
हेतवः शमवतामुपेक्षणे, तावतैव वयमर्थिनो ऽधुना ॥ १०७ ॥
काम्यवर्जमनिषिद्धमाचरन् तत्फलं विदधदीश्वरार्पितम् ।
सन्ततोत्थितविरक्तिसंस्कृतिर्जायते क्रमिकुलेष्वसक्तधीः ॥ १०८ ॥
तत्र च श्रवणमाप्य सद्गुरोः शास्त्रदृष्टमननोज्झितभ्रमः ।
ध्यानयोगबलतः परात्मनः स्वात्मनैक्यमपरोक्षमीक्षते ॥ १०९ ॥
तावतैव कृतकृत्यतां गतो बाधिताखिलजगद्भ्रमः शमी ।
मुक्त एव हि विमुच्यते, जगद्भ्रान्तिनाशजनिरात्मदर्शनात् ॥ ११० ॥
जन्यभावनियता विनाशिता न स्पृशत्यमुमभावमित्ययम् ।
नाऽध्रुवो ऽधिकरणस्वरूपता द्वैतमस्य न कदापि मृष्यते ॥ १११ ॥
काम्यते भ्रमलयो मुमुक्षुभिस्तेन मुक्तिरपि भाति काम्यवत् ।
आत्मतत्त्वगतानिर्विशेषता बाधते ऽस्य खलु कर्मशेषताम् ॥ ११२ ॥
अद्य याद्य,वसरे सविस्तरं सर्वमेतदुपपादयिष्यते ।
युक्तिदूषितविलासिचापलेनालिनेति गदता व्यरम्यत ॥ ११३ ॥

---

१ निर्विशेषतया ज्ञाने प्रवृत्तेरसंभवात् ।

२ आत्मातिरिक्तस्य सर्वस्य प्रमाणप्रमेयफलव्यवहारस्याज्ञानमात्रमूलकत्वबोधनात् । ३ तत्तु समन्वयादिति ब्रह्मसूत्रे शांकरभाष्यभामत्यादाविदं स्पष्टम् । ४ परिचितम् । ५ ईश्वरप्रीतिमात्रोद्देशेन यागाद्यनुष्ठानमिष्टमेव । ६ मोक्षप्राप्तिक्रममाह ।

७ अविद्यानाश एव जन्यते मोक्षस्तु सिद्ध एव । ८ सर्वप्रपञ्चप्रविलये कुतः शेषता ।

संलापे ऽलिविलासिनोः प्रचलति प्रायेण शास्त्रीयवा-
गाटोपैर्जटिले ऽपि रम्यकवितसारप्रसादोज्ज्वले ।
माध्यस्थादुभयोर्वचांसि नुवतामध्यूपुपां मण्डपं
सभ्यानामलिमात्रगा नतिततिस्तेने विलासिह्रियम् ॥ ११४ ॥
दैवात्संघटिते शुचिद्विजगणे वित्तैश्च शिष्यार्पितैः
सम्भारे सकले क्रमादुपनते कर्तव्यबुद्ध्या ऽस्पृहः ।
रक्षन्नध्वरसम्प्रदायमयजं नारायणं प्रीणयन्
इत्थं दीक्षितवाग्विलास्युपशमे चक्रे ऽलिसाहायकम् ॥ ११५ ॥

इत्यलिविलासिसंलापे खण्डकाव्ये
षष्ठं शतकम् ।

---

१ अलिवचस्येवामीषां विश्वासो न मद्वचसीत्यलिमात्रनमनेन प्रतीतेः । २ अल्युपदेशेन विलासिविरक्तौ संपद्यमानायां पूर्वोक्ता यजमानवागपि सहकारिण्यभूदित्यर्थः ।

अलिविलासिसंलापे

सप्तमशतकविषयानुक्रमणिका

सूक्ष्मं पश्यत सप्तमेऽत्र शतके तन्त्रागमस्मार्तगी-
र्वेदान्तेषु विधीनुपास्तिविषये भूतार्थवादभ्रमाम् ।
भुक्तिं मुक्तिमथानया च विगुणब्रह्मप्रमाऽसंभवं
युक्त्या चैतदपाक्रियामथ हितं कृत्यं च मोक्षार्थिनः ॥ १ ॥

	श्लोकमारभ्य	श्लोकपर्यन्तम् ।
१	११	१८
२	१९	२०
३	२१	४८
४	४९	५१
५	५५	१०१
६	१०२	१०८

अलिविलासिसंलापे

सप्तमं शतकम् ।

शरदभ्रविभ्रमकरप्रभाझरोदितपुण्डरीकसुमराजहंसिका ।
प्रतिभातु मे कविकुलैरुपासिता सकलार्थदर्शनकरी सरस्वती ॥१॥
अथ दीर्घकालसततादरान्विताल्युपदेशवाग्विहिततर्षदूषणः ।
भ्रमिती विलास्ययमनाद्यविद्यया न शशाक हातुमखिलैषणाऽऽग्रहम् ॥
अलिना ऽवधीरितमतिर्विहाय सो ऽध्वरमण्डपं विजनमेत्य काननम् ।
स्वहितं समीहितमवाप्तुमुत्सुको मनसैव तत्र सुचिरं व्यचीचरत् ॥३॥
ननु कामना समनसा न सुत्यजा, मनसो लये सति सुखं कुतस्तराम् ।
अपरोक्षधीरपि तदेकसाधना, तदसक्तरक्तहितसाधनं मनः ॥४॥
न तु कामनां समनुमन्यते गुरु,र्न च शिष्टयज्वसदसा ऽपि सेष्यते ।
श्रुतिरप्यकामहतमोह सर्वतो ऽधिकसौख्य,मेतदुपपद्यते कथम् ॥५॥
भवतु स्वयं न सुकरो ऽस्य निर्णयो, गुरुरत्र मे शरणमित्युपेत्य सः ।
प्रणिपत्य सत्यवसरे ऽलिमद्य किं मम कृत्यमत्युचितमित्यवोचत ॥६॥
अयि सद्गुरो क्रतुविधिः सुदुष्करो बहुसाधनो ऽघचयसङ्गसङ्कटः ।
लघुतारतम्ययुतनाशिसौख्यकृद्भवता न्यरूपि, तदुपेक्ष्यते मया ॥७॥
यदि दानमुक्तगुणपात्रसम्पदं नियमं धनार्जनगमप्यपेक्षते ।
शुभदामपीडनकरीं तथा ऽऽयतिं सुदुराचरं तदपि मन्यते मया ॥८॥
तनुपीडनं त्रिषवणाघमर्षणैर्विरसाशनैरनशनैश्च दुःसहम् ।
तपसीति कृच्छ्रसुखपुण्यकर्मणि क्षमते न मादृशजनः सुदुर्बलः ॥९॥

---

१ विचारयामास । २ तैत्तिरीयोपनिषदि मानुषानन्दादि-ब्रह्मानन्दान्तं तारतम्येन निरूपिताः सर्वे एवानन्दाः श्रोत्रियस्य चाकामहतस्येति वाक्येनाकामहतस्य दर्शिताः । ब्रह्मानन्दवल्ल्याम् ८ अनुवाके । ३ परहिंसाऽपर्यवसाय्युत्तरकालीनं फलम् ।

भवदाश्रयेण शुचितीर्थसेवनं बहुधा ऽऽपि, नास्मि च पुरेव नास्तिकः।
श्रुतिवाचि विश्वसिमि, भोगतृष्णया[1] तदपि ह्रिये, भुवि तया विना ऽस्ति कः॥१०॥
वसुधासुधाशनपुराऽऽप्यसौख्ययोर्विरसेन तद्द्वयविनाशभीरुणा।
ध्रुवसौख्यदेश्वरसलोकतास्पृहा न हि सुत्यजा, किमु सरूपतास्पृहा॥
तदुपायतां बहुविधागमोदिताः श्रुतिसंमताः स्मृतिपुराणदर्शिताः।
दधति स्वमात्रसुकरा उपासना, न च तास्वशुद्धिकणिका ऽपि लक्ष्यते॥
श्रुतिवत्त्वया स्मृतिरपि प्रमाणमित्युपगम्यते तदविरोधदर्शने।
मुनिभाषितं नहि वृथा ऽप्रमाणतां सहते, यथार्थमतयो हि ते मताः॥
स्मृतिवत्पुराणवचसां पराशरात्मजभाषितत्वविभवेन मानता।
भवतेष्यते यदि तदेश्वरोदिताऽऽगमतान्त्रराशिरवमन्यते कुतः॥१४॥
इयति प्रमाणगणपूर्णवारिधावुपलब्धवैदिकनिषेधगार्हितम्।
परवश्यमारणविमोहनादिकं न मया ऽद्य किञ्चन विधित्स्यते गुरो॥
न निषिद्धदर्शनबलात् क्व चित्तथा ऽपरभागमानविमतिर्बुधोचिता[2]।
इयमेव सा यतिपदप्रसारिका स्मृतिषु प्रसज्यति तथा सति ध्रुवम्॥
विधयः श्रुतिस्मृतिपुराणगोचरा अथ पञ्चरात्रमुखमागमं श्रिताः।
शिवभाषितागणिततन्त्रसंगता विलसन्त्युपास्त्युदितमुक्तिबोधकाः॥
अथ तत्तदङ्गविविधार्थवादगीरवबोधिता हरिहरादिभूमयः।
अतुलेष्टदाः क्रमिकमुक्तिहेतवः सुलभाः सकामविहितैरुपासनैः॥१८॥
वचसामिदंप्रथमबोधहेतुता परमं निदानमिह मानतां प्रति।
न तु पुंप्रवर्तनफलोपलम्भयोरपि बीजतेति भवतोदितं पुरा॥१९॥
अनुवादवाग्भवतु पिष्टपेषणं, गुणवादतां श्रयतु बाधितार्थगीः।
अविरुद्धबुद्धपरलोकबोधकं कथमप्रमाणमयि भूतभाषितम्॥२०॥
अपि च प्रजापतिसलोकतां गतानधिकृत्य तद्द्विविधसिद्धिशंसिनी।
द्रुहिणोपदिष्टपरमात्मदर्शनादपवर्गमाह लय आगते श्रुतिः[3]॥२१॥

१ तृष्णाया। २ हिंसादिसांकर्याभावात्। ३ ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे। परस्यान्ते महात्मानः प्रविशन्ति परं पदमिति।

अत ईश्वराः स्ववशगाष्टसिद्धयस्त्रिजगज्जनिस्थितिलयक्षमाश्चिरम् ।
दधतामुपास्तिविधिकर्मता, ममी परिपूरयेयुरखिलान्मनोरथान् ॥२२॥
शतकोटिकल्पतदुपासनाबलाद्दलिताघराशिगिरिभिः समाहितैः ।
शतकोटिकल्पसुखभोगतः परं सुलभैव मोक्षपदवी दवीयसी ॥२३॥
सुरसद्मनिर्मितिजरत्तदुद्धृतिप्रचुरोपचारसततार्चनोत्सवाः ।
यदि विक्षिपन्ति हृदयं, धनीतरैरसहायकैरसुकराश्च तैरलम् ॥ २४ ॥
स्थिरमासनं सुरसरित्तटे सुखं विरचय्य रुद्धतनुगानिलक्रियः ।
निजरुच्यदैवतविशेषविग्रहे विदधातु मादृगपि चित्तसंयमम् ॥२५॥
अचिरादनुग्रहपरे स्वदैवते वरदे तदीयपदमाप्य निर्भयः ।
विहरिष्यते, प्रलयकाल आगते स विमोक्ष्यते तदुपदेशमात्रतः ॥२६॥
निजभक्तसर्वविधविघ्नभक्षणादिव तुन्दिलः सुरसभाग्रपूजितः ।
सृणिपाशमोदकवरोल्लसत्करो ऽनिशमाविरस्तु हृदये गजाननः ॥
जगदेकचक्षुषि समस्तवेदवाङ्मयविग्रहे प्रणतरोगवैरिणि ।
स्वकरार्पितामृतरसैधितौषधौ दिननायके भवतु मे नमस्क्रिया ॥२८॥
अरुणा नतेषु करुणाऽऽर्द्रवीक्षणा तरुणाम्बुजातचरणा गुणाम्बुधिः ।
शरणार्थिरक्षणविचक्षणा क्षणात् प्रतिभातु मे त्रिपुरसुन्दरी हृदि ॥
रजताद्रितुङ्गतमशृङ्गसङ्गते वृषपुङ्गवे स्थितमुमाङ्गपिङ्गलम् ।
लसितोत्तमाङ्गमुरुभङ्गगङ्गया भजतामनङ्गरिपुमाशु मङ्गलम् ॥ ३० ॥
कमलालयामृदुलपाणिपल्लवातुलदोलितव्यजनशीतलाऽनिलैः ।
उपलालितो विमलदुग्धवारिधौ हृदि कुण्डलीन्द्रशयनो ऽनुचिन्त्यताम्
दलिताद्धिरण्यकशिपूरसश्च्युतामिव तां समन्दहासितां जगन्नताम् ।
दयितां वहन् हृदि पयोनिधेः सुतां तनुतां शुभानि नरकेसरी सताम् ॥
नखराग्रसंहृतविरिञ्चिमस्तको रचितत्रिलोकलयचण्डताण्डवः ।
मदघूर्णिताक्षियुगयोगिनीगणैः परिवेष्टितो जयति कालभैरवः ॥३३॥

१ वज्रतुल्या । २ कृतप्राणायामः । ३ प्रिये । ४ सैषा त्रय्येव विद्या तपति य एषोऽन्तरादित्ये हिरण्मयः पुरुष इति महोपनिषत् ।

शरदाहितार्यशुभकारिवैभवः परितुष्टसर्वजनकान्तिकोमलः ।
सततश्च भूमिजनिलक्ष्मणान्वितो हृदि रामचन्द्र उपसेव्यतां सदा ॥
अवनीदुरापरुचिमत्तराधिकाशयलाल्यमानकरपल्लवोज्ज्वलः ।
खलमोदकारिनगराजिजित्वरो हृदि कृष्णकल्पविटपी विचिन्त्यताम् ॥
सरुचिप्रवृत्तनटनागरोचिता स्वदृशोमया प्रणयमाप्य निर्वृता ।
हृदये ऽतिवेलशुचिभावनाप्रिया समुपास्यतां हरिहराद्वयीतनुः ॥३६॥
निजभक्तपालनमनावदातभा गदिता त्रयीशिरसि भीतिलोप्यलम् ।
शुभकृन्निषेवितपदोदयार्थिभिः प्रणयादुमार्धतनुराविरस्तु नः ॥३७॥
अनया दिशा ऽऽगमपुराणबोधितानवलम्ब्य दैवतविशेषविग्रहान् ।
चिरचिन्तनाद्भवति भोगमोक्षयोर्ध्रुवमाप्तिरित्यगुणचिन्तनैरलम् ॥
अथ चेत्तव श्रुतिशिरोऽवबोधिते परमादरः सगुणवस्तुचिन्तने ।
कुरु तत्प्रकाममयि सर्वकामदं, क्रममुक्तिरिष्यत इहापि वैदिकैः ॥३९॥

---

१ शरैर्बाणैर्दाहितमरीणां अमङ्गलकारणमैश्वर्यं येन । शरदा कालेनाहितमार्याणां शुभकरं वैभवं यस्मिन् । २ परितुष्टः सर्वो जनकराजसमीपदेशो यस्मिन् निर्मलश्च । परितुष्टाः सर्वे जना यस्यां तादृश्या कान्त्या मृदुलः । ३ भूमिसुतया सीतया लक्ष्मणेन च । भूच्छायारूपेण कलङ्केन च । ४ भूदुर्लभया कान्त्या गर्विताया राधाया हस्तेन सेव्यमानाः करचरणरूपा अवयवा यस्य । भूम्यां दुर्लभैः कान्तिमत्तरैरधिकैराशयेन हृदालाल्यैः संमानकरैः किसलयैः । ५ दुष्टसंतोषकाणामरीणां शत्रूणां नगरस्याजेर्युद्धस्य च जेता । दुर्जनतोषकारिण्या वृक्षततेश्च ।

६ साभिलाषं प्रवृत्तस्य नटनागरस्याहा । सोत्कण्ठं प्रवृत्तैर्नागैर्नटद्भिः भूषिता सोत्कण्ठं प्रवृत्तं नटनं यस्याः सा गरस्य विषस्योचितेति वा ।

७ स्वदर्शिन्या उमया गौर्या । मया लक्ष्म्या स्वनेत्रस्य च ।

८ पवित्राणां भक्तानां भावनं प्रियं यस्याः । शुक्लकान्तिररण्यप्रिया च ।

९ निजभक्तपालं नमनं यस्याः शुक्लकान्तिः । निजभक्तानां पालने मनो यस्य वदाता भा यस्य । १० णिन्यन्तं कर्मोपपदकाणन्तात् ङीप् च । ११ पदः दयार्थिभिः पदा उदयार्थिभिरिति प्रकारद्वयम् ।

तदुपासकस्य मरणोत्तरं सुरालयगस्य सर्वविधकामलाभतः।
परतोऽमृतत्वफलबोधिकां श्रुतिं पठ बव्हृचोपनिषदैतरेयगाम् ॥
परमं गुहानिहितमन्तवर्जितं चितिसत्यरूपमिति वेद यो नरः।
अमुनाऽश्नुते सह स सर्वकामना इति तैत्तिरीयवचनं विचार्यताम् ॥
स्मरनामवाग्बलमनोऽन्नतेजसां परमात्मदृष्टिरिति या उपासनाः।
निजगोचरार्थगतकामचारदाः स्मर सामगोपनिषदि श्रुता न किम् ॥
अथ मुण्डकेऽपि पठिता अथर्वणेप्सितकामलोकसकलाप्तिबोधिकाः।
गिर इत्युपेक्ष्य सकलश्रुतीरितं वद निर्विशेषचिति कस्तवाग्रहः॥४३॥
अपि चैककल्पमितकालमात्रतो नियमादुपासकतनुर्न नश्यति।
ननु सप्तकल्पकृतजीवनःशिवार्चनतः प्रसिद्ध्यति मृकण्डुनन्दनः॥४४॥
प्रलये समैव किल बद्धमुक्तयोस्तनुमानसेन्द्रियवियोगतः स्थितिः।
लभतेऽधिकं सुखमुपासको भवे तदुपास्तिमार्गसमुपेक्षणं कुतः ॥४५॥
भवतां मते शमदमादिसंस्क्रिया लभतेऽन्यजन्मसु यथाऽनुवर्तनम्।
अनुवर्तते न किमुपास्तिसंस्क्रियोत्तरजन्मनीति न भयं ततश्च्युतेः॥
अत एव नारदमुखा महर्षयः प्रथिता विदेहपरमुक्त्यपेक्षया।
अवगत्य भक्तिमधिकेष्टसाधिनीं परमेश्वरैकभजने कृतादराः ॥४७॥

---

१ गर्भ एवैतच्छयानो वामदेव एवमुवाच स एवं विद्वानस्मा-च्छरीरभेदादूर्ध्व उत्क्रम्यामुष्मिन् (स्वर्गे) लोके सर्वान् कामानाप्त्वाऽमृतः समभवत्। ऐतरेयोपनिषत् अध्याय २। २ सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चितेति। तैत्तिरीयोपनिषद् ब्रह्मानन्दवल्ली। ३ छान्दोग्योपनिषत्सप्तमप्रपाठके। ४ यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान्। तं तं लोकं जायते तांश्च कामान् तस्मादात्मज्ञं ह्यर्चयेद् भूतिकाम इति तृतीयमुण्डके प्रथमखण्डे। ५ प्रदर्शितरीत्या वेदचतुष्टयेनापि प्रतिपादितम्। ६ तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम्। यतते च ततो भूयः संसिद्धौ कुरुनन्दन। पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि स इति भगवद्गीता अ. ६ श्लो. ४३-४४।

लभते च जैमिनिपराशरात्मजोदितदर्शनद्वितयमेकवाक्यताम् ।
समये क्षमैव तदुपास्तिकर्मतामुररीकुरु त्वमविशङ्कमात्मनः ॥ ४८ ॥
सविशेषमेव पदजामुपस्थितिं प्रमितिश्च वाक्यजनितां वगाहते ।
कथमेवमौपनिषदत्वमात्मनस्तव निर्विशेषपदमात्रभाषिणः ॥ ४९ ॥
भवता ऽपि तत्त्वमसिवाक्यजप्रमाप्रथमक्षणे न खलु मुक्तिरिष्यते ।
नहि शाब्दमिन्द्रियजविभ्रमं हरेदपरोक्षधीः परमपोहते भ्रमम् ॥५०॥
अपरोक्षसाधनमुपासनं त्वया ऽभ्युपगम्यते, परमियं भिदा ऽऽवयोः ।
मम भुक्तिमुक्तियुगलं करास्थितं, तव मुक्तिरेव, चिरकालिकी च सा ॥
इति दर्शितानणुगुणामुपासनामहमाश्रये सगुणवस्तुगोचराम् ।
इह दूषणं किमपि नेक्ष्यते मयेत्यभिधाय जोषमभवद्विलास्यसौ ॥५२॥
अथ तं तथा श्रमशते ऽप्यनुष्ठिते कवलीकृतं विषयभोगतृष्णया ।
मुहुरुत्पथं जिगमिषुं विलासिनं परिचिन्तयन् स चिखिदेतरामलिः ॥
अविलोकयन् विषयदोषदर्शनादपरां गतिं भवसुखाद्विरक्तये ।
परिसान्त्वयन्नथ विरञ्जयंश्च तं पुनराह तत्र करुणां वहन्नलिः ॥५४॥
अयि साधु पश्यति भवानुपासना सुखभुक्तये क्रमिकमुक्तये प्यऽलम् ।
इति, किन्तु भोगपरतापिशाचिकाचलचेतसा न पुरुषेण सा ऽऽप्यते ॥
न निसर्गजाःक्षणिकचित्तवृत्तयो विविधार्थगाःसमुपयान्त्युपास्तिताम् ।
भवतस्तथा ऽभ्युपगमे विना श्रमं सुलभा भवेयुरखिला उपासनाः ॥
न विरुद्धवृत्तिलवगर्भया ऽऽप्यते समुपास्तिता ऽभिमतवृत्तिधारया ।
सुलभा हि सा महति कालसागरे सकलेन किञ्चन मुहुर्विजानता ॥
लभतामनादिसुखरागवात्यया कृतवानरप्लुति सदा मनः कथम् ।
क्व चिदेकवस्तुनि चिरैकतानताऽपरनामिकामभिमतामुपासनाम् ॥
लघु किंचिदिष्टमभिलष्य मानसं परमेश्वरे त्रिचतुरान् क्षणान् हठात् ।
यदि रोत्स्यते, नियतमाप्स्यसि प्रियं स्वगुणानुरूपमिति नात्र संशयः ॥

१ सधर्मकएव शक्तिग्रहात् । २ अभ्युपेत्याह ।
३ विजातीयवृत्त्यन्तरितया । ४ नानाविषयेषु क्षिप्यमाणम् ।

यदि तावतैव कृतकृत्यतां विदन्ननुरञ्जयिष्यसि सुखे लघुन्यपि ।
स्वमन,स्तदा च्युत उपास्तितःकुतोऽधिकारिष्यसेऽधिकसुखासु भूमिषु
दिनमासवर्षपुरुषायुषाहृताः फलतारतम्यजनिका उपासनाः ।
ननु विक्षिपन्ति पुरुषं स्वजन्मभिर्विविधैः फलैर्विषयरागदूषितम् ॥
क्षणिकाङ्गनारतिसुखे सलोकताशतकल्पलभ्यवधिके ऽखिले सुखे ।
सदृशी क्षयातिशयिते विभावयन्न मुमुक्षुराचरति काम्युपासनाम् ॥
यदि चित्तशुद्ध्यचलतैकसिद्धये प्रविधास्यसि प्रथमभूमिकाधिया ।
क चिदप्युपास्तिमियमस्मदीप्सिता न निवार्यते सरलमोक्षपद्धतिः ॥
न सलोकतामपरमुक्तिशब्दितां न समीपतां न च सरूपतामपि ।
यदि लिप्ससे परविरक्तिरेव सा प्रथिता ऽपवर्गसुखनित्यचित्तसखी ॥
न भवत्यसौ विषयदोषदर्शनं प्रविहाय, कामहतकैस्तु तद्गुणान् ।
अनुसंदधद्द्विविधभोगसक्तधीर्लभते ध्रुवं मरणजन्मसंततिम् ॥६५॥
अवनीस्थसर्वविधवस्तुनाशिता भवतैव पूर्वमसकृत्प्रकाशिता ।
अवधीरिता तदुपमानतः शताध्वरलभ्यदिव्यविषये दुराशता ॥६६॥
द्विविधे ऽपि तत्र भवतैव जन्यता गदिता क्षये नियमतः प्रयोजिका ।
किमुपासना ऽपि नहि कर्म, तद्भवं सुखमक्षयं भवति केन तद्वद ॥६७॥
बहुकालसाधितशिवाद्युपास्तयो रजताचलादिसुखभोगभूमिषु ।
विहरन्तु कल्पशतमप्य,नन्तरं भवसङ्कटे निपातितार एव ते ॥६८॥
अपि चात्र चिन्तय सुखोपभोजिनां क्षणवत्प्रयाति समयो महानपि ।
अतिदीर्घतां व्रजति दुःखिनां घटीत्यलमीशलोकसुखभोगतृष्णया ॥
लघुकालदीर्घसमयैरुपासनैः कथमेकरूपफललाभसम्भवः ।
यदि तारतम्यमपि वक्ष्य,सूयया बहुलाधयः शिवपुरे ऽप्युपासकाः ॥

---

१ कामनयोपासनां न करोति चित्तशुद्धये तु करोत्यपीति भावः ।
२ सगुणोपास्तिं कुर्वन्नपीत्यादिः ।
३ अतथाभूतवस्तुविषयकमानसक्रियाया एवोपास्तित्वात् ।
४ लोके तथाऽनुभवात् ।

सशरीरकं न जहितः प्रियाप्रिये इति वेदवाग्भिरिदमेव कीर्त्यते ।
स्पृशतो ऽशरीरमथ ते कदा ऽपि नेत्युपपद्यते कथिततथ्ययुक्तिभिः ॥
न च वर्तमानतनुपातमात्रतो ऽविदितात्मकेन सुलभा ऽशरीरता ।
अपरां तनुं श्रयति कर्मनिर्मितामथ पौर्विकीं त्यजति रागवान् यतः ॥
श्रुतिसंमता तृणजलायुकोपमाश्रवणादृशेयमविरक्तचेतसः ।
विदुषस्त्वशेषविषयप्रबाधनान्न जनिर्न मृत्युरपि न प्रियाप्रिये ॥७३॥
अपि चाद्वयात्मनि गुणादिकल्पना भ्रम एव, तत्ततिरुपासना तव ।
परिपोषयेत् परमनादिविभ्रमं, न तु नाशये,न्न हि विरोध एतयोः ॥
न हिरण्यगर्भपदगाम्यपीदृशो भवसक्तधीर्भगवतोपदिश्यते ।
विफलः किलानधिकृतोपदेशइत्युपगम्यते, न भगवांश्च बालिशः ॥
श्रवणाधिकारिणि परा विरक्तता ऽथ मुमुक्षुतेति नियतं विशेषणम् ।
द्वयहीनधर्मवणिजस्तु संसृतिः सुकृतानुरूपसुखपृष्ठभाविनी ॥७६॥
अभिसन्धिशून्यमपि धर्म्यमाचरन् जगतः प्रवृत्तिपरिशुद्धये शमी ।
यदि कायमात्रविभवो बुभुत्सते, स विबुध्यते त,दुपदिश्यते च सः ॥
विधिलोकसौख्यसततानुरञ्जिताखिलवृत्तिसंस्क्रियतया ध्रुवं गतः ।
अधिकं प्रधावति सुखाय सक्तधी,रथ दुष्कृतं विदधदेति दुर्गतिम् ॥
तनुपालनाधिकविरक्तिसंस्क्रियासततानुवृत्तिपरिपूतचेतसः ।
अवनीस्थितस्य विधिलोकगस्य वा सदृशी रहस्तदुपदेशयोग्यता ॥

---

१ न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इति छान्दोग्योपनिषत् ८ । १२ । १ ।

२ तद्यथा तृणजलायुका तृणस्यान्तं गत्वा ऽन्यमाक्राममाक्रम्यात्मानमुपसंहरति एवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वाऽन्यमाक्राममाक्रम्यात्मानमुपसंहरति । बृहदा. ६ । ४ । ३ । ३ धर्मवाणिजको हीनो जघन्यो धर्मवादिनाम् । न स धर्ममवाप्नोति योधर्मं दोग्धुमिच्छतीति महाभारते वनपर्वणि ।

४ यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तत इति भगवद्गीता ३ । २१

सगुणस्य सम्भवति नाप्युपासना, परमेश्वरो ऽखिलगुणैकवारिधिः ।
कतमैर्गुणैर्वद विचिन्त्यतां न कैः, सकलांस्तु वेत्ति न हि कोऽपि तद्गुणान्
निजरुच्यपञ्चषगुणैरुपासने, ऽप्यवलम्बिते गुणगणे प्रधावतः ।
मनसः स्थिरत्वमुपपद्यते कथं, समुपासना हि तदनन्यवृत्तिता ॥८२॥
अत एव कुत्र चन विग्रहे लसद्विविधायुधे बहुकराक्षिवैभवे ।
चिरधारणा ऽऽगमपुराणसंमता बहिरङ्गतां वहति गौण्युपासना ॥
स्थितकल्पितैकगुणधर्मिगोचरा विषयद्वयप्लुतिवशेन गौण्यपि ।
विषयीऽल्पताऽऽश्रयणतो ऽन्तरङ्गतां समुपासना भजति वेदमूर्धगा॥
भ्रमबाधतद्विषयमाश्रयं विना ऽनुपपद्यमानमनुचिन्त्य निश्चिते ।
अचला मनःस्थितिरखण्डसाक्षिणि श्रयति प्रधानपदवीमुपासना ॥
अनया चिराचरितया ऽपरोक्षधीः परमात्मनो भवति, यत्प्रभावतः ।
लय आप्यते द्रुततरं सकार्यया भवहेतुभावभृदनाद्यविद्यया ॥८५॥
अपरोक्षवृत्तिविलयस्तु जायते स्वयमेव कारणविनाशतो ऽपि वा ।
अथ साक्षिमात्रमवशिष्यते ध्रुवं सुखचित्स्वरूप,मपवर्ग एष नः ॥
अनिशम्य तत्त्वमसिवाक्यमन्यतो न जहाति भागयुगलं विशेषणम् ।
पदवाच्यधर्मियुगले ऽधिकार्यपी,त्युपपन्नमौपनिषदं त्वमात्मनः॥८७॥
अपरोक्षवृत्तिहृतकर्मकर्तृतासुखमायिकाखिलविशेषणस्य का ।
अधिकारिता विधिषु शेषता, ऽपि वे,त्युपगम्यतामपरतन्त्र एव सः ॥
अत एव जैमिनिनयागतार्थता ननु बादरायणमुनीष्टदर्शने ।
अवबोध्य कर्मसु नियुङ्क्त आदिमः फलमत्र वेदनमबोचदन्तिमः ॥

---

१ सत्यत्वादि । २ सर्वगन्धत्वादि । ३ दग्धेन्धनाग्निवत् ।

४ तं त्वौपनिषदं पुरुषं पृच्छामीति बृहदा. ३ । ९ । २६ ।

५ यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् केन कं विजानी-यादिति बृह. ४ । ५ । १५ । ६ अभयं वै जनक प्राप्तोऽसि तदात्मानमेवावेत् बृहदा. ४ । २ । ४ एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत । भगवद्गीता १५ । २० ।

तनुमात्रपालनमथात्मचिन्तनं द्वयमेव कार्यमपवर्गमिच्छताम् ।
विषयोपभोगजसुखार्थिनां पुनः श्रमदक्रियास्त्वगणिता नियन्त्रणाः ॥
सविशेषचिन्तनकृतां फलार्थिनां प्रकृते द्वयं सदृशमेव यद्यपि ।
फलभोगकालिकतनुश्रमो ऽधिको, मनसोऽप्युपास्तिसमये महान् भरः ॥
स्वफलोन्मुखप्रकृतकर्मचालितां तनुमैन्द्रजालिकविभाविताभिव ।
अपरोक्षयन् भृशमिमामुपेक्षते ममताऽत्ययान्मुनिरविघ्नयोज्झितः ॥
क्रियमाणसञ्चितशुभाशुभक्रियास्वपबाधितासु निजहेतुबाधनात् ।
अचिरेण तत्तनुलये स चित्सुखध्रुवतत्त्वशेष इति मुक्त उच्यते ॥
प्रतिबन्धकप्रचुरभावतो यदि स्वशरीरपातसमयावधि भ्रमः ।
न निवर्तते, ऽपि तु विरक्त्युपासने सुदृढे, दृढा भवति तज्जसंस्क्रिया ॥
स तया भवान्तरगतो ऽपि निःस्पृहः स्वपुराकृतां पुनरुपास्तिमाचरन् ।
क्रमशो ऽपरोक्षयति तद्भवे क्व चि, न्निरयं न याति, न च नैव मुच्यते ॥
यदि मध्य एव विषयान् निषेवते, च्यवते स दुर्गमविमुक्तिपद्धतेः ।
अथ निःस्पृहो ऽपि विजहात्युपासनां, स विलम्बते ऽनुभवितुं न यात्यधः
कथितो ऽपवर्गदृढदुर्गनिर्जयक्रम एष एव, न विरक्तिमन्तरा ।
अमृतत्वलाभ इति संस्मरन् श्रुतिं विषयान्विहाय विषवद्विमोक्ष्यसे ॥
चिरभावनाविदितवेदितव्यताकृतकृत्यनारदमुखाधिकारिणाम् ।
जगतां हिताय परमेश्वराज्ञया चरतामुदाहृतिरिहामयोजिका ॥९८॥
विषयोत्थितं सुखमुपास्त्युपक्रमे मनसा ऽर्थयन् तदुपलम्भमात्रतः ।
प्रसजन्नुपास्तिमवधीर्य दुष्कृतैरचिराद्विनश्यति हि रावणादिवत् ॥
मनसः स्वभावचपलस्य सुन्दरैर्विषयैर्हृतस्य परिणामनीरसैः ।
न हि निग्रहो विषयदोषदर्शनाज्जनितां विरक्तिमपहाय शक्यते ॥
अविनाशिता विषयदेहचेतसां न हिरण्यगर्भभुवने ऽपि युज्यते ।
कुत एव तज्जनितसौख्यसंतत, र्जगदेव मायिकतया विनश्वरम् ॥१०१॥

१ नानाविषयालम्बनकृतः । २ त्यागेनैके अमृतत्वमानशु-रिति नारायणोपनिषत् ।

विनयादुपेत्य तव पृच्छतो रहो मम कृत्यमत्युज्झितमत्र किं न्विति ।
उपपत्तिभिर्विषयदोषदर्शनं प्रथमं विधेयमिति मे सदुत्तरम् ॥१०२॥
अमुना विनेष्टजनविप्रयोगजा बुधराजसंसदवमानजा ऽपि वा ।
क्षणिकी विरक्तिसिकता ऽपवाह्यते चिरसंप्रवृत्तभवरागवात्यया ॥
स्वतस्सुहितं विधिवशादुपागतं सुकृताविरुद्धमपरित्यजन् सुखम् ।
अधिकेष्वगृध्नुरथ किं चिदेककं बहिरिन्द्रियं स्वविषयाद्वियोजय ॥
इयता मनो यदि न खिद्यते, तदा ऽपर इन्द्रिये ऽपि कृततादृशोद्यमः ।
स्ववशेषु तेष्वपगतस्मयो ऽस्पृहः कुरु सर्वकर्मजफलेश्वरार्पणम् ॥
विधया ऽनयोपरतशान्तमानसो भयरागरोपमदमानदूरगः ।
मनसः स्थितौ क्व चन देवविग्रहे, सगुणे ऽथ यत्नमतिवेलमाश्रय ॥
अथ लब्धभूमिकतया ऽधिकारवानुपदिष्टतत्त्वमसिवाक्यजप्रमाम् ।
विजहत्पदार्थगविशेषणद्वयीमुपपत्तिभिर्हृदि चिराय धारय ॥१०७॥
गदितप्रमाऽभ्यसनजापरोक्षधीवलक्लृप्तजीवपरमात्मभेदधीः ।
भवितास्यखण्डपरनित्यचित्सुखे प्रकटे ऽभयामृतपदप्रतिष्ठितः ॥
इति गुह्यमप्यनुगताय पृच्छते भवते मयोपनिषदां मतं हितम् ।
कथितं विचारय, चिरं व्रजाधुना, त्यज मत्समाधिसुखभङ्गहेतुताम् ॥
सपद्युदिश्य विलासिनमित्यलिर्विरमति स्म समाधिकृतादरः ।
अथ कणाशनगौतमदर्शनोदितपथेन विवक्तुमियेष सः ॥ ११० ॥

इत्यलिविलासिसंलापे खण्डकाव्ये
सप्तमं शतकम् ।



अलिविलासिसंलापे

अष्टमशतकविषयानुक्रमणिका

विषयदोषकथा ऽथ च गौतमाऽभिमतसृष्ट्यपवर्गनिरूपणम् ।
उपनिषन्मततर्कबलाच्च तन्निरसनं गदितं शतके ऽष्टमे ॥ १ ॥

	श्लोकमारभ्य	श्लोकपर्यन्तम् ।
(१)	३	२०
(२)	२९	९९
(३)	५८	११८

अलिविलासिसंलापे

अष्टमं शतकम् ।

मुक्ताभूषां भारभावं नयन्ती भास्वद्देहोद्भूतशुभ्रप्रभाभिः ।
भूयाद्भूयो भाविता भक्तसङ्घैः सच्छास्त्रार्थस्फूर्तये भारती नः ॥ १ ॥
आकर्ण्यालेर्वाचमित्थं विलासी भूयो गत्वोपह्वरे गह्वरे सः ।
प्रालेयाद्रेः स्वर्धुनीधौतमूले व्यमृक्षीत्तां स्वस्थचेताश्चिराय ॥ २ ॥
अद्धा ऽऽचार्यः प्राह हित्वा विरक्तिं भूलोकादिब्रह्मलोकान्तसौख्ये ।
मोक्षोपायो नेति,सा ऽऽदौ प्रसाध्या,सा स्याद्भोगैः किं नु तद्दोषदृष्ट्या ॥
आद्ये पक्षे सर्वभोगः क्व लभ्यो, रोचन्ते ऽमी सर्वएवेन्द्रियार्थाः ।
चेतो वीक्ष्यान्योन्यवैचित्र्यमेषां सौन्दर्यं चापेक्षते तानशेषान् ॥ ४ ॥
रम्ये स्थाने वाहने ऽथान्नपाने सत्यप्याप्तस्त्रीधने यौवने च ।
चित्तं वाञ्छत्यम्यदन्यत्सदैवेत्यप्रच्छन्नं शान्तिशून्याशयानाम् ॥५॥
निःशेषाणामर्जनं रक्षणं वा भोगो वा स्यात् किं शतेनापि कल्पैः ।
नव्या नव्यास्ते, मनश्चातितृष्णक् ताम्यत्येकस्याप्यलाभे स्वभावात् ॥
नामी नित्या, नापि चान्यैरकाम्या,स्तस्माद्दैवारातिजैतत्प्रणाशे ।
स्वस्याशक्तौ प्रातिलोम्ये ऽप्यमीषां मध्ये मध्ये दुःखभोगो ऽपि भूयान् ॥
चित्रं चान्यत्स्वोपयुक्ताधिकेष्वप्यर्थेष्वात्माधीनभावं भजत्सु ।
अन्यं दृष्ट्वा स्वाधिकं स्वोपमं वा चित्ते व्यर्थं दीप्यते मत्सराग्निः ॥८॥
तेन प्लुष्टा राज्ञि कर्णेजपत्वं कृत्वोत्कोचैर्दुर्जनोत्थापनं वा ।
विश्वस्तायाथोपकर्त्रे ऽप्यकस्माद् द्रुह्यन्त्यस्मै सस्मया विस्मृतेशाः ॥९॥
नीचाः के चित्काञ्चनं प्राप्य किं चिद् दुर्विद्यां वा पर्वताखर्वगर्वाः ।
पूजार्हेष्वप्यक्षिणी मीलयन्तः सर्वोपायैः स्वप्रकर्षे यतन्ते ॥१०॥

---

१ [illegible]न्ते । २ चिर[illegible] ।

अद्यश्वीनप्रायणा अप्यगण्यात्कार्पण्येनान्ये निजायत्तवित्तात् ।
दातुं भोक्तुं काकिणीमप्यशक्ता नूनं नित्ये देहवित्ते विदन्ति ॥१२॥
धिग्धिक् तस्माद्भोगभोग्योपभोक्तॄन् सत्संपर्कानर्हदुर्गत्युदर्कान् ।
आतन्वाना ये बुधानप्यभीकान् शय्योत्थायं धावयन्ते कृतान्तम् ॥
आत्मादित्यं रागराहूपरागच्छन्नं दृष्ट्वा क्लृप्तदोषावतारम् ।
शिष्टाः स्नान्तः किल्बिषं शङ्कमानाः शुद्ध्यै दानान्याचरन्तीति युक्तम् ॥
ईर्ष्यामानक्रोधदम्भप्रमादान् दोषानेको राग एव प्रसूते ।
तस्माद्दोषारब्धबाधाऽनुतप्तैः सर्वोपायै राग उन्मूलनीयः ॥१४॥
नायं कायः पथ्यवैद्योपचारानेकान्तेनाभ्यस्यता ऽप्यायुषोऽन्ते ।
त्रातुं शक्यस्तावदन्नाञ्जलिश्चेत्त्राणे शक्तो ऽस्या, त्र युक्तो न रागः॥१५॥
भूपावस्त्रप्रीतिदायेन वित्तं सोत्प्रासभ्रूवाग्विलासैश्च चित्तम् ।
कृत्वा ऽऽयत्तं वञ्चयन्त्यां प्रमत्तं मूर्खो नार्यां सज्जते निर्निमित्तम् ॥१६॥
यत्सम्पर्काद् वञ्चकाचार्यदुष्टक्षोणीपैकागारिकेभ्यः सदा भीः ।
विक्षेपश्च प्रत्यवेक्षासु भूयान् नित्यं बाधासाधनं तद्धनं धिक् ॥१७॥
मिथ्यास्तुत्योद्योजयन् स्वार्थसिद्ध्यै निष्पन्ने ऽर्थे रूक्षसाचीकृतास्यः ।
अर्थिन्यस्मिन् दृष्टिमप्यप्रयच्छन् नो रागार्हः काकवल्लोक एषः॥१८॥
छित्वा स्वेच्छाचारविच्छेदसाराः काराकारा एषणास्त्रिप्रकाराः ।
जीवन्नैर्यो ऽप्रयासोपपन्नमोक्षाध्वन्यो धन्यमूर्धन्य एषः ॥ १९ ॥
वाणिज्यक्ष्माकर्षणस्वामिसेवाः शश्वत्कुर्वन् लिप्सया श्रान्तकायः ।
रागे सत्यप्यक्षमः क्वाप्यगत्या शाम्येच्चेत्तद् घट्टकुट्यां प्रभातम् ॥२०॥
इत्यभ्यस्यन् दोषदृष्टिं विलासी शुद्ध्यै गङ्गां सेवमानस्त्रिकालम् ।
अश्नन्नल्पं भैक्षमन्यानपेक्षो दीर्घं कालं रुद्धबाह्येन्द्रियो ऽभूत् ॥२१॥
तेषु स्वस्वार्थप्रवृत्त्यक्षमेष्वप्यौत्सुक्येनात्यक्तचेताः स खिन्नः ।
रागं मिथ्याज्ञाननाशैकनाश्यं निश्चित्यागाद्भूय आचार्यपार्श्वम् ॥२२॥

---

१ आसन्नमृत्यवः । २ परलोकभीतिशून्यान् विषयकामुकांश्च ।
३ रागादीनां रात्रेश्च । ४ चोरः । ५ प्रीतेः रक्तवर्णस्य च ।

नष्टप्रायाहंक्रियादम्भदोषं लुप्यद्रोषं वीक्ष्य रागैकशेषम्।
आलोच्यालिर्युक्तमस्योपदेशं जिज्ञासुं तं ब्रूहि वत्सेत्युवाच॥२३॥
इष्टं प्रष्टुं सोऽनुशिष्टः प्रहृष्टः साष्टाङ्गं तं सम्प्रणम्योपविष्टः।
आचष्टौलूक्याक्षपादोपदिष्टं धृष्टो मोक्षं शिष्टसंसत्सु दुष्टम्॥२४॥
सर्वं दुःखक्ष्वेडमिश्रं सुखान्नं प्रेक्षावद्भिस्त्याज्यमित्यभ्युपैमि।
भोक्तुं शक्यं तद्विविक्तं न सौख्यं, तेनानास्था धीमतां युज्यतेऽत्र॥
तन्वां सत्यां तद्द्वयी चानिवार्या तस्माद्देहोच्छेदयत्नो विधेयः।
कार्तार्थ्यं तद्देहविच्छेदमात्रान्ना,न्यो भावी स्वार्जितैः कर्मभिः सः॥
तस्मात्पुण्यापुण्यरूपप्रवृत्तावुच्छेद्यायां हेतवोऽस्या विनाश्याः।
दोषा रागद्वेषमोहास्त्रयोऽमी मिथ्याज्ञाने नाशिते नोद्भवेयुः॥२७॥
मिथ्याज्ञानं तत्त्वधीमात्रनाश्यं तस्मात्तत्त्वज्ञाननिर्बाधसिद्धौ।
हेतूच्छेदात्कार्यनाशे प्रणाड्या सिध्येन्मोक्षोऽशेषदुःखप्रणाशः॥२८॥
तत्त्वज्ञानं मोक्षमार्गैः प्रसाध्यं चोपास्यं चेत्यावयोरैकमत्यम्।
भूयान्भेदः किन्तु तस्य स्वरूपे, तद्बृंहीमो यत्परीक्षोपपन्नम्॥२९॥
अस्त्वीशोऽस्मत्कृत्यशक्यप्रपञ्चस्यैकः कर्ता नित्यधीच्छाप्रयत्नः।
तन्नित्यत्वं चानवस्थाप्रहाण्यै स्वीकार्यं, किं ब्रह्मणा निर्गुणेन॥३०॥
सर्वज्ञत्वाल्पज्ञते चेशजीवौ भिन्तो, जीवान्योन्यभेदे तु हेतुः।
एको जातोऽन्यः प्रमीतोऽत्र मुक्तो ज्ञानी कामी बद्ध इत्थं व्यवस्था॥
बालस्याद्या सौख्यहेतुत्वधीजा व्याप्तिज्ञानात्स्तन्यपानप्रवृत्तिः।
प्राच्यं भोगं वेदयन्ती क्रमेणानादिं जीवं ग्राहयत्यन्तशून्यम्॥३२॥
धर्माधर्मौ ज्ञानवाञ्छाप्रयत्ना जीवे जन्याः, कायवाक्चित्तजौ द्वौ।
चेतोयोगादन्तिमाः सौख्यदुःखे चोत्पद्यन्तेऽध्यक्षतां चोपयान्ति॥
इष्टानिष्टाध्यक्षमेवास्य भोग,स्तत्सम्पत्त्यै भूजलाग्न्याशुगाणून्।
नित्यान्व्यस्तानीश्वरेच्छासहायं जीवादृष्टं स्पन्दयत्यादिसर्गे॥

---

१ विषम्।

अन्योन्यं तैर्युज्यमानैः क्रमेणारब्धाः स्थूला नैकरूपा जडार्थाः ।
प्रत्यक्षत्वं प्राप्य पुंसीष्टदुःखे कुर्वन्त्या,भ्यां रागरोषौ प्रथेते ॥३५॥

तज्जा पुण्यापुण्यहेतुः प्रवृत्ति,स्ताभ्यां जन्म,तेन दुःखानि चेति ।
जीवो भ्राम्यन्नत्र संसारचक्रे तत्त्वज्ञानावध्यवाप्नोति दुःखम् ॥३६॥

भेदे स्वस्मिन् देहचित्तेन्द्रियेभ्यः सम्यग् ज्ञाते मोहनाशेन योगी ।
तेषूपेक्षां प्राप्य नीरागरोषः पुण्यापुण्ये नार्जयत्यप्रवृत्त्या ॥ ३७॥

भोगाद् नष्टारब्धदेहाघपुण्यः पूर्वं मुक्तोपेक्षितस्वान्तवृन्दम् ।
कायव्यूहं चाप्य भोगैः पुराणे पुण्यापुण्ये संचिते प्रक्षिणोति ॥३८॥

देहारम्भे द्वेषरागौ सहायौ ताभ्यां हीने ते सती अप्यशक्ते ।
नष्टप्राये तिष्ठतां नाम, तत्त्वज्ञानेनैते नश्यतो वेति के चित् ॥३९॥

एवं प्रच्याशेषपुण्याघनाशे भोगेनैवारब्धतन्नाशसिद्धौ ।
तूष्णीं स्थित्या ऽनुद्भवाच्चोत्तरेषां जीवो मुच्येतेति युक्तः क्रमो ऽयम् ॥

ब्रह्माद्वैतं को ऽभ्युपेयादमानं, माने सत्यद्वैतसिद्धान्तहानिः ।
किं चिन्नापि स्वप्रकाशं, न हीष्टे रोढुं स्कन्धं स्वं वटुः शिक्षितो ऽपि ॥

नोपादानं चेतनं ब्रह्म विश्वस्यै,वं हि स्याच्चेतनं सर्वमेव ।
दृष्टा लोके मृत्तिकाऽऽरब्धकुम्भे स्वोपादानस्थायिमृत्त्वानुवृत्तिः ॥

नेदं हेतुर्नापि कार्यं क्व चिच्चेद्, व्यर्थं ब्रह्माजागलोत्थस्तनाभम् ।
तेनामानं निष्फलं निर्विशेषं श्रद्धामात्रात् कःसुधीरभ्युपेयात् ॥४३॥

शुक्तौ रूप्यं बाध्यते सद्य इत्यस्यादौ दृष्टस्यान्यथाख्यातिरास्ताम् ।
तद्बाध्येतार्थक्रियाकारि कस्मा,त्कोशे यत्नाद्रक्षितं तन्न मिथ्या ॥४४॥

ब्रह्मज्ञानेनास्य बाधो दुराशा, बध्यव्यावृत्तैकधर्माप्रतीतौ ।
नाधिष्ठाने बाध इष्टो न दृष्टो, निर्धर्मत्वाद् ब्रह्म बाधाश्रयो न ॥४५॥

---

१ जयन्तवृत्तौ न्यायमञ्जर्यामिदं स्पष्टम् ।

२ कर्मकर्तृत्वयोरेकदा विरोधात् । तदेवोदाहरणेन दर्शयाति ।

३ अधिष्ठानगतस्वरूपसाक्षात्कारं विना कुत्रापि बाधादर्शनात् ।

माया तुच्छा ऽज्ञानमात्रं भ्रमो वो,पादानत्वं सर्वथा ऽस्यां न युक्तम् ।
वन्ध्यापुत्रे नाप्यभावे गुणे वा द्रव्यारम्भे हेतुता दृष्टपूर्वा ॥ ४६ ॥
सत्ता[२]ऽसत्तातद्द्विरूपानिरूप्या माया नूनं भिक्षुणैवेष्यमाणा ।
क्षीणा स्वन्तं चाप्यवन्ती विगानाद् विद्वद्गोष्ठ्यां नैति भिक्षोः कुटीरात् ॥
प्रीत्यप्रीत्योर्बन्धमुक्त्योर्व्यवस्था जीवाद्वैते बाधिका, सिद्धये ऽस्याः ।
ब्रूषे ऽगत्योपाधिभेदं, ततः स्यादन्ते रण्डोद्वाहनीतिप्रसङ्गः ॥४८॥
तार्तीयीके यत् क्षणे नश्यदेवाशेषं दृष्टं वेदनं वा सुखं वा ।
तत्तादात्म्यं ब्रह्मणो देहिनो[३] वा को विब्रूयात्तस्य नित्यत्वमिच्छन् ॥
प्रीतेर्भानं दुःखभोगक्षणे ऽपि प्राप्नोत्यात्मा चेत्सुखाभिन्नरूपः ।
नव्यैर्दुःखैः प्राच्यसौख्यप्रणाशे त्वात्मोच्छेदापत्तिरत्यन्तदुष्टा ॥
आत्मज्ञानाभेदवादे सुषुप्तौ किं चिन्नाजानामिति स्यात् कथं धीः ।
निःसामान्ये निर्विशेषे निरंशे तद्भेदेनास्या न शक्योपपत्तिः ॥५१॥
भोग्यान् सर्वान्प्रायशो दुःखहेतून् बाह्यान् हेयान् वक्तुमाभ्यन्तरांश्च ।
तेषूपेक्षादृष्टिसिद्ध्यै मुमुक्षोर्वेदः किञ्चिन्नेह नानेत्युवाच ॥ ५२ ॥
योगी तिष्ठत्येव वैशेषिकाणां नाशे जाते मोक्षकाले गुणानाम् ।
इत्यैदंपर्याश्रयादेकमेवेत्यादिर्वेदे गौणवृत्त्या प्रवादः ॥ ५३ ॥
तात्पर्यस्यैतादृशस्य ग्रहे मे कर्मोपास्त्यावेदको वेदराशिः ।
साहाय्यार्थं कल्पते, त्वन्मते तु स्याद् वैयर्थ्यं तस्य सर्वस्य, पश्य ॥
नैवौद्धत्यान्नापि चाश्रद्दधानः पृच्छामि त्वां, किं तु वेदाक्षरस्य ।
एकस्यापि व्यर्थतां न क्षमे, ऽतस्तत्त्वज्ञानायैव तर्कान् श्रयामि ॥५५॥
इत्युक्त्वा ऽसौ मस्तकन्यस्तहस्तः स्वाचार्याङ्घ्रिद्वन्द्वसंलग्नदृष्टिः ।
वाचं तस्यापेक्षमाणः स्वशङ्कापङ्कातङ्कोद्धारहेतुं व्यरंसीत् ॥ ५६ ॥
स्मित्वा ऽथालिस्तस्य वेदाक्षरास्थां कार्कश्यं तद्विप्रतीपे च तर्के ।
निर्व्याजां चालोच्य तत्त्वे बुभुत्सां वत्स ब्रूमो, ऽत्रावधेहीत्युवाच ॥

२ मयाया दर्शनान्तरेष्वनाश्रयणात्परिहसति । ३ जीवस्य ।
४ विरुद्धं भाषेत । ५ आत्मनः सुखतादात्म्यात् ।

दिष्ट्या पुण्यैः क्षालितं कल्मषं ते, श्रद्धा वेदेष्वीश्वरे चान्यथा क्व।
तत्सेवैव प्राणिनां मोक्षबीजं, वेदान्तैस्तु ज्ञाप्यते वस्तुतत्त्वम् ॥५८॥
वेदाः सर्वे स्वार्थयुक्ताः कथं स्युः, सुस्था सर्वा स्यात्कथं लोकयात्रा।
जीवस्य स्यात्केन सर्वेष्टसिद्धिः, प्राज्ञैरेतच्चिन्तनीयं सदैव ॥५९॥
वीक्ष्याक्षिभ्यामग्रतःस्थं फलं वा धूमेनाद्रौ वा ऽनुमायाश्रयाशम् ।
बुद्ध्वा शब्दैरिष्टवस्त्वापणे वा लोकः प्राप्नोतीष्टमत्र प्रवृत्तः ॥६०॥
शुक्तौ रूप्यं चाकचक्येन बुद्ध्वा नीहारेणाद्रौ च निश्चित्य वन्हिम् ।
यद्वा शब्दैर्वञ्चकस्य प्रवृत्तः प्राप्नोतीष्टं नेति तावत्प्रसिद्धम् ॥६१॥
वर्गद्वन्द्वे ऽपि प्रवृत्तेः समत्वाद्धेतौ प्रामाण्यं प्रमात्वञ्च बुद्धौ ।
विज्ञायेते ज्ञाननिष्पत्तिकाले,सा धीः सत्या ऽऽस्तां मृषा वा ऽन्यदेतत्॥
दोषाशङ्की ज्ञाननिष्पत्तिकाले तूष्णीं तिष्ठन् तत्परीक्षां विधत्ते ।
तं निश्चिन्वन् भ्रान्तितो वस्तुतो वा ज्ञातं वस्तूपेक्षते प्रेक्ष्यकारी ॥
ज्ञाने जाते तद्गतं तु प्रमात्वं प्रामाण्यं चैतस्य हेतौ तदैव ।
दोषाभावे जायते, तस्य सत्त्वे भ्रान्तित्वाप्रामाण्ययोगस्तयोः स्यात् ॥
यस्त्वज्ञातं दोषमुत्प्रेक्षमाणस्तस्याभावं निश्चिकीर्षुर्न कुर्यात् ।
किं चित्कार्यं तत्परीक्षैककार्यः स प्राप्तव्यं नाप्नुयान्नित्यशङ्की ॥६५॥
आस्तामेत,त्तेन पुंसां प्रवृत्तविष्टावाप्तौ हेतुतानिश्चयस्य ।
हेतुत्वं,तज्ज्ञानसत्यत्वबुद्धेरत्रापेक्षा नानवस्थाप्रसङ्गात् ॥ ६६ ॥
साग्नावद्रौ को ऽपि नीहारलेखां धूमं मत्वा ऽथानुमाया ऽनया ऽग्निम्।
आरूढो ऽद्रिं प्राप्य वन्हिं भ्रमं स्वं प्राच्यं सत्यं वेत्ति संवादमात्रात् ॥
धूमेनैवान्यो ऽनुमायाग्निमद्रावारूढो ऽमुं तावदग्नौ विनष्टे ।
अप्राप्यैनं तत्र सत्यामपि स्वां वित्तिं मिथ्या मन्यते विप्रलम्भात् ॥
मन्दालोके माल्यवद्भूस्थसर्पं माल्यं मत्वा को ऽपि पाणिं प्रसार्य ।
सद्यः सर्पे विद्रुते लब्धमाल्यःप्राच्यां भ्रान्तिं मन्यते स्वां यथार्थाम् ॥

१ लौकिकप्रत्यक्षादिप्रमाणानां कर्मोपासनाप्रतिपादकवेदभागानां च व्यावहारिकतत्त्वावेदकत्वमेव न पारमार्थिकतत्त्वावेदकत्वं तावन्मात्रेणापि प्रवृत्यादि सिध्यतीति व्यवस्थापयितुं भूमिकामारचयति ।

दीपालोकेनावधार्याह्यभावं रुद्धद्वारे मन्दिरे को ऽपि सुप्तः ।
प्रातर्वीक्ष्याहिं कुतश्चित् प्रविष्टं प्राच्यां सत्यां वेत्ति वित्तिं मृषेति ॥७०॥
एवं शाब्दे योज्य,मेतेन सिद्धं संवादो ऽस्यां विप्रलम्भश्च वित्तौ ।
याथार्थ्यस्य भ्रान्तितायाश्च बुद्धौ हेतुः, सा धीर्वस्तुगत्या मृषैव ॥७१॥
रङ्गं कश्चिद्रूप्यबुद्ध्या गृहीत्वा तन्मूल्येन भ्रान्तविक्रेतृशाठ्यात् ।
काचं क्रीत्वा तं मणिं मन्यमानः संवादे ऽपि भ्राम्यति प्राज्ञमानी ॥७२॥
एवं लोके पुंप्रवृत्तौ मतीनां बाधज्ञानाभावमात्रात् क्षमत्वम् ।
तावत्कालं तत्प्रमात्वग्रहं चालोच्योपेक्षे वस्तुस्तत्प्रमात्वम् ॥७३॥
कः प्रत्यक्षे चानुमाने पुरोक्ते पश्चाद्दाषेज्ञानसामग्र्यभावात् ।
तद्याथार्थ्यं न प्रतीया,त्कथं वा लोकैस्तस्य भ्रान्तता बोद्धुमर्हा ॥
तस्माल्लोकः स्वीयदृष्ट्यैव बाधं पश्यन् मिथ्या मन्यते ऽ,न्यत्तु सत्यम् ।
मिथ्यात्वे ऽपि व्याहारिक्यभीष्टा सत्ता,ऽस्माकं तेषु, नास्यां विवादः ॥
सद्यो बाधे प्रातिभासिक्यतः स्यात्सत्ता ऽन्यस्मिन् व्यावहारिक्यभीष्टा,
तत्साङ्कर्यं प्रोक्तलक्ष्येषु चिन्त्यं, भूयान् दृष्टस्तद्विवेकैस्तु लोके ॥७६॥
तावन्मात्राद्वैदिकी लौकिकी वा कर्मोपास्तिज्ञानवार्ताप्रवृत्तिः ।
सम्पन्ना च,त्पारमार्थिक्यपीह ज्ञातुं शक्या हेतुना केन सत्ता ॥७७॥
कस्त्रैकाल्यं वेत्त्यशेषांश्च दोषान् वेदं मुक्त्वा त्वादृशश्चर्मचक्षुः ।
सद्यो बाधादर्शने ऽप्यस्य बाधो भावी नेति प्रत्यये साधनं किम् ॥
जैमिन्युक्त्या ऽपौरुषेयत्वमास्ता,माप्तोक्तत्वं गौतमोक्त्या ऽथ वा ऽस्तु ।
वक्तुं भ्रान्तिं विप्रलिप्सां प्रमादं पक्षद्वन्द्वे नास्ति वेदे ऽवकाशः ॥७९॥

---

१ शुक्तिरजतादौ । २ घटादौ ।

३ शुक्त्यंशे व्यावहारिकी रजतांशे प्रातिभासिकीति ।

४ स्वाप्नपदार्थेषु प्रातिभासिक्येव घटादौ व्यहारिक्येवेति ।

५ कालत्रये ऽप्यबाधितत्वरूपसत्यत्वज्ञानाय विशेषणविधया त्रैकाल्यज्ञानस्यापेक्षितत्वात् ।

६ दोषाभावसहकृतज्ञानसामग्रीजन्यत्वज्ञाने सति प्रमात्वग्रहात् ।

बाधव्याधालूनयाथार्थ्यशृङ्गानेकज्ञानन्यङ्कुयूथप्रविष्टा ।
योद्धुं नार्हा नित्यनिर्दोषवेदव्याघ्रेणेयं जीवगा धीकुरङ्गी ॥८०॥
आसंसारं लब्धयथार्थ्यराज्यैरप्यध्यक्षैर्लौकिकैर्बाधभीतैः ।
शक्यो नैकब्रह्मदुर्गप्रविष्टो वश्यः कर्तुं तात्त्विकत्वाख्यसम्राट् ॥८१॥
रागाक्रान्तानन्तजीवप्रवृत्तीष्टाप्तिज्ञानोत्पादराज्याप्तिसुस्थः ।
सौभ्रात्रान्न स्पर्धते वेदमूर्ध्ना कर्मोपास्त्यावेदको वेदभूपः ॥८२॥
एवं तावल्लौकिकी वैदिकी वा सुस्था ज्ञातृज्ञानमेयव्यवस्था ।
वेदान्तोक्तां तात्त्विकीं ब्रह्मसत्तां नो विद्वेष्ट्यन्यत्र लब्धावकाशा ॥
चन्द्रद्वित्वे शुक्तिरूपे ऽहिमालये भिन्नान् दोषान् गौरवेणावधीर्य ।
ब्रह्मान्यत्वं बाध्यतायां निदानं स्वीकर्तव्यं लाघवेन प्रयुक्तौ ॥८४॥
लोके सिद्धं भेदमाश्रित्य कर्मोपास्त्योर्मायाक्लृप्तजीवेष्टसिद्ध्यै ।
स्वं तात्पर्यं बिभ्रता वेदभागेनादौ ज्ञातो नैव भेदो विधेयः ॥८५॥
अज्ञातत्वा,दर्थवत्त्वाच्च मुक्त्या, भूयोऽभ्यासा,दर्थवादाच्च, युक्तेः, ।
अद्वैतं तूपक्रमान्तैकरूप्याद्, वेदान्तानां मुख्यतात्पर्यभूमिः ॥८६॥
तत्त्वज्ञानस्यापवर्गस्य चान्तः कार्यं किं चिन्नेष्यते द्वारभूतम् ।
आत्मानं त्वं ज्ञातवांश्चाभयं च प्राप्तो ऽसीति ह्याह वेदो विदेहम् ॥
त्वत्सिद्धान्ते त्वात्मदेहादिभेदज्ञानादूर्ध्वं जायमानो विरागः ।
औदासीन्याद्युक्तदीर्घप्रणाड्या देहोच्छेदानन्तरं मुक्तिहेतुः ॥८८॥

---

१ बहुषु चन्द्रप्रादेशिकत्वादिप्रत्यक्षेष्वप्रमात्वस्य गृहीततया तादृशप्रत्यक्षसमूहप्रविष्टाया द्वैतधियोऽप्रमात्वस्यानिश्चये ऽपि संभावितत्वाद्दुर्बलत्वं वेदजानतधियस्तत्संभावनाया अप्यभावात् प्राबल्यमिति भावः ।

२ प्रत्यक्षैर्नृपैश्च । ३ तेषां दुर्बलत्वस्यास्य बलवत्त्वस्य च पूर्वश्लोके दर्शितत्वात् । ४ विषयभेदात् रागिणं प्रति कर्मोपास्त्यावेदकवेदभागस्य विरक्तं प्रति वेदान्तानां प्रवृत्तेः । ५ उपसंहारः तथा च वार्तिकम् । उपक्रमोपसंहारावभ्यासो ऽपूर्वता फलम् अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये इति । ६ अभयं वै जनक प्राप्तोऽसि तदात्मानमेवावेदिति बृहदा. ४ । २ । ४

तद्वैराग्यं मन्मते तत्त्वबुद्धेरङ्गं जिज्ञासैकतानत्वहेतुः ।
तत्त्वज्ञानात्तु स्वभावादनादिर्माया नश्येत्तत्सुखं चापवर्गः ॥८९॥
सर्वोच्छेदं चात्मनि प्रीतिमत्योर्मोक्षं वाञ्छन् मूढ भङ्ग्यन्तरेण ।
आत्मोच्छित्त्यै चेष्टसे,तद्विनाशे सन्वाऽसन्वा ऽऽत्मा भवेद् ग्रावतुल्यः॥
यस्योच्छेदं को ऽपि नेच्छे,द्यदर्थं भार्यापुत्रादीष्यते, यत्परार्थम् ।
नेष्टं, प्राहुस्तत्सुखं, तादृगात्मा भाव,स्तस्मिन् नापलाप्यं सुखत्वम् ॥
वृत्तीरक्षव्याप्तिधीशब्दजाता जन्मोच्छेदाक्षिप्तजाड्याः प्रकाश्य ।
सर्वावस्थासाक्षिणि स्वप्रकाशे स्वात्मन्येव ज्ञानता ऽन्यत्र गौणी ॥
अन्या वृत्तिः पूर्ववृत्तिप्रकाशायापेक्ष्या चेद् दुर्निवारा ऽनवस्था ।
यत्रैवेष्टं स्वप्रकाशत्वमस्मिन् जन्यत्वोक्तौ प्राग्वदेवानवस्था ॥९३॥
तस्मान्नित्यानन्दबोधात्मभित्तौ संसिद्धायामन्ततो ऽनन्यगत्या ।
माया ऽनादिर्बाह्यसंसारचित्रं सृष्ट्वा जीवान् दर्शयेन्नात्र चित्रम् ॥
बाध्यत्वात्सा नो सती नृप्रवृत्तौ हेतुस्तस्मान्नासती न द्विरूपा ।
पक्षद्वन्द्वेष्टेन्द्रजालादिमायासाजात्येनास्तामनिर्वाच्यता ऽत्र ॥९५॥
आत्मन्येषा सच्चिदानन्दरूपैर्ज्ञाते सद्यो बाध्यते, तत्प्रणाशे ।
नश्यत्येषां धर्मता, बाध्यरूपाभावादेवाग्रे न कस्यापि बाधः ॥९६॥
सर्पस्रक्त्वेनान्यविज्ञातरज्जौ नाभ्रान्तस्य स्तो निवृत्तिप्रवृत्ती ।
विज्ञायेते त्वत्प्रमागोचरत्वेनैते, जीवन्मुक्त्यवस्था तथैव ॥ ९७ ॥
अन्योद्देशेनोत्थिते ऽपि प्रमातर्यस्मिन् भ्रान्ता भीतिलिप्से यथाऽऽहुः।
प्रारब्धेन स्पन्दिते देहइत्थं मुक्ते मूढाः कर्तृतां भोक्तृतां च ॥९८॥
जीवन्मुक्तिर्दुर्वचैषा ऽन्यशास्त्रेष्वा,स्तां भेदस्तन्मतिर्वा ऽऽत्मतन्वोः ।
योगे देहस्यानुकूलप्रतीपैः प्रीत्यप्रीती आत्मनः केन वार्ये ॥९९॥

---

१ ज्ञानाज्ञानयोर्नाश्यनाशकत्वस्वाभाव्यात् । २ यो वै भूमा तत्सुखं नाल्पे सुखमस्तीतिच्छान्दोग्योप. ७ । १ । २२ ।

३ आत्मनः सुखरूपतायां सुखलक्षणवत्त्वं प्रमाणयति ।

४ निर्विशेषसाक्षात्कारक्षणात्पूर्वं ब्रह्मण आनन्दत्वसत्यत्वानुभवत्वरूपपुरस्कारेण चिन्तनात् ।

दुःखे ऽहंताबुद्धिमात्रं न हेतु,र्दृष्टा हेतुः स्वीयताधीरपीह ।
सा ते सत्या वस्त्वबाधादनाश्या, किं तज्जीवादृष्टजो ऽसौ न कार्यः॥
मत्सिद्धान्ते ऽस्या मनोविक्रियाया मुक्तो मिथ्यात्वप्रकाशादसङ्गः।
अस्तीत्येव ज्ञेय आचार्यवद्भिः पुंभिः साक्षी चेति बोध्यं रहस्यम् ॥
किञ्चाथूंस्त्वं नेक्षसे, किं तु कार्यैः स्थूलैरेते हेतवः कल्पनीयाः ।
ब्रह्मैवोपादानमश्रावि वेदे, तेनायुक्ता कल्पना बाधिता ते ॥१०२॥
कार्ये बीजाशेषधर्मानुवृत्तौ त्वत्पक्षे ऽपि स्यादणुत्वानुवृत्तिः ।
कश्चिद्धर्मो ऽन्वेति चेत्तुष्य दृष्ट्वा कार्ये ऽशेषे ब्रह्मसत्तानुवृत्तिम् ॥
रूप्यारम्भे शुक्तिकाया विवर्तोपादानत्वं तत्प्रतीत्यास्पदत्वम् ॥
आसन्ने ऽस्मिन् पुंप्रवृत्तेरुपेयं, तेनाश्रेयो नान्यथाख्यातिवादः ॥
ब्रह्मोपादानत्वमास्थाय तादृक् सिद्धा सर्वा लोकवेदव्यवस्था ।
इत्युक्तं प्राक्, त्वन्मते भूरिनित्यादृष्टद्रव्याङ्गीकृतिर्निष्प्रमाणा॥१०५॥
हेतुः शुक्तित्वाग्रहो ऽसत्यरूप्ये तस्मिन्नष्टे रूप्यनाशादुपेयः ।
मायोपादानत्वमेवं भवेच्चेन्मायाकार्यं विश्वमस्त्विव,ष्टमेतत् ॥१०६॥
सर्गारम्भे तन्वभावान्न यत्नो जीवे वक्तुं शक्यते ऽणुक्रियार्थम् ।
दृष्टो देहान्तर्हि जन्यः प्रयत्न,स्तस्याभावे ऽणुक्रिया किं निमित्ता ॥
प्रागेवातो ऽणुक्रियायाः प्रसङ्गाज्जीवादृष्टेशप्रयत्नात्मयोगाः ।
वक्तुं नार्हा हेतवो ऽस्यां, न चर्ते पुंसो यत्नं स्याज्जडेषु प्रवृत्तिः ॥
कर्मस्वाभाव्ये त्वणूनामुपेते सृष्ट्यापत्तिः सर्वदैवेति दोषान् ।
मत्वा शिष्टा नाणुहेतुत्ववादं वेदादृष्टं तर्कमात्राद् भजन्ते ॥१०९॥
नेमे दोषाः संसृतेर्मायिकत्वे तस्मिन्पक्षे यद्यथा दृश्यते ऽत्र ।
अङ्गीकुर्मस्तत्तथैवेति, किन्तु श्रुत्या बाध्यं तन्मृषेति प्रतीमः ॥११०॥
पूर्वा पूर्वा भ्रान्तिरेवोत्तरस्यां भ्रान्तौ हेतुः, सैव संसारकल्पौ ।
बन्धं मोक्षं भावयेद्दर्शयेद्वा, सत्यं बाधाधारतत्साक्षिमात्रम् ॥१११॥

१ अस्तीत्येवोपलब्धव्यः ! कठोप. ६ । १३ ।
२ आचार्यवान् पुरुषो वेदेति छान्दोग्योप:. ६ । १४ । २ ।
३ इदमग्रे वक्ष्यते ।

पादे शस्त्र्या तुद्यमाने ऽनुलिप्तस्यान्याङ्गेषु प्रीतिसत्त्वे ऽपि तत्त्वम् ।
दुःखौत्कट्याच्छाद्यते, तद्वदास्तामात्मज्ञाने तत्सुखत्वाग्रहो ऽपि ॥
साकं बाह्याभ्यन्तरैः कल्पितार्थैरात्मज्ञानाभ्यासदार्ढ्यात् सुषुप्तौ ।
मूर्छायां वा ज्ञानसत्त्वे ऽपि दोषाज् ज्ञानत्वस्याप्रत्ययः सूपपादः ॥
भ्राम्यंश्चेतोविक्रियायां सुखत्वज्ञानत्वांशे तल्लयादात्मनाशम् ।
मा शङ्किष्ठा, आत्मयोगाज्जडायामध्यस्ता ऽस्यां प्रीतिता ज्ञानता च ॥
दुःखे द्वेषो नास्ति चेत्ते मुमुक्षो रागो नास्त्येवात्मसौख्ये ममापि ।
पक्षद्वन्द्वोपेक्षयैवात्मदर्शी विन्दत्यात्माख्यं सुखं वस्तुगत्या ॥११५॥
म भैषीस्त्वं रागलेशानुवृत्ते,र्बाह्यार्थेभ्यस्तं समाहृत्य सर्वम् ।
आत्माम्भोधौ मज्जयन्नर्थभावान्मुक्तस्त्वं संपत्स्यसे प्रार्थनीयः ॥
इत्येषा दिग् दर्शिता, प्रातिकूल्यं वेदान्तानां दुष्टतर्कैर्विहाय ।
मत्वा ऽद्योक्तं पूर्वमुक्तं च सर्वं सौम्योत्तिष्ठ त्वं निदिध्यासनाय ॥
शिष्टाचारं पालयन् यावदायुः कुर्वन्नीशायार्पणं तत्फलानाम् ।
हस्ते धृत्वा वेददीपं गुहायामन्विष्यंस्त्वं लप्स्यसे ब्रह्मरत्नम् ॥११८॥
इति प्रकाश्योपनिषद्रहस्यं विलासिने ऽलिर्भजति स्म मौनम् ।
पुनः स पातञ्जलकापिलोक्तीराश्रित्य जिज्ञासुरपृच्छदेनम् ॥११९॥

इत्यलिविलासिसंलापे खण्डकाव्ये
अष्टमं शतकम् ।

१ सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत । कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहमिति भगवद्गीता ३ । २५ ।

२ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणमिति भगवद्गीता । ९ । २७ ।



अलिविलासिसंलापे

नवमशतकविषयानुक्रमणिका।

गर्ह्यत्वं ममताधियोऽक्षचरणादिष्टापवर्गाक्षमौ
शीलं शा[3]न्तधियोऽथ योगविषयौ हेतुश्च तत्रादरे ।
वस्तुत्वं च भिदासु[6] तन्मतिमतां मुक्तिः परा जीवतां
ब्रह्माद्वैतदशैव सेति नवमे दृश्यं शतेऽन्तेऽद्भुतम् ॥ १ ॥

	श्लोकमारभ्य	श्लोकपर्यन्तम् ।
१	५	११
२	१२	२०
३	२१	४०
४	४१	६०
५	६१	७०
६	७१	७३
७	७४	७५
८	७६	१०९
९	११०	११६

अलिविलासिसंलापे

नवमं शतकम् ।

शेषाशेषस्मयहरहराहार्यसौन्दर्यजेत्रा
स्वत्रातव्यानतजनदयाद्योतिमन्दस्मितेन ।
अद्वैतं या प्रथयति सदा ध्यायतामात्मभासः
सिद्धान्तार्थप्रमितिवरदा सा ऽस्तु वागीश्वरी नः ॥ १ ॥

इत्थं श्रुत्वा गिरमुपनिषत्स्तोकवक्तव्यशेषां
निश्चित्यालेर्मतिमविहतां दर्शनार्थोपपत्तौ ।
तीर्थैकान्तोपरतिसुचिराऽऽसेवनैः पूतचित्तो
हृष्यन् भूयो व्यमृशदखिलं तद्वचो ऽसौ विलासी ॥२॥

आश्चर्यं किं समधिकमितो यन्ममाध्यात्मचिन्ता-
गन्धास्पर्शिक्षणिकविषयैकाग्रदुर्मेधसो ऽपि ।
आनन्दो ऽयं विरतिसतताभ्यासमात्रेण सिद्धः,
का ऽवस्थेतो ऽप्यधिकमहिता ऽवस्थितौ द्रष्टुरस्तु ॥३॥

क्वाहं पूर्वं जनकजननीप्रेयसीपुत्रकन्या-
तत्संबद्धप्रभुगुरुजने दुःखिते दुःखमापम् ।
देहे ऽप्यग्रानियतविरसाहारशीताऽवगाहैः
प्राप्तायासे स्थिरमतिरहो तत्त्वमन्वेषयामि ॥ ४ ॥

आत्मत्वं चेद्भवति ममतापात्रमात्रे ऽतिदीर्घं
सर्वत्र स्यात्त,दिह सुवचाः केऽपि सम्बन्धभेदाः ।

---

१ अहार्यधरपर्वताइति कोशः, तथा च कैलास इत्यर्थः ।
२ सितमेतस्य चराचरमिति भामती । ३ तस्य भासा सर्वमिदं विभातीति श्रुतिः ।

कस्तान् शक्तः परिगणयितुं, कल्पनामात्रसारै-
रात्मानं तैरलमनियतैर्बुद्धिमान् खेदयेत् कः ॥ ५ ॥
बाह्या अर्था अथ निजतनोस्तैश्च सम्बन्धभेदा-
स्तद्विज्ञानान्यपि च जनिते दुःखसौख्ये अमीभिः ।
सर्वं सत्यं यदि, समवयत्स्वेषु तर्ह्यात्मतत्त्वे
दुर्वारा स्यात् परिणतिकृता ऽनित्यता, तन्न युक्तम् ॥ ६ ॥
देहाद्बाह्ये विशदममतागोचरे ऽर्थे ऽप्यहंता-
मध्यारोप्या ऽनुभवति सुखं तस्य साकल्यसिद्धौ ।[1]
तद्वैकल्ये भवति विकलो लोक आपातदर्शी
तत्सार्वात्म्यं किमु,त ममताभिक्षुपादप्रसारः ॥ ७ ॥
पुत्राद्यार्तिः सृजति ममतामात्रतः पुंसि दुःखं,
देहाक्षोत्त्यां[2] भवति ममताऽहंतयोर्योग एतत्, ।
शुद्धाहंतामतिजनुषि नोदाहृतिः का ऽप्यमुष्मिन्,
तत्त्वज्ञानक्षपितममतामात्रधीस्तेन धन्यः ॥ ८ ॥
यः सोपेक्षो विषयजनिते नश्वरे स्वोपकारे
हन्ताहन्तां जगति विततां भावयन् भ्रान्तितो ऽपि ।
तद्वैकल्याद्भवति विकल,स्तस्य चित्तप्रसादं
सूते ऽवश्यं सपदि करुणानामिका[3] कामधेनुः ॥ ९ ॥
सैवाहन्ता यदि तु ममतां गर्भितस्वोपकारा-
माश्रित्यार्थे प्रसरति, बलादेतया ऽऽच्छाद्यते वा ।
दुःखायैषा, न तु सुखकरी कर्हि चि,त्तर्हि धीरै-
रादौ बाध्या भवति ममता, दुःखबीजं हि सैव ॥ १० ॥

---

१ पुत्रदारादिषु सकलेषु विकलेषु वा ऽहमेव सकलो विकल इत्यभिमन्यत इत्यध्यासप्रकरणे शांकरभाष्यम् । २ इन्द्रियाणाम् ।
३. मैत्रीकरुणामुदितोपेक्षाणां सुखिदुःखिपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनमिति योगसूत्रम् ।

मद्देहे ऽद्य प्रसरति रुजा, चक्षुरद्याक्षमं मे,
चेतः कान्ताविरहविकलं मामकं, मत्सुतो ऽज्ञः ।
इत्युल्लिख्य क्व च न ममतां प्राग्जनो निर्विचारो
दुःखी तस्मादहमिति वदन् सर्व एवात्र साक्षी ॥ ११ ॥
तेनात्यन्तप्रसृतममतापाशनिर्मूलनाशो-
पायो येन श्रुतिपथमतः प्रोच्यते तद्धि शास्त्रम् ।
नोपायः को ऽप्ययमभिदधे दर्शने गौतमीये
शिष्टास्तस्माद्भवविहतये तन्न पर्यग्रहीषुः ॥ १२ ॥
पुण्याऽपुण्ये तदुदितफले तद्धियो रागरोषौ
तत्संस्कारा यदि हि पुरुषे वस्तुगत्योद्भवन्ति ।
रूपान्यत्वात्परिणतिरसावात्मनः, किञ्च भारो,
दृष्टा वेदेष्वथ च पुरुषे ऽसङ्गता ऽसङ्गता स्यात् ॥ १३ ॥
यागब्रह्मवधादि मन्मतिकृतिप्रोत्थक्रियाभृत्तनू-
निर्वृत्तं, तदुपात्तपुण्यदुरिते मय्येव तेन स्थिते, ।
तज्जे स्वर्गतिदुर्गती अपि मम स्याता,मितीदृग्मते-
र्बाधो नास्ति हि तार्किकस्य समये, भ्रान्तेर्लवो ऽप्यत्र कः ॥
स्थूलः कृशो ऽहमिति बुद्धिबलेन देहे
काणो ऽहमित्यवगतेरथ चेन्द्रियेषु ।
प्राप्तात्मविभ्रमनिवर्तकतर्कमात्रा-
न्नैयायिकाः श्रुतिवचस्सु कृतोपकाराः ॥ १५ ॥
मनोयोगादेवाऽऽत्मनि हि सुखदुःखे कणभुजो
मते, चित्ते स्तां ते, श्रुतिरपि तथैवाह बहुशः ।
तयोः साक्षात्कारः क्षणिक उदितो वृत्त्यभिधयाऽऽ-
श्रयैक्यात्तत्रैवास्त्व,खिलभवसाक्ष्येव तु पुमान् ॥ १६ ॥

---

१ एतेन शिष्टापरिग्रहा अपि व्याख्याता इति व्याससूत्रम् ।

सुखदुःखतदीयवेदनव्यवहारे मनसा ऽपि सिध्यति ।
त्रिगुणस्य जडस्य तस्य तु स्फुरणायैव स साक्ष्यपेक्ष्यते ॥१७॥
बाह्यद्रव्यगुणक्रिया,स्तदनुगं सामान्य,मस्याश्रयै-
र्योगं दृष्टविशिष्टधीजनिपटुं,कांश्चिद्विशेषानपि ।
चैतन्यानुपपत्तिमिन्द्रियगणे देहे च, तर्कैं रटन्
श्रान्तस्तेन मनोमये ऽक्षचरणः कोशे चिरायास्वपत् ॥१८॥
तावन्मात्रे तस्य तात्पर्यमास्तां शास्त्रैर्नान्यैर्विस्तराद् यन्न्यरूपि ।
ऐदंपर्यं त्वात्मतत्त्वे न युक्तं, तद् व्युत्पाद्यं सांख्यपातञ्जलानाम् ॥१९॥
प्रामाण्यमत्रापि न चेदमीषां तद्दर्शनस्यानवकाशता स्यात् ।
तस्मादविश्रम्य कणादवाण्यात्मापवर्गौ पुनरेव चिन्त्यौ ॥ २० ॥
इति स हृदि विचिन्त्य भेददृष्टिं त्वरितमनादिभवार्जिताममुञ्चन् ।
विविदिषुरुचिते क्षणे ऽलिपार्श्वे कति चिदहानि गतागतैर्निनाय ॥
निदिध्यासनाया ऽनुशिष्टो ऽलिना प्राक् तदीयोपसत्तौ रतो ऽप्यन्यकाले
यमाद्यष्टयोगाङ्गकर्मानुतिष्ठन्नशुद्धिक्षयं चेतसो ऽसाधयत् सः ॥२२॥
अथ साधितसंयमैप्रतिष्ठैः क्रमशो ऽयं स्वतपोवनोपकण्ठे ।
अवलोकयति स्म दिव्यभावान् स्वयमेवोपनतान् नितान्तकान्तान् ॥
तत्र प्रादुरभूत्किलामरसरित्तीरे समीरेरित-
व्याकोचातुलपारिजातकुसुमामोदः प्रमोदावहः ।
सप्रेमोपनिमन्त्रणोद्यतसुरस्त्रीनृत्यगीतोज्ज्वलै
रम्यैः कामविहारिभिर्मणिमयै रेजे विमानैर्नभः ॥ २४ ॥
सिद्धाः संनिधिमाप्य साधुवचनैः श्रद्धाममुष्यैधयन्,
धुर्याधाय सुधां सुरा अभिदधुर्बुद्ध्वा धयैतामिति, ।

---

१ विशिष्टबुद्धिनियामकं समवायसंबन्धम् । २ योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिरा विवेकख्यातेरिति योगसूत्रम् ।
३ त्रयमेकत्र संयम इति योगसूत्रम् । ४ अहिंसाप्रतिष्ठायां तत्संनिधौ वैरत्याग इत्यादि योगसूत्राणि । ५ विकसितानाम् ।

लोकेशाश्च सशङ्कमङ्कुरितया नैसर्गिकासूयया
योगभ्रंशकरान् प्रलोभनभयारम्भाद्युपायान् व्यधुः ॥२५॥
एवंविधे व्यतिकरे स चिरात् समाधे-
र्व्युत्थाय तत्र तदृष्टचरं निरीक्ष्य ।
विस्मेरधीरपि गतस्मयसङ्ग आगाद्
धृष्टः सभीश्च यतवागलिपादमूलम् ॥ २६ ॥
गुञ्जन्तमम्बुजवने मधुपाङ्गनाभिः
साकं चरन्तमरविन्दमरन्दविन्दून् ।
आस्वादयन्तमयमन्तिकगोऽप्यलिं तं
दृष्ट्वाऽपि सोऽश्रमिति नाध्यगमद्विलासी ॥ २७ ॥
क्व स्याद्विरक्तिपरमुक्तिपदे स्थितः स,
सक्ता अमी,तदपयामिपुरेति वाञ्छन् ।
स्वाभाविकी स्थितिरियं मम,तावकी तु
योगर्द्धिजे,त्यलिगिरा गुरुमभ्यजानात् ॥ २८ ॥
नम्रः स वत्स किमु भीत इवासि, मा गाः
क्वापी,तिवादिनि गुरावकृतान्तरायः ।
गङ्गाम्बुसाधितविधिः सविधेऽस्य तस्थौ
तत्तीरनीरभवकन्दमृणालवृत्तिः ॥ २९ ॥
आयातैरघमर्षणाय मुनिभिस्तत्रास्य सेवाक्रम-
ब्रह्माद्वैतबुभुत्सुते, सकरुणां सर्वज्ञतां चाप्यलेः ।
निश्चिन्वद्भिरथैकदाऽनुरहसं संप्रार्थितोऽलिर्मुहुः
प्रीत्याऽऽहूय विलासिनं पदनतं पृच्छेष्टमित्यादिशत् ॥
विनयादवदत्ततो विलासी गलितप्रायभवः कृतार्थकल्पः ।
भगवन् भवतोदितानि पूर्वं सकलान्येव वचांस्यनुस्सरामि ॥

१ स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गादिति योग-सूत्रम् । २ स तत्र पर्येति जक्षत्क्रीडन् रममाण इति छान्दो. ८।१२।३ ।

देहे विनाशिनि गदैर्बहुधा ऽभिभूते
चैतन्यविभ्रमवशो भवता ऽनुगृह्य।
तादात्विकायतिहिताहितानिर्विचार-
व्यर्थप्रयासनिरयान्ननु तारितोऽहम् ॥ ३२ ॥

दैरूप्यमप्यविगणय्य तनावथाक्षा-
ण्यास्थाय चेतनतया तदुपास्तिसक्तः ।
शून्ये ऽखिले स्फुरति नित्यसुखे निराशो
विज्ञानकूटगहनान्मुहुरुद्धृतोऽस्मि[३] ॥ ३३ ॥

मत्वा ऽपि नित्य,मथ सङ्कुचितप्रसारि-
चैतन्यशक्ति नियतावयवं च तत्त्वम् ।
तस्योर्ध्वयात्रगमनेन कृतार्थमानी
सर्वत्र सांशयिकधीर्दयया ऽन्वशिष्ये[३] ॥ ३४ ॥

समारब्धे शुद्ध्यै प्रयतबहुतीर्थाऽभिगमने
विनोद्यालङ्कारप्रसरसरसैः सूक्तिनिकरैः ।
अनायासात् पूज्यामरबहुविधाऽऽश्वर्यविषयान्
प्रदर्श्य द्वौ लोकावपि च भवता मे सफलितौ॥३५॥

त्रेताधूमान्धकाराकुलनयनतया ऽत्यल्पकाले ऽप्यनन्त-
भ्रान्त्यैव व्रीहिमुष्ट्या ऽप्यमरपुरजयं मन्यमानः सुसाधम्।
सम्यग्ज्ञानाञ्जनेनावति भवति महाकालपाथोधिवीची-
पातोत्पाताविशिष्टं फलमनुमतया ऽप्यर्थये हिंसया न ॥

आस्तां कल्पशतावधिष्वपि सुखेष्वावश्यकी नाशिता,
तिष्ठत्वीश्वरदास्यनाम्न्यवमतौ संमानधीरर्थिनाम्, ।
अन्योन्याधिकनीचभावनियतप्रेक्षाऽभ्यसूयैव मे
देवोपास्तिषु विश्रमं न सहते[६], कार्यं किमन्यद् वद ॥

१ चार्वाकावस्थायाम् शतके २ । २ बौद्धावस्थायाम् शतके ३ । ३ जैनावस्थायां शतके ४ । ४ पञ्चमशतके । ५ कर्ममीमांसकावस्थायाम् ६ शतके । ६ सगुणोपासकावस्थायां ७ शतके ।

चेतोयोगकृता शुभाशुभफला वाञ्छा ऽऽत्मना दुस्त्यजा,
भिक्षार्थे ऽपि गतागते तनुभवौ हिंसोपकारौ ध्रुवौ, ।
स्यादेका ऽप्यनृता हिता क्व चन वाक्,मौने ऽपि सूक्ष्मा ऽस्ति सा,
ऽनारम्भास्त्रिविधस्य कर्मण इति स्वप्ने ऽपि नोत्प्रेक्ष्यते ॥
नित्यं चित्त,मथो विभुश्च पुरुषो, ऽनादिश्च योगस्तयो,-
र्भावो ऽनादिरशक्यनाश, इति च प्रोचे स्वयं तार्किकैः ।
निर्वेदाऽभ्यसने ऽन्तरा ऽऽत्ममनसोर्योगे कथं वा तनौ
तिष्ठन्त्यां सुखदुःखतन्मतिसदाऽनुत्पाद आस्थीयताम् ॥
मणिमन्त्रनयेन कस्य चित् सकारिप्रतिबन्धकत्वयोः ।
कथनं त्विह मूर्खवञ्चना न तदाश्वासपदं विचारिणाम् ॥
तस्माल्लौकिकदुष्टदर्शनपथानुत्सृज्य पातञ्जले
शास्त्रे दर्शितदिव्यसिद्धिकतया संप्रत्यहं श्रद्दधे ।
व्यक्ताव्यक्तपरार्थताभवजनिस्थित्यप्ययात्मास्तिता-
भूयस्त्वाद्युपपादनेन कपिलः शास्त्रं तदङ्गं व्यधात् ॥४१॥

व्यक्ते ह्यदर्शि सकले सुखदुःखमोह-
हेतुत्वमित्यभिमतं त्रिगुणं जगन्नः ।
अव्यक्तमस्य जनकं प्रकृतिं,विकृत्याः
साम्येन सत्स्विह च सत्त्वरजस्तमस्सु ॥ ४२ ॥

सुखयति पतिमेकैवाङ्गना, सा सपत्नी-
र्व्यथयति च, सकामान् मोहयत्यन्यपुंसः ।
त्रिगुणतनुरतः से,त्येवमन्ये ऽपि भावा-
स्त्रिगुणतनव, इत्थं कापिलाः साधयन्ति ॥ ४३ ॥

सङ्घातत्वात्तेषु पारार्थ्यसिद्धौ संघातान्यश्चेतनः साधनीयः ।
सङ्घातत्वे स्यादगुण्या ऽनवस्था ऽ,तो ऽत्रैगुण्यं तस्य सर्वैरुपेयम् ॥

---

१. [illegible] ८ सप्तके ।

उपादेयकार्यस्य हेत्वैकरूप्यात् प्रकृत्यां गुणास्ते त्रयः,सा ततोऽज्ञा ।
स्वभावादियं पुंसि भोगाऽपवर्गौ विधातुं भवादौ महान्तं प्रसूते ॥

स्वच्छत्वादिह बुद्धिनामनि चितिच्छाया पतत्ये,तया
त्रैगुण्येन जडा ऽपि पामरजनैः सा चेतनेवेक्ष्यते ।
सा ऽहंकारमिति द्वितीयविकृतिं सूते, स चैकादशा-
क्षाणां पञ्चविधाविशेषनिवहस्यारम्भको ऽस्मन्मते ॥४६॥

तन्मात्रनामान इमे ऽविशेषाः स्थूलानि भूतानि सृजन्ति पञ्च।
तेभ्यो जगद् भौतिक,मेतदन्तेऽप्यव्यक्तभावान्वितमस्ति हेतौ
अव्यक्तं हि तिलेषु तैलमिति तत् प्रादुर्भवत्युद्यमै,-
र्नासत्त्वात् सिकताभ्य उद्भवति तत्, सत्कार्यवादस्ततः ।
निर्गच्छद् बहिरक्षपञ्चकपथात् संयुक्तमर्थैर्मन-
स्तद्रूपत्वमुपैत्य,सा परिणतिर्वृत्त्याख्यया गीयते ॥ ४८ ॥

वस्त्वालोचितमिन्द्रियेण बहुधा संकल्पितं चेतसा
ऽहंकारो ह्यभिमन्यते, शमिशतैरप्येष नोच्छिद्यते ।
निर्बीजेन समाधिनैव सुजयो बुद्धेः फलं निश्चयो,
यन्मूला अखिलाः क्रिया इति महत्तत्त्वाख्यया सोच्यते ॥

स्वोपात्तसर्वविषयानुपकारमात्र-
तात्पर्यतो ऽर्पयति पुंस्युपसृत्य बुद्धिः ।
तेनाक्रिये विगतदुःखसुखे ऽपि तस्मिन्
कर्ता सुखीति कुधियः परिकल्पयन्ति ॥ ५० ॥

भोगः स एव पुरुषस्य, स एव योगो
ऽनादिस्तया सह,स एव च बन्धनामा।
दुःखाकरोति पुरुषानि,ति तस्य योगै-
रात्यन्तिकोपरतये सुधियो यतन्ते ॥ ५१ ॥

औत्सुक्ये सति चेतनस्य विविधानाश्रित्य वेषानियं
शैलूषीव चिराय रञ्जयति तं यावन्न निर्विद्यते ।

निर्विण्णात् प्रकृतेर्विकारसहितस्वान्यत्वसाक्षात्क्रिया-
मारभ्यैव निवर्तते स्वयमतः सा बध्यते मुच्यते ॥५२॥

सम्राडित्यनया तथोपचरितो भोगापवर्गोचिता-
रम्भैः स्वाम्यपि चेतनो ऽक्रियतया साक्षी भृशं निर्गुणः ।
अल्पं प्रत्युपकारमप्यविदधत्तां प्रत्युतोपेक्षते,
सा ऽवस्था परमुक्ति,रत्र तु परं द्रष्टुः स्वरूपस्थितिः ॥

निवृत्तैवं मुक्तात् प्रकृतिरपि पुंसां बहुतया
यथापूर्वं सप्त प्रकटयति रूपाणि सततम् ।
न पुंसामौत्सुक्यं विरमति, न च पीयमलसा,
ततः संसारो ऽयं प्रसरति परेषां निरवधिः ॥५४॥

इत्थं निरन्तरचलद्भवचक्रवेगै-
रूर्ध्वं कदा चि,दध एव तु भूरि नीतः ।
आयास्यते त्रिविधदुःखशतै,रथात्मा
कश्चिद् विचारयति मध्यमलोकवासी ॥ ५५ ॥

तस्य प्रतिक्षणभवत्परिणामताप-
संस्कारदुःखगुणवृत्तिविरोधचिन्ता ।
वैराग्यमुत्कटमशेषगुणाधिकारे
संपाद्य चोदयति वृत्तिनिरोधमार्गे ॥ ५६ ॥

स दीर्घकालादरसत्क्रियाभिर्निरन्तरासेविततीव्रयत्नः ।
वश्यं मनो धारयतीष्टशास्त्रादिष्टप्रदेशेष्वचलासनस्थः ॥

तद् ध्यायतः स्फुरति वस्तुनि शब्दवित्ति-
शून्यार्थमात्रवपुषि स्थिरसंयमस्य ।

---

१ धर्मो ज्ञानं विराग ऐश्वर्यं सात्विकमेतद्रूपं तामसमस्माद् विपर्यस्तम् । रूपैःसप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिरिति सांख्य-कारिके । कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वादिति योगसूत्रम् ।

२ परिणामतापसंस्कारैर्गुणवृत्तिविरोधाच्च सर्वमेव दुःखं विवेकिन इति योगसूत्रम् । ३ देशबन्धश्चित्तस्य धारणेति योगसूत्रम् ।

आविर्भवन्ति विविधा अथ सिद्धयस्ताः
शास्त्रे श्रुता अपि हि याः प्रविलोभयन्ति ॥ ५८ ॥

अन्तरायपदवीप्रदानतस्ता विसर्जयति यो ऽस्मयो ऽसजन् ।
तं समाधिरुपातिष्ठते स यो धर्ममेघ[1] इति योगिभिः स्तुतः ॥

क्लेशेषु कर्मसु च तेन निवर्तितेषु[2]
प्राप्ते प्रतिप्रसव[3]मत्र गुणत्रये ऽपि ।
सर्वज्ञतां समधिगच्छति तां स युक्तः,
प्रोचे कणादमुनिनेश्वरमात्रगा या ॥ ६० ॥

योगी यदा लषति वस्तु, यथा च वेत्ति,
सद्यस्तथा भवति तत्, किमितो ऽपि चित्रम् ।
तेनाक्षपादमतमोक्षमुपेक्ष्य रूक्षं
मुक्तिं पतञ्जलिमतां बहु मानयामः ॥ ६१ ॥

कायाखिलामयनिवर्तकसूत्रकाराद्
भाष्याऽनुशासननिवर्तितवाग्विकारात् ।
योगोपदेशविधिसाधितचित्तशुद्धे-
राप्तं पतञ्जलमुनेरपरं न विद्मः ॥ ६२ ॥

प्रौढिवादविधयैव कापिला ईश्वरं निषिषिधुः, क उद्धरेत् ।
तं विहाय सदुपायबोधनाऽनुग्रहेण पुरुषान् भवाम्बुधेः ॥

वैमत्यमास्तियति नाम, तयोस्स्वसङ्गा-
नेकत्वचेतनविभुत्वमुखेषु पुंसाम् ।
धर्मेषु नास्ति विमतिः, प्रकृतौ च सत्त्व-
पारार्थ्यजाड्यगुणसंहतिकर्तृतासु ॥ ६४ ॥

रक्तप्रसूननिकटस्थितिमात्रदोषाद्
रक्तः समीक्ष्यतइह स्फटिकः सितो ऽपि ।

---

१ प्रसंख्यानेऽप्यकुसीदस्य धर्ममेघः समाधिरिति योगसूत्रम् ।
२ ततः क्लेशकर्मनिवृत्तिरिति योगसूत्रम् ।
३ गुणानां प्रतिप्रसवः कैवल्यमिति योगसूत्रम् ।

एवं पुमान् विगतदुःखसुखो ऽपि बुद्धि-
सांनिध्यतः स्फुरति दुःखितवत् सुखीव ॥ ६५ ॥
नैसर्गिकी धवलता ऽपगते तु पुष्पे
यद्वन्मणेः स्फुरति, पुंस्यपि सैव रीतिः ।
नेदिष्ठबुद्धिगगुणप्रतिबिम्बमात्रा-
न्नासङ्गता ऽस्य नियता कथमप्यपैति ॥ ६६ ॥
उच्छिद्यते कृतिशतैरपि नौष्ण्यमग्नेः,
स्वाभाविकं हि त,दतः कथमस्य हानिः ।
उद्युञ्जते तु सुधियः पुरुषस्य मुक्त्यै,
वेदे ऽप्यपाठि विशदं पुरुषो ह्यसङ्गः ॥ ६७ ॥
तत्त्वज्ञानाद्वामदेवो विमुक्तो, बद्धा अन्ये,ऽजायतायं, मृतः सः ।
चैत्रो दुःखी, त्वं सुखीति व्यवस्था पुंसां भेदात् कापिलैः सूपपादा ॥
साक्ष्येव केवलमपेक्ष्यत इत्युपेते
माध्यस्थ्यचेतनतयोरिह को विवादः ।
ब्रह्माण्डकोटिविषयप्रतिबिम्बभाजः
पारे गिरां किमपि वैभवमस्य पुंसः ॥ ६९ ॥
विभुत्वादस्पन्दो जनयितुमशक्तो जगदयं,
न कार्यं निर्हेतु, श्रुतिरपि जगत्सृष्टिमवदत् ।
ततो ऽर्थापत्त्या च प्रकृतिमपरां चेतनगणाद्
वदद्भिः किं सांख्यैः कृतमनुचितं, तत् प्रकथय ॥७०॥
प्रकृतिस्थगुणेषु भिन्नता न भवेत् सत्त्वरजस्तमःसु चेत् ।
सुखदुःखविमोहभेदवत् जगदेतत् कथमित्युदीर्यताम् ॥ ७१ ॥
भेदप्रमाविकलयोश्च समाधिसुप्त्योः
प्राच्यानुभूतिभवसंस्कृतिभेदसत्ता ।
व्युत्थानजागरणकालिकपुंप्रवृत्ति-
भेदेक्षणेन भवता न कदर्थनीया ॥ ७२ ॥

किं विस्तरेण, गुरुशिष्यगणप्रमाण-
तत्साधनीयफलभेदमृषात्ववादे ।
को बोधये,दवदधीत च, कैश्च मानैः,
कस्मै फलाय, तदिहास्तु भिदैव वस्तु ॥ ७३ ॥
प्रीत्यप्रीत्योः प्रकृतिगतयोः पुंस्यसत्त्वप्रमित्या
जीवन्मुक्तिः प्रकृतिपुरुषद्वैतदृष्ट्यैव सिध्येत् ।
एतां लब्धुं विजहदखिलं सेवमानः समाधिं
लोभ्ये पीड्ये तदसहसुरैर्व्युत्थितो, ऽतो बिभेमि ॥
वस्त्वापरोक्ष्यमपहाय न मोक्षसिद्धि-
र्भेदश्च वस्त्विति ममैतदुपासकस्य ।
विघ्नौघ एष भवता ऽद्य निवार्यता,मि-
त्युक्त्वा कृताञ्जलिपुटो व्यरमद्विलासी ॥ ७५ ॥
अथालिरालोच्य बिलासिनस्तां योगेषु निष्ठां मनसश्च शुद्धिम् ।
तत्त्वोपदेशेन कृतार्थयिष्यन् प्रचक्रमे वस्तुविवेचनाय ॥ ७६ ॥
साधु त्वया व्यवसितं, कुशलो ऽसि सौम्य,
सानुग्रहश्च भगवांस्त्वयि विश्वनाथः, ।
दिष्ट्या ऽऽप्तवानसि दुरापसमाधिभूमिं,
नूनं स्थितस्तवपुरोभुवि, दिव्यहंसः ॥ ७७ ॥
श्रद्धालुशुद्धमतिसिद्धिगणानपेक्ष-
त्वाद्दक्षशिष्यविनये मम कः प्रयासः ।
तस्मात् पुरोक्तपुनरुक्तिमुपेक्ष्य सांख्य-
योगोक्तिदोषमधुना ऽभिदधे ऽवधेहि ॥ ७८ ॥
कर्तृत्वं प्रकृतेरचेतनतया नो युज्यते, कुम्भकृ-
द्व्यापारेण विना घटीभवति किं लोके स्वयं मृत्तिका ।
व्याप्तां कार्यशतेषु चेतनतया दृष्ट्वा वयं कर्तृतां,
गौः प्रस्नौति पयो हितं निजशिशोरित्येव मन्यामहे ॥

पर्वतात् स्रवति वारिणीशितुःकर्तृतामुपयतो मम श्रुतिः ।
आनुकूल्यमुपयाति,तावकी कल्पना ननु तया विरुध्यते ॥८०॥

अचिन्त्यरचनाक्रमं नियतदेशकालोचिता-
गणेयजडचेतनाद्भुतपदार्थपूर्णं जगत् ।
जडा पुमनधिष्ठिता प्रकृतिरन्तरेणेक्षणं
सृजेत्कथं,मिहावयोरविमता ऽस्ति कोदाहृतिः ॥८१॥

स्वभावतश्चेत् प्रकृतेः प्रवृत्तिः, सदाप्रवृत्तेर्न भवेद् विमुक्तिः ।
अपेक्षणे ऽन्यस्य स एव कर्ता ऽभ्युपेयतां, किं जडया प्रकृत्या ॥

ईशस्तु चेतनतया ऽध्यवसायपूर्वं
संकल्प्य तद् विरचये,दिह नास्ति दोषः ।
वैषम्यनिर्घृणतयोरपि नैव कर्म-
सापेक्षताऽऽश्रयणतो भवति प्रसक्तिः ॥ ८३ ॥

ज्ञायन्त आन्तरतया सुखदुःखमोहाः,
स्त्री धीमतामपि हि बाह्यतयैव भाति, ।
तेषां निमित्तमियमस्तु, निमित्तकार्या-
भेदे कुलालघटयोरपि तत्प्रसङ्गः ॥ ८४ ॥

सत्तां कार्यस्य नाशे ऽप्ययि वदसि, मृदा नानयस्यम्बु कस्माद्,
हेत्वाकारेण तां चेदभिलपसि, ततो हेतुसत्तैव सत्या ।
अव्यक्तत्वेन सत्त्वं दृशिविषयतया ऽसत्त्वमेकत्र वस्तु-
न्युक्तं चेद्धेतुरूपं सद,परमसदि,त्यापतत्यज्ञसैव ॥ ८५ ॥

बुद्धिस्थैः प्रतिबिम्बितैर्यदि गुणैरात्मा न संसृज्यते
भोगः को ऽस्य, न चाभिमान उचितो, ऽहंकारकार्यः स ते ।
संसर्गे तदसङ्गताऽभ्युपगमो मोक्षश्च ते दुर्घटो,
मिथ्यात्वं प्रतिबिम्बं आश्रयसि चेत्सिद्धान्त एवैष नः ॥८६॥

---

१ एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्यो ऽन्या नद्यः स्यन्दन्ते । बृह. ३ । ८ । ९ । २ ईक्षतेर्नाशब्दम् रचनानुपपत्तेश्च नानुमान-मिति व्याससूत्रे ।

भिद्यन्तां, विभवस्तु सन्ति पुरुषाः, सूते प्रधानं मतीः,
किञ्चैतत्प्रतिविम्बधारणसहं चैतन्यमेषां ध्रुवम्, ।
आस्तां भेदमतिः, कथं त्वपरधीभोगो निवर्त्यस्त्वया,
मिथ्याज्ञानमृते च चेतनधियोः स्वस्वामिभावो ऽपि कः ॥८७॥
अन्त्यां वृत्तिमुपैषि भेदविषयां, भेदाश्रयं चेतनं
सत्वञ्च प्रतियोगि सा स्पृशति चे,न्निर्बीजयोगो गतः ।
अस्पर्शे त्वनयोर्न भेदविषया धी, स्तौ विना सा कथं
साक्षी केवलमत्र विस्फुरति चे,त्सिद्धं ममाभीप्सितम् ॥८८॥
सार्वज्ञ्यं मोक्षकाले वदसि यदि तदा सत्त्वमत्राऽनिवार्यं,
ज्ञानं सत्त्वैककार्यं तव किल समये, हेत्वभावे कुतस्तत् ।
ज्ञानात् को ऽन्यः प्रकाश,स्तत इयमगतिः स्वात्ममात्रप्रकाशे
ऽप्य,ज्ञत्वोक्तौ तु मोक्षात् कृणभुगभिमतात् त्वन्मते को विशेषः ॥
योगाङ्गे बहिरङ्ग एव नियमे सन्तोषमातिष्ठसे,
तन्मात्रेण वदस्यनुत्तमसुखं, तत्राविरम्य श्रमैः ।
वाञ्छन्नुत्तरभूमिकास्तदधिकं नूनं परस्तात् सुखं
प्रत्येषि, त्वमतः कुतो ऽपवदसे कैवल्यकाले तु तत् ॥९०॥
अन्योन्याश्रिततां तु सत्वरजसोरास्थाय सत्त्वस्थितौ
सौख्ये सत्यपि चोद्विभेषि रजसो दुःखं मम स्यादिति, ।
मा भैषीर्नहि सत्त्वजं तद,चलं चिन्मात्रसत्तासुखं,
यन्मात्रामुजीव्य[1] मोक्षपदवी प्रेक्षावता ऽऽकाङ्क्ष्यते ॥९१॥
दृष्ट्वा योगोपसर्गांस्त्रससि, तदुचितं, ते हनिष्यन्ति रन्ध्रे,
दुःसंपादो ऽप्रमादः सततमसुमता, वासनाश्चातिसूक्ष्माः ।
वेदो ऽप्याह द्वितीयाद्भय,[2]मिह विहितस्तेषु 'मिथ्यात्वदृष्टि-
ब्रह्मास्त्रस्य प्रयोग,ः कुरु त,मनुभवाशेषसंसारभङ्गम् ॥९२॥

---

१ एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति । बृह. । ४ । ३ । ३२ । २ द्वितीयाद्वै भयं भवति । बृह. १ । ४ । २ ।

यत् काणादमतं विमृश्य पुरुषासङ्गत्वचिद्रूपते
मुक्तेः सम्भवबोधनाय कपिलो युक्त्या व्यधातिष्ठिपत् ।
अन्वग्राह्यमुनेयतैव सकलः संसारतप्तो जनो
भक्त्याऽध्येतु गुरोरथोपनिषदस्तन्निर्णिनीषाऽस्ति चेत् ॥९३॥
रुद्धे मोक्षपथे प्रयाति न मनो दुर्वासनाकण्टकैः,-
र्यातं नाप्यवतिष्ठतेऽत्र, ममतापाशैर्भवे कृष्यते ।
उद्यत्कण्टकशोधनाय ममतापाशच्छिदे च क्षमान्
योगान् दर्शयतः पतञ्जलिमुनेर्धन्यो वदान्योऽस्ति कः ॥९४॥
प्रत्यक्षवेदवचनैरविरोधएव
प्रामाण्यमिष्टमनुमाननृभाषितानाम् ।[1]
ब्रह्मैव कारणतया जगतो निशम्य
वेदेषु न प्रकृतिकारणतां प्रतीमः ॥ ९५ ॥
बौद्धजैनमतदूषणकाले तत्र साधकमवाप्यनुमानम् ।
पिष्टपेषणमपास्य ततोऽद्य प्रस्तवीम्युपनिषन्मतमात्रम् ॥९६॥
येनैकेन ज्ञातमात्रेण सर्वं विज्ञातं स्यात् सत्यमेकं तदेव ।
अन्यद् वाचाऽऽरम्भणं नामधेयं मिथ्येत्याह श्वेतकेतुं पिताऽस्य[2] ॥
मृदोऽवस्थाभेदाः कलशमणिकाद्या इति भवे-
दुपादाने ज्ञाते मितिरपि च तत्कार्यविषया ।
कुलालज्ञप्त्यां नो भवति घटधी,र्ब्रह्मणि ततो
ऽखिलोपादानत्वं श्रुतिवचनतात्पर्यविषयः ॥९८॥
विवर्तोपादानं फणिन इव रज्जुस्त,दखिल-
भ्रमाधिष्ठानत्वा,न्नहि भवति नित्ये परिणतिः, ।
स्थिता त्वस्मिन् माया परिणमति रूपैर्बहुविधै,-
र्विनाशेऽस्या ज्ञानाद् भवति नियतं संसृतिलयः ॥९९॥

---

१ विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम् जैमिनि सूत्रम् १।३।३ ।
२ छान्दोग्योप. ६ प्रपाठके ।

ज्ञाने सत्यपि नास्ति यद्विषयता नित्यं कदाचिच्च वा
ते ऽसन्तो, नरशृङ्गशुक्तिरजते दृष्टे इहोदाहृती ।
आत्मा त्वत्र विभाति नित्यमिति सन्, तद्वैपरीत्यं तु नो,
कर्तारं न विना क्रिया श्रुतचरी, सा ऽकर्मिका त्वीक्ष्यते ॥१००॥
तादृक्सर्वविवर्तकारणपरब्रह्माभिदां जन्मिनो
वेदस्तत्त्वमसीत्युवाच नवधा निःसंशयज्ञप्तये ।
यावन्नोज्झति तत्प्रकारयुगलं सर्वज्ञताऽल्पज्ञता-
रूपं, तावदियं न संघटत इत्येतत्परित्यज्यताम् ॥ १०१ ॥
त्यक्ते भागयुगे त्वखण्डपरचित्साक्षात्क्रिया निर्मला
स्वाध्यस्तानृतविश्वबाधनपटुः सम्पद्यते ध्यायतः ।
इत्यावेदितमेव पूर्वमसकृद्, विश्वस्य तस्माच्छ्रुतौ
त्यक्त्वा भेदधियं चिदात्मकपरानन्दैकतानो भव ॥ १०२ ॥
त्वं विज्ञानमयं समाधिसतताभ्यासेन कोशं परं
प्राप्यानन्दमयान्त्यभूमिमभजन्नैव चेत् स्थास्यसि ।
व्यर्थो ऽयं सकलः श्रमस्तव भवे, द्विज्ञानमात्रेण किं
कार्तार्थ्यं सुखमन्तरा, तदलसो मा भू, र्न दूरे ऽद्य तत् ॥१०३॥
अद्धावेवाऽतिसूक्ष्मे प्रविशति न मतिर्ब्रह्मतत्त्वे हि, तस्मा-
दन्ने प्राणे मनस्यप्यवददुपनिषद् ब्रह्मतां लोकदृष्ट्या, ।
विज्ञाने तां विचारक्षमपुरुषदृशा प्रोच्य सिद्धान्तमाहा-
नन्दो ब्रह्मेति, तस्मात् परचिति विमतिर्नोचिता ऽऽनन्दतायाम् ॥
उद्धर्तुं प्रकृतावणुष्वपि परैः क्षिप्तां जगद्धेतुता-
मध्यारोपयति श्रुतिः प्रथमतो ब्रह्मण्युपादानताम् ।
अस्पन्दे विगुणे विभाववयवैर्हीने ततो ऽपोद्य तां
सद् ब्रह्मैव तु निष्प्रपञ्च, मितरन्मिथ्येति चातिष्ठते ॥१०५॥
मोक्षे सिद्धे ऽप्यहंता कुविषयममतावर्जिता साक्षिरूपा
भात्येवाऽसौ न चेतोविकृतिरत इयं रागरोषौ न सूते ।

सा सर्वत्रात्मसाक्षात्कृतिरुपनिषदा स्तूयते,तद्धि पश्यन्
मुक्तः सूर्यो मनुश्चाहमभवमिति यद् वामदेवः प्रपेदे[1] ॥१०६॥
ब्रह्मैकार्था यस्य वृत्तिः समाधौ व्युत्थाने स्यान्नेहनानेतिरूपा ।
शुद्धा सा ऽऽस्तां मिश्रिता वा ऽन्यवृत्त्या, जीवन्मुक्तस्यैतदेव स्वरूपम् ॥
नाना नास्ति च, दृश्यते च, तदिदं मायेन्द्रजालोत्थ,मि-
त्यन्याबाधितवृत्तिकस्य विदुषो देहेन्द्रियार्थभ्रमाः ।
किं कुर्वन्तु, यदिन्द्रजालरचिताः सर्वे ऽपि, सो ऽयं यतः
सम्पन्नो, निजनिर्मितान्नहि भयं रागो ऽपि वा मायिनः ॥
आत्मज्ञोपि परानात्मविदुषः संचारयिष्यन् हिते
मार्गे जातिवयोऽन्वयश्रुतधनाऽवस्थाऽनुरूपक्रियः ।
स्वीयाचारनिदर्शनैस्तदुचिताचारोपदेशैश्च ता-
नुद्धर्त्तुं यतते, दयाम्बुधिपरेशत्मैक्यसाक्षी हि सः ॥ १०९ ॥
अभिदधदिति भूयश्चाप्रबोधं विवक्ष-
न्नुपसमहृत यावन्नालिरात्मोपदेशम् ।
निगडितखगमालं व्योम्नि जालं विकर्ष-
न्निह सपदि दयालुः प्रादुरासीत् स हंसः ॥ ११० ॥
चञ्च्वा वित्रोट्य जालं क्षिपति भुवि तदा सत्वरं तत्र हंसे
के चित्प्रोड्डीय जग्मुर्वियति शकुनयो लब्धतन्मोक्षहर्षाः ।
अन्ये जालेन साकं भुवि लुलुठु,रिमान् पाक्षिकाः के ऽप्यबध्नन्,
कांश्चिच्चाच्छिद्य तेभ्यः कति चन धनिनोऽतिक्षिपन् पञ्जरेषु ॥
तां हंसस्याऽखिलभवदशाबोधनापूर्वशैली-
मालोक्यालिः प्रणतिभिरमुं तोषयित्वा, विलासिन् ।
पश्यायातो मम गुरुरयं, वत्स वन्दस्व भक्त्या,
सिद्धो ऽर्थस्ते, शरणमुपयाह्येतमेवेत्यवादीत् ॥ ११२ ॥

---

१ बृहदा. । ४ । १० ।
२ तेन न भिन्नकर्मतापातः । ३. प्रथमशतकोक्तः ।

तथा ऽनुशिष्टस्तमदृष्टपूर्वं हंसं प्रसन्नं विमलप्रकाशम् ।
मुहुः प्रणम्यार्थितत्प्रसादो ऽभवद् विलासी तदनन्यवृत्तिः ॥११३॥

हंसो ऽहंसः स्फुरति परमाकाश इत्येवमादौ
भूयो ऽभ्यस्यन् प्रमदशबलाश्चर्यवृत्त्या क्रमेण ।
मत्वैकार्थ्यं पदगणइहैकैकहाने ऽपि तुल्यं
वाचः सर्वा विजहदभजद्धंसभावं विलासी ॥ ११४ ॥

क्षीणे ऽथावरणे ऽखिले ऽपि सततं तद्धंससाक्षात्क्रिया-
नन्दे वाङ्मनसातिगे स्फुरति च प्राप्यामृतं निर्भयः ।
सो ऽरोदीदहसन्ननर्त तमलिं हंसं च भूयो ऽनमद्
धन्यो ऽस्म्यत्रभवत्कृपा ऽद्य फलितेत्येतौ मुहुश्चाब्रवीत् ॥११५॥

सर्वेष्टसिद्धिरधुना निरुपप्लवा नः
सो ऽहं त्वमित्यपगता ऽनृतभेददृष्टिः ।
उक्त्वेति गाढमितरेतरमालिलिङ्गुः
सम्भूय तस्थुरथ ते ऽलिविलासिहंसाः ॥ ११६ ॥

संलापमित्यलिविलासिकृतं निरूप्य
संक्षिप्य काव्यकरके ऽत्र मया ऽवरुद्धा ।
तीर्थामरौघबहुलौकिकवृत्तसर्वा-
लंकारदार्शनिकवस्तुचतुः समुद्री ॥ ११७ ॥

प्राज्ञैरिदं प्रतिपदध्वनि सावधानै-
रन्वीक्ष्यमाणमसकृन्नवखण्डकाव्यम् ।
धर्मार्थकामपरमुक्तिसमीक्षणेषु
दाक्ष्यं फलिष्यति सभासु सदादरार्हम् ॥ ११८ ॥

---

१ अत्र पूर्वपूर्वैकैकपदत्यागे ऽपि प्रकृतार्थो न हीयत इति सूक्ष्मदृशा ऽवधातव्यम् । २ अभेदापत्तिव्यञ्जनाय ।

३ तत्पदार्थो ऽलिस्त्वंपदार्थो विलासी तयोरभेदापादकासिपदार्थस्थानीयो हंस इत्येषां क्रमेणाभिधानमैक्योक्तिः [illegible]

ये ऽलंकारगभीरचित्रमधुरोपन्यासशुश्रूषवो
ज्ञातुं भारतविश्रुतामरपुरीतीर्थानि वाञ्छन्ति ये ।
ये च द्वादशदर्शनीस्थविषयव्युत्पत्तिजातादराः
संलापोऽलिविलासिनोर्मुहुरयं तैरास्थयाऽऽलोच्यताम् ॥

श्रीमत्तातनृसिंहशास्त्रिचरणस्वर्वृक्षसंसेविनो
राजारामयतीन्द्रसद्गुरुकृपापीयूषपूतात्मनः ।
काश्यां वेदरसाङ्कभू (१९६४) मितशके संपादिता वैक्रमे
स्याद् गङ्गाधरशर्मणः कृतिरियं विद्वज्जनानां मुदे ॥

एकाग्रे सति नव्यकाव्यकुतुकव्याजेन चित्ते चिरं
यस्मिन् साक्षिणि विस्फुरत्यनुपदं साक्षात् प्रणाड्याऽपि वा ।
वक्तृश्रोतृभिराप्यते परचिदानन्दो वचोगोचरः
स स्वैकाश्रितयाऽनया रचनया प्रीतोऽस्तु विश्वेश्वरः ॥१२१॥

श्रीसाम्बसदाशिवार्पणमस्तु ।

शुभं भवतु ।

एतत्पुस्तकप्राप्तिस्थानम्—
प्राभाकरी-कंम्पनी.
रामकटोरा,
बनारस (*Cantt*).
U. P. Agra and Oudh.

Printed at Prabhakari Printing works, Benares. 1-10-1907

विक्रेयपुस्तकानि ।

पुरश्चर्यार्णवः-तन्त्रशास्त्रम् (रायल-अठपेजी पृ. सं. १३५०)	१३-०-०
हेमाद्रि-कृतचतुर्वर्गचिन्तामणेर्दानखण्डः ।	७-०-०
अद्भुतसागरः-शकुनग्रन्थः-(रायल-अठपेजी पृ. सं. ८००)।	५-०-०
नेपालमाहात्म्यम् ।	१-४-०
नरपतिजयचर्या-स्वरोदयो टीकायुगलोपेतः । (१ खण्डम्)	१-०-
ज्यौतिषवेदाङ्गं सुधाकरभाष्येण सहितम् ।	१-०-०
नित्यकर्मप्रकाशिका माध्यन्दिनीयशुक्लयजुर्वेदाध्यायिनाम् ।	०-१२
कर्पूरस्तवो-दीपिकाख्यया टीकया समेतः ।	०-४-
मिथिलामाहात्म्यम् ।	०-४-
वर्णवीजकोषः ।	०-४-
ककारादिकालीसहस्रनामस्तोत्रम् शतनामसहितम् ।	०-३
गुह्येश्वरी- " ।	०-२
महाकाल- " ।	०-२
सरस्वत्या दशश्लोकीस्तोत्रम् ।	०-२
श्रीसूर्यस्तवराजाद्यष्टस्तोत्राणि ।	०-१
ज्योतिर्विदाभरणं सुबोधिकाख्यया टीकया समेतम् (मुद्रायन्त्रे वर्त्तते)	

एतेषां प्रापणव्ययः पृथक् ।

एतदन्यान्यपि पुस्तकानि यावद्विक्रेयवस्तूनि च पत्रद्वारा .. नास्मिन् कार्यालये प्राप्यन्ते ।

एतेषां विशदविवरणपत्रं चाज्ञापत्रप्राप्त्यनन्तरमेव प्रहितं भविष्यति ।

☞ प्राभाकरी-कम्पनी ।

रामकटोरा, बनारस (Can..

U. P. Agra and Oudh